ISSN No. 2277-680X

# उशती
# UŚATĪ

षोडशाङ्कः ( Vol. XVI ) 2016 वर्षम्

## व्याकरणसंगोष्ठीविशेषाङ्कः

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः ॥-ऋ.१०/७१/४

राष्ट्रियसंस्कृतसंस्थानम्
गङ्गानाथझापरिसरः, प्रयागराजः
2020

ISSN No.: 2277–680X

# उशती
# UŚATĪ
## (THE JOURNAL OF SANSKRIT STUDIES)

**षोडशाङ्कः (Vol. XVI)** **2016 वर्षम्**

## व्याकरणसंगोष्ठीविशेषाङ्कः

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।

उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः॥

ऋ० १०।७१।४


**प्रधानसम्पादकः**

एन्. आर्. कण्णन्

**सम्पादकाः**

ललितकुमारत्रिपाठी

अपराजिता मिश्रा

मोनाली दास



**राष्ट्रियसंस्कृतसंस्थानम्**

गङ्गानाथझापरिसरः, प्रयागराजः

२०२०

# उशती

**पुनरीक्षणसमितिः**

**प्रो. शैलकुमारी मिश्रा** (साहित्यविभागः)
राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, प्रयागराजः

**प्रो. विश्वम्भरनाथगिरिः** (साहित्यविभागः)
राष्ट्रियसंस्कृतसंस्थानम्, गङ्गानाथझापरिसरः, प्रयागराजः

**प्रो. भारत भूषण त्रिपाठी** (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम्, लखनऊपरिसरः, लखनऊ

**प्रकाशकः**

**प्राचार्यः**,
राष्ट्रियसंस्कृतसंस्थानम्,
**गङ्गानाथझापरिसरः**,
चन्द्रशेखर-आजादोद्यानम्,
प्रयागराजः, उ. प्र. — २११ ००२

**प्रकाशनवर्षम्** २०२०

**अङ्कस्य शुल्कम्**

भारतीयम् ₹१५०
वैदेशिकम् $३५

© **प्रकाशकः**

**मुद्रकः**

एकेडमी प्रेस
दारागंज, प्रयागराजः - २११ ००२

ISSN No.: 2277–680X

# उशती
# UŚATĪ

(THE JOURNAL OF SANSKRIT STUDIES)

---

**षोडशाङ्कः** (Vol. XVI) **2016 वर्षम्**

---

## व्याकरणसंगोष्ठीविशेषाङ्कः

उ॒त त्वः॒ पश्य॒न्न द॑दर्श॒ वाच॑मु॒त त्वः॑ शृ॒ण्वन्न शृ॑णोत्येनाम् ।

उ॒तो त्व॑स्मै त॒न्व१॒॑ं वि स॑स्रे जा॒येव॒ पत्य॑ उश॒ती सु॒वासाः॑ ॥

ऋ० १०।७१।४

**Chief Editor**
N.R. Kannan

**Editors**
Lalit Kumar Tripathi
Aprajita Mishra
Monali Das

**Rashtriya Sanskrit Sansthan**

Ganganatha Jha Campus, Prayagraj

2020

# UŚATĪ

**Review Committee**

**Prof. Shail Kumari Mishra** (Dept. of Sahitya)
Rashtriya Sanskrit Sansthan, Ganganatha Jha Campus, Prayagraj
**Prof. Vishwambhar Nath Giri** (Dept. of Sahitya)
Rashtriya Sanskrit Sansthan, Ganganatha Jha Campus, Prayagraj
**Prof. Bharat Bhushan Tripathi** (Dept. of Vyakarana)
Rashtriya Sanskrit Sansthan, Lucknow Campus, Lucknow

**Published by**

**Principal**,
Rashtriya Sanskrit Sansthan,
**Ganganatha Jha Campus**,
Chandrasekhar Azad Park,
Prayagraj, U. P. — 211 002

**Year** 2020

**Individual Copy**

Indian ₹150
Foreign $35

© publisher

**Printed at**

Academy Press
Daraganj, Prayagraj - 211 002

# प्रधानसम्पादकीयम्

संस्कृतभाषा विश्वस्य प्रायेण सर्वासां भाषाणां जननी। भारतवर्षस्य समग्रं प्राचीनं वाङ्मयं संस्कृते निवद्धं वरीवर्तते। अस्या भाषायाः महत्त्वं वैशिष्ट्यञ्च सर्वैरेव विद्वद्भिर्ज्ञायत एव। राष्ट्रियसंस्कृतसंस्थानं सम्पूर्णेऽपि भारतवर्षे संस्कृतस्य सर्वविधं प्रचारं प्रसारञ्च कर्तुं सर्वदा प्रयतमानं विद्यते। राष्ट्रियसंस्कृतसंस्थानस्य गङ्गानाथझापरिसरस्य शोधक्षेत्रे महत्त्वपूर्णमवदानं सर्वैरेव विद्वद्भिर्ज्ञायत एव। अयं परिसरः प्रतिवर्षम् उशती नाम्नीं पत्रिकामपि प्रकाशयति, यस्यायं षोडशाङ्कः व्याकरणसंगोष्ठीविशेषाङ्करूपेण प्रकाश्यमानं वर्तत इति प्रमोदस्य विषयः। अस्यां शोधपत्रिकायां विविधानां विदुषां शोधनिबन्धाः प्रकाश्यन्ते। अस्मिन्नङ्के येषामपि विदुषां शोधलेखाः प्रकाश्यन्ते तेभ्यः विद्वद्भ्यः पत्रिकायाः सम्पादकेभ्यश्च धन्यता-वचांसि प्रकटयामि।

**विदुषामाश्रवः**

**डॉ. एन्. आर्. कण्णन्**
**प्राचार्यः**

# विषयानुक्रमणी


**1. व्याकरणं काव्याधिकरणञ्च**
रहसबिहारी द्विवेदी ........................................ 1

**2. काव्यशास्त्रे व्याकरणस्य सन्दर्भः**
रामलखनपाण्डेयः ........................................ 17

**3. पाणिनीय व्याकरणं संस्कृतकाव्यशास्त्रञ्च**
हरिदत्त शर्मा ........................................ 23

**4. काशी के सौम्य एवं उत्कृष्ट वैयाकरण आचार्य रामप्रसाद त्रिपाठी**
भगवत् शरणशुक्लः ........................................ 30

**5. व्याकरणदर्शनं जातिमीमांसा च**
प्रमोद कुमार शर्मा ........................................ 36

**6. सिद्धान्तचिन्तामणौ पण्डितश्रीरामप्रसादत्रिपाठिनोपज्ञाताः सिद्धान्ताः (सिद्धान्त-चिन्तामणिसन्दर्भे)**
रामसलाही द्विवेदी ........................................ 48

**7. शाब्दबोधप्रयोजकं पाणिनीयं व्याकरणम्**
विष्णुकान्तपाण्डेयः ........................................ 70

**8. सुबर्थविचारसारः**
के. वि. रामकृष्णमाचार्युलू ........................................ 80

**9. 'ङिच्च' इति सूत्रविमर्शः**
विष्णुकान्तपाण्डेयः ........................................ 116

**10. 'अभिधानचिन्तामणि' की कतिपय विशेषताएँ व्युत्पत्तिरत्नाकर टीका के आलोक में**
दीपक कुमार, अपराजिता मिश्रा एवं ललित कुमार त्रिपाठी ........... 120

**11. Our Contributors** ........................................ 129

# व्याकरणं काव्याधिकरणञ्च

रहसबिहारी द्विवेदी

व्याक्रियन्ते व्युत्पाद्यन्तेऽसाधुशब्देभ्यः साधुशब्दाः पृथक् क्रियन्ते येन तद् व्याकरणम्। असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिप्रयोजकनियमविशेषो व्याकरणपदार्थः। (प्रो. रामयत्न शुक्लः)। काव्यं नाम -

लोकोत्तरे हृदाह्लादे लोकोद्बोधे च सङ्गता।
प्रज्ञावतः कवेः सद्वाक् काव्यमित्यभिधीयते॥[1]

'आधारोऽधिकरणम्'[2] इति पाणिनिसूत्रानुसारेण प्रयोगदिशाऽधिकरणे सप्तमीविभक्तिर्भवति [3]। उपलब्धेषु प्रथमः काव्यशास्त्रस्याचार्यः भरतमुनिर्वेदमनुसृत्य प्रवर्तते। तत् यथा -

जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥[4]

अत्र टीकायामभिनवगुप्तो वदति - इह पठ् व्यक्तायां वाचीत्युक्तम् व्यक्तत्वं विवक्षाविशिष्टस्वार्थार्पणक्षमत्वम्। तच्च काक्वध्यायवक्ष्यमाणस्वरालङ्कारादिसामग्रीयोजनेन भवतीति तस्योपस्कृतं पाठ्यमुच्यते। तच्च प्राधान्यात्प्रथममुत्पन्नम्। तथा हि वक्ष्यति -

वाचि यत्नस्तु कर्तव्यो नाट्यस्यैषा तनूः स्मृता।
अङ्गनेपथ्यसत्त्वानि वाक्यार्थं व्यञ्जयन्ति हि॥[5]

एवं भरतदिशा वाचोऽधिकरणत्वं स्फुटं भवति। आचार्यानन्दवर्धनो वाचः काव्याधिकरणत्वं स्वीकरोति -

सरस्वती स्वादु तदर्थवस्तु निःस्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥[6]

---

1 मम काव्यतत्त्वमीमांसायाम्
2 अष्टा., 1.4.45
3 'सप्तम्यधिकरणे च' अष्टा., 2.3.36
4 ना.शा. 1.17
5 अभिनव.भा. 14.2
6 ध्व.लो., 1.06

एतेन सरस्वत्याः (वाचः) अधिकरणत्वं सिद्ध्यति।

अभिनवगुप्तेन प्रभावितस्य आनन्दवर्धनस्य चाधिवक्ता मम्मटः काव्यप्रकाशस्य मङ्गलाचरणरूपायां प्रथमायां कारिकायां भारत्याः (वाचः) अधिकरणत्वं स्वीकरोति -

नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।[7]

अत्रादधतीत्यनेनाधिकरणभूता वागेव।

भामहः काव्यलक्षणप्रतिपादने काव्यस्य स्थाने वाचः प्रयोगं करोति। एतेन स्फुटमेव यत्स वाचमेवाधिकरणं मनुते - वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः। बृहदारण्यके यः कश्चन शब्दो वागेव सा[8] इति प्रतिपादितमतः पण्डितराजो रसगङ्गाधरे शब्दस्याधिकरणत्वं स्वीकृत्यापि व्याख्याने भामहमनुसरति तत्प्रतिपादनक्रमोऽपि भामहसदृशः "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" "रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता"। भामहः प्रथमं वक्राभिधेयशब्दोक्तिरिति, वक्रशब्दस्यार्थं प्रतिपादयति -

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यन्तेऽतिशयोक्तिं तामलङ्कारितया तथा।।
सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।

स्वकीये "काव्याधिकरणानुभूतिविमर्श" इति ग्रन्थे मयाऽस्मिन् विषये विस्तृतं प्रतिपादनं कृतमत्र सङ्केतमात्रं कृतम्। अग्निपुराणमनुसरन् दण्डी पदावलीमधिकरणं मनुते शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली। वस्तुतः 'सुप्तिङन्तं पदम्', 'अपदं न प्रयुञ्जीत' इत्येवं पाणिनिव्याकरणदिशा पदान्येव प्रयोगयोग्यानि भवन्ति, अतो दण्डी पदावलीत्यधिकरणं मनुते, किन्तु स्वग्रन्थे काव्यसर्जने वाचो महत्त्वं स्वीकरोति -

गौर्गौः कामदुधा सम्यक्प्रयुक्ता स्मर्यते बुधैः।[9]

वत्सो वां मधुमद्वचोऽशंसीत् काव्यः कविः[10] इति वाक्यं ऋग्वेदे प्राप्यतेऽतस्तद्दृशा काव्याधिकरणं वागेव सिद्ध्यति। प्रत्यक्षतः ऋग्वेदः काव्यशास्त्रीयो ग्रन्थो

7 का.प्र., 1.1
8 बृ., 1.5.3
9 काव्या., 1/6
10 ऋ., 8.9.11

नास्ति, तथाप्यस्मिन् प्रयुक्तानि वाग्विशेषणानि काव्येषु काव्यशास्त्रीयग्रन्थेषु प्रायशः प्राप्यन्ते। तद्यथा द्योतमाना[11] त्विषिमती[12] चित्रा[13] नवस्रक्तिम् (मौलिकी)[14] स्वदुमती[15] ऋतस्पृक्[16] तथा च इषिरा (सोद्देश्या) अनमीवा (निर्दोषा) द्युमती (उर्जस्वती) इत्यादिरूपेण प्रोक्ता। एवमेव वाग्गतं वैशिष्ट्यं प्रायशः काव्यशास्त्रिभिः प्रतिपादितम्। यद्यपि सामान्यवाग्व्यवहारदिशा मध्यमावैखर्योः (शब्दार्थयोः) प्रयोगो भवति। अतो भाषादृशा एतयोरेव विचारः प्रवर्तते, किन्तु रसानुभूतौ लोकोत्तराह्लादानुभूतौ वा शब्दार्थयोर्गुणीभावो भवति। यथाह मम्मटः - शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणं कविकर्म।[17] श्रव्यकाव्यदृशा वाचो महत्त्वं प्रथमाचार्यो भामहः मुहुर्मुहुः स्वीकरोति 'रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता'[18] वाचामलङ्कृतिः[19] इति वाचामलङ्काराः पञ्चैवान्यैरुदाहृताः[20]

नानार्थवन्तोऽनुप्रासा न चाप्यसदृशाक्षराः।
युक्त्यानया मध्यमया जायन्ते चारवो गिरः[21]
स्वयंकृतैरेव निदर्शनैरियं मया प्रक्लृप्ता खलु वागलङ्कृतिः।
अतः परं चारुरनेकधापरो गिरामलङ्कारविधिर्विधास्यते।
गिरामलङ्कारविधिः सविस्तरः स्वयं विनिश्चित्य धिया मयोदितः।
अनेन वागर्थविदामलङ्कृता विभाति नारीव विदग्धमण्डना।[22]

अंशुमद्भिश्च मणिभिः फलनिम्नैश्च शाखिभिः।
फुल्लैश्च कुसुमैरन्यैर्वाचोऽलङ्कुरुते यथा[23] ।।

11 ऋ., 1.143.7
12 ऋ., 2.21.7
13 ऋ., 5.61.6
14 ऋ., 8.76.12
15 ऋ., 10.88.3
16 ऋ., 8.8.11
17 का.प्र., 1.2
18 काव्या.भा., 1.4
19 काव्या.भा., 1.36
20 काव्या.भा., 2.4
21 काव्या.भा., 2.7
22 काव्या.भा., 3.58
23 काव्या.भा., 5.64

तदेभिरङ्गैर्भूष्यन्ते भूषणोपवनस्रजः ।
वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते[24]

इति निगदितास्तास्ता वाचामलङ्कृतयो मया।[25] एकस्मिन् स्थाने वाचां स्थाने काव्यशब्दो दृश्यते -

शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः ।
लोको युक्तिः कलाश्चेति मन्तव्याः काव्यगैर्ह्यमी ॥[26]

अग्निपुराणकारोऽपि वाचं सर्वाधिकां महत्त्वपूर्णां मनुते -

ध्वनिर्वर्णाः पदं वाक्यमित्येतद् वाङ्मयं मतम्।[27]
वर्णेषु वर्णवृन्दं स्यात्पदं सुप्तिङ्-प्रभेदतः ।
सङ्क्षेपात् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली ॥[28]
वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्।
पृथक्-प्रयत्ननिर्वर्त्यं वाग्वक्रिम्णि रसाद्वपुः ॥[29]

महाकविः कालिदासो रघुवंशमहाकाव्ये मङ्गलाचरणे शब्दार्थौ विविक्तौ न लिखति। अत्र वागर्थयोः प्रतिपत्तिरिति स्वाभिलषितं प्रकटयन् वागर्थाविव सम्पृक्तौ इति पार्वतीपरमेश्वराविति वदति। यतो हि वागिति कथनेन परा पश्यन्ती मध्यमा वैखरीरूपा वागन्विता भवति। अनुभूतावुन्मेषे च परापश्यन्त्योरवस्थितिर्भवति काव्ये नात्र सन्देहः। अभिज्ञानशाकुन्तले अनुभूतिपरे पद्ये स लिखति -

रम्याणि वीक्ष्य मधुराँश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वम्
भावस्थिराणि जननान्तरसौहृदानि ॥[30]

---

24 काव्या.भा., 5.66
25 काव्या.भा., 5.69
26 काव्या.भा., 1.9
27 अग्नि., 337.1
28 अग्नि., 337.5
29 अग्नि., 337.33
30 अभि., 5.4

चेतसा स्मरणे लोकव्यवहारमयी वाङ् न भवति। मनसस्तु परा बुद्धिः, यो बुद्धेः परतस्तु सः। अतो वागिति कथनेन चतुर्विधा वागन्विता भवति। भवतु नाम भाषा विचारे लोकव्यवहारे, लोकरचनायां मध्यमावैखर्योः उपयोगः। उच्चारणेऽपि 'आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि' एवं वेदे प्रशस्तैः काव्यशास्त्रिभिश्च वागेव काव्याधिकरणत्वेन स्वीकृता विद्यते।

वेदाङ्गेषु व्याकरणं महत्त्वपूर्णं स्थानं बिभर्ति। वैयाकरणा वाग्विदः शब्दविदो कथ्यन्ते। पूर्वमेवोक्तं यः कश्चन शब्दो स वागेवेति छान्दोग्योपनिषदि प्रोक्तम्।

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती। व्यावहार उक्तिर्लिपितं भाषितं वचनं वचः। अमरकोषे वाचः पर्यायशब्दा इमे। वाक्शब्दप्रयोगो भाषाब्रह्मप्रति-भाशब्दकाव्यदेवीत्यादिरूपेणापि प्राप्यते। भगवान् भर्तृहरिर्वाक्यपदीयस्य प्रथमायां कारिकायां कथयति -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रकिया जगतो यतः॥[31]

काव्यशास्त्री महाकविर्दण्डीशब्दाह्वयं ज्योतिरिति कथयति -

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारन्न दीप्यते॥[32]

दण्डी सर्वथा शुद्धभाषाया आग्रही, अतः स्वग्रन्थस्य काव्यादर्शस्यादौ वक्ति -

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥[33]
गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥[34]

[31] वा.प., 1.1
[32] काव्या., 1.4
[33] काव्या., 1.1
[34] काव्या., 1.6

काव्यशास्त्रग्रन्थेषु काव्यदोषनिरूपणे समे आचार्याः च्युतसंस्कृतदोषस्य निरूपणं कुर्वन्ति। शुद्धभाषाप्रयोगे वैयाकरणान् प्रति कृतज्ञाः समेऽप्याचार्या दृश्यन्ते। यथाह भामहः -

सूत्राम्भसं पदावर्तं परायणरसातलम्।
धातूणादिगणग्राहं ध्यानग्रहबृहत्प्लवम्॥
धीरैरालोकितप्रान्तममेधोभिरसूयितम्।
सदोपभुक्तं सर्वाभिरन्यविद्याकरेणुभिः॥
नापारयित्वा दुर्गाधममुं व्याकरणार्णवम्।
शब्दरत्नं स्वयङ्गम्यमलङ्कर्तुमयं जनः॥[35]

अन्यस्य प्रयोगं दृष्ट्वा तथाविधं प्रयोगं भामह उचितं न मनुते। एतादृशः प्रयोगः परेण धृतमुक्ताकुसुमावलीव भवति। उचितमेतद् यद् व्याकरणमधीत्य पाणिनिसूत्रदिशा परीक्ष्य शब्दप्रयोगः कविना क्रियताम् -

तस्य चाधिगमे यत्नः कार्यः काव्यं विधित्सता।
परप्रत्ययतो यत्तु क्रियते तेन का रतिः॥
नान्यप्रत्ययशब्दा वागाविभाति मुदे सताम्।
परेण धृतमुक्तेव सरसा कुसुमावली
मुख्यस्तावदयं न्यायो यत्स्त्वशक्ता प्रवर्तते।
अन्यसारस्वता नाम सन्त्यन्योक्तानुवादिनः॥[36]

भामहेन काव्यालङ्कारस्य षष्ठाध्याये काव्योचितशब्दार्थविषये सम्यग् विचारोऽकारि। तत्र को धातु कः प्रत्ययः कश्च सन्धिः विविधवर्णदिशा के प्रयोगयोग्याः सन्ति, अस्मिन् विषये सोदाहरणं निरूपणं व्यधायि। अस्मिन् विषये श्रीलालबाहादुरशास्त्रीराष्ट्रीय-संस्कृतविद्यापीठतः प्रकाशितायां शोधपत्रिकायां मम शोध : प्रकाशित :। जिज्ञासवस्तत् पठन्तु।

न केवलं भाषाविषये काव्यशास्त्रिणां वैयाकरणान्प्रति समादरोऽपितु स्वप्रतिपादितकाव्यतत्त्वविषयेऽपि व्याकरणमनुसरन्ति। तद्यथा - आनन्दवर्धनो ध्वनिस्वरूपनिरूपणे एवं वाच्यव्यतिरेकिणो व्यङ्ग्यार्थस्य सद्भावं प्रतिपाद्य प्रकृत उपयोजयन्नाह -

---

35 काव्या.भा., 6.1-3

36 काव्या.भा., 6.4-6

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरभिः कथितः॥[37]

अत्र सूरभिरित्यस्य व्याख्याने स कथयति -"सूरभिः कथित " इति विद्वदुपज्ञेयमुक्तिः न तु यथाकथञ्चित् प्रवृत्तेति प्रतिपाद्यते। प्रथमे हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। तथैव अन्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिः वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः[38]।

अत्र ध्वन्यालोकस्य दीपशिखाव्याख्याकारेणाचार्येण शुक्लचण्डिकाप्रसादेनैवं व्यलेखि -विद्वद्भ्यः उपज्ञा आद्यं ज्ञानं प्रथमम् उपक्रमं यस्या उक्तेरिति बहुव्रीहिः, विदुषामुपज्ञेति तत्पुरुषाश्रये तु - "उपज्ञोपक्रमं तदाद्याचिख्यासायाम्" इति पाणिनिसूत्रेण विद्वदुपज्ञमिति नपुसंकत्वं स्यात्।ध्वनिरितीयमुक्तिर्न यथाकथञ्चिद् एवमेव निर्मूला प्रवृत्तेत्यर्थः। तेनैव विदुषा उल्लिखितं - वैयाकरणा हि प्रथमे मुख्या विद्वांसः यथोक्तं वाक्यपदीये भर्तृहरिणा -

रूपान्तरणे ये देवा विचरन्ति महीतले।
ये व्याकरणसंस्कारपवित्रितमुखा नराः॥
यतो व्याकरणं सर्वविद्यानां मूलतत्त्वम्।[39]

तथा च उक्तं तत्रैव -

उपासनीयं यत्नेन शास्त्र व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्॥[40]

ते तत्र भवन्तः श्रूयमाणेषु वर्णेषु श्रवणीकृतगोचरीक्रियमाणान् स्फोटव्यञ्जकान् वर्णानित्यर्थः ध्वनिरिति व्यवहरन्ति व्यपदिशन्ति। तथाहि - प्रतीतपदार्थको लोके ध्वनिः शब्दः इत्युच्यते - एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुण इति च महाभाष्यम्।

'यः संयोगवियोगाभ्यां करुणैरुपजन्यते।
स स्फोटश्शब्दजश्शब्दो ध्वनिरित्युच्यते बुधैः'।

[37] ध्व.लो., 1.3
[38] ध्व.लो. प्र. उ. 1.13
[39] पद., अथ शब्दानुशासनम् की व्याख्या में उद्धृत
[40] पद., अथ शब्दानुशासनम् की व्याख्या में उद्धृत

इत्यपि वाक्यपदीये चापि। तथैव तेषां वैयाकरणानां मतं सिद्धान्तमनुसरन्तीत्येवंशीलैः स्फोटशब्दो व्यङ्ग्यः ध्वनिस्तद्व्यञ्जक इति मतं स्वीकुर्वन्तीत्यर्थः। काव्यस्य तत्त्वभूतमर्थं व्यङ्ग्यं पश्यन्ति = (जानन्ति) ये इत्येवंशीलैः तैः अन्यैः काव्यमर्मज्ञैरित्यर्थः, सूरिभिः बुधैः वाच्यो वाचकश्चेति वाच्यवाचकौ अर्थशब्दौ तौ सम्मिश्रयतीति वाच्यवाचकसम्मिलितरूपः शब्दार्थः सहित इति यावत् काव्यमिति नामभाक् शब्दात्मा शब्दस्वभावः शब्दरूपः इत्यर्थः व्यङ्ग्यार्थस्य प्राधान्येन व्यञ्जकत्वाद् ध्वनिरित्युक्तः। तथाहि वैयाकरणैरर्थप्रतिपादकत्वात् प्रधानभूतस्य स्फोटस्य व्यञ्जकः शब्दः ध्वनिरित्युक्तः तथैव काव्यमर्मज्ञैरपि प्राधान्येन व्यङ्ग्यार्थस्य व्यञ्जकं शब्दरूपं काव्यमपि ध्वनिरित्युक्तमिति तात्पर्यम्। काव्यध्वनिनिरूपणे रसध्वनिः, वस्तुध्वनिः, अलङ्कारध्वनिः - इत्येते तद्भेदाः कृताः। अत्र सर्वप्रदेशेषु व्याकरणस्य प्रभावो दरीदृश्यते। एतेन समग्राणि काव्यप्रतिपादकतत्त्वानि व्याकरणे प्रभावितानि सन्ति। आचार्यो राजशेखरः पुराकथादिशा स्वकीये काव्यशास्त्रीये ग्रन्थे (काव्यमीमांसायां) सरस्वतीपुत्रस्य काव्यपुरुषस्य वर्णनं करोति। तदेवम् - एवं गुरुभ्यो गिरः पुण्याः पुराणीः शृणुमः स्म। यत्किल धिषणं शिष्याः कथाप्रसङ्गे पप्रच्छुः, कीदृशः पुनरसौ सारस्वतेयः काव्यपुरुषो वो गुरुः इति। स तान् बृहताम्पतिरूचे। पुरा पुत्रीयन्ती सरस्वती तुषारगिरौ तपस्यामास। प्रीतेन मनसा तां विरञ्चिः प्रोवाच - पुत्रं ते सृजामि। अथैषा काव्यपुरुषं सुषुवे। सोऽभ्युत्थाय सपादोपग्रहं छन्दस्वतीं वाचमुदचीचरत् -

यदेतद् वाङ्मयं विश्वमर्थमूर्त्या विवर्त्तते।<br>
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ।

तामाम्नायदृष्टचरीमुपलभ्य भाषाविषये छन्दोमुद्रां देवी ससम्मदमङ्कपर्यङ्केनादाय तमुदलापयत्। वत्स! सच्छन्दस्काया गिरः प्रणेतः! वाङ्मयमातरमपि मातरं मां विजयसे। प्रशस्यतमं चेदिदमुदाहरन्ति यदुत 'पुत्रात् पराजयो द्वितीयं पुत्रजन्म' इति। त्वत्तः पूर्वे हि विद्वांसो गद्यं ददृशुर्न पद्यम् त्वदुपज्ञमथातः छन्दस्वद् वचः प्रवर्त्स्यति। अहो श्लाघनीयोऽसि शब्दार्थौ ते शरीरम्, इत्यादि। भविष्यतोऽर्थस्याभिधात्री भगवती श्रुतिरपि भवन्तमभिस्तौति,

'चत्वारि शृङ्गास्त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽस्य।<br>
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यानाविवेश'।

अत्र काव्यपुरुषनिरूपणे 'विवर्ततेऽर्थभावेन' इति वाक्यपदीयप्रथमाकारिकांशः स्वतः स्मृतिपथमायाति। तथा च काव्यपुरुषस्तुतौ यः मन्त्रः सरस्वत्या प्रोक्तः

चत्वारीति सोऽपि व्याकरणस्य प्रशस्तैराचार्यैर्भाषादिशा मुहुर्मुहुर्व्याख्यातः। भवतु नाम सायणादिभाष्ये यज्ञपरं सूर्यपरं वा व्याख्यानम्। काव्यं भाषया निर्मीयतेऽतो राजशेखरेण मन्त्रमिममनुसृत्य काव्यपरकं व्याख्यानमकारि। तद्यथा -

चत्वारि शृङ्गाणि - काव्यशरीरं (वाक्/वाक्यं/पदावली), आह्लादकतत्त्वानि, गुणाः, अलङ्काराः। पूर्वं राजशेखरीये वाङ्मयविभाजने चत्वारः वेदाः, चत्वारि शास्त्राणि - पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतयः इत्येवं व्याख्यानं प्राप्यते। त्रयोऽस्य पादाः - व्यवस्थितपदा ऋचः, सङ्गीतयः सामानि, अगीतानि यजूंसि। त्रयीति कथनेन वेदानामपि बोधो भवति। तत्तु गद्य-पद्य-गेय-दिशा विद्यते। तत्रैवायं व्याख्यानम् - (क) वाक्यं काव्यं तस्य त्रिधा व्यापारः - वैभक्तः, शाक्तः, शक्तिविभक्तिमयश्च। (ख) वाक्यं वचनमिति व्यवहरन्ति (उक्तिविशेषः काव्यम्) तच्च प्रकृतिभेदेन ब्राह्मं, शैवं, वैष्णवमिति (ग) वाच्यलक्षव्यङ्ग्यरूपाश्चार्थाः। द्वे शीर्षे - शास्त्रं काव्यञ्च, पौरुषेयमपौरुषेयञ्च, वाङ्मयं तद्विवर्तश्च, शब्दार्थौ नित्यानित्यौ शब्दौ वा। सप्त हस्ताः - शिक्षा, कल्पः, निरुक्तं, छन्दः, व्याकरणं, ज्योतिषम्, अलङ्कारशास्त्रम्। इदमपि ध्यातव्यं यद्राजशेखरः सप्तमं वेदाङ्गं साहित्यशास्त्रं मनुते यतोहि द्वा सुपर्णेति मन्त्रस्य रूपक-अतिशयोक्ति-ज्ञानाभावेऽस्यार्थस्यावगतिर्न भविष्यति यथाऽन्यशास्त्रज्ञानाभावे वेदावबोधः सम्यङ् न भवति। त्रिधा बद्धः (क) भूः, भूवः, स्वश्चेति। श्रुतौ शास्त्रे लोके च तं (काव्यपुरुषं) च सर्वसमयविदं दिव्येन चक्षुषा भविष्यदर्थदर्शिनं भूर्भुवः स्वस्त्रितयवर्तिनीषु प्रजासु हितकाम्यया काव्यविद्या प्रवर्तनायै प्रायुङ्क्त। अर्थवादः सन् परं कविकर्मणि श्रुतौ शास्त्रे च लोके च। (ख) वचनविन्यासक्रमो रीतिः - वैदर्भी, गौडीया, पाञ्चाली चेति रीतयस्तिस्रः कविः, काव्यं, काव्यपुरुषो वा काव्यरसवर्षणात्। वृषशब्दप्रयोगपुरस्सरं राजशेखरो बालरामायणस्य प्रथमे पद्येऽन्यत्र च तथ्यमिदं पुष्णाति -

प्रसत्तेर्यः पात्रं तिलकयति यं सूक्तिरचना
य आद्यः स्वादूनां श्रुतिचुलुकलेह्येन मधुना॥
यदात्मानो विद्याः परिणमति यश्चार्थवपुषा
स गुम्फो वाणीनां कविवृषनिषेव्यो विजयते॥[41]

अत्रापि परिणमति "यश्चार्थवपुषेति" प्रयोगः काव्यमीमांसामतं वाक्यपदीयमतं च पुष्णाति। रोरवीति - रौति: शब्दकर्मा, शब्दं करोति। काव्यं करोति। यथा - यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्तते। तावच्च कुशान् समिधश्च समाहर्त्तुं निःसृतो उशनामुनिः शिशुं परिवृत्ते पूषण्युष्मोपप्लुतं तमद्राक्षीत्। कस्यायमनाथो बाल इति

41 बा.रा., 1.1

चिन्तयन् स्वमाश्रपदमनैषीत्। क्षणादाश्वस्तश्च स सारस्वतेयस्तस्मै छन्दस्वतीं वाचं समचारयत्। अकस्माद् विस्मापयन् स (सरस्वतीपुत्रः काव्यपुरुषः) चाभ्युवाच -

या दुग्धाऽपि न दुग्धेव कविदोग्धृभिरन्वहम्।
हृदि नः सन्निधत्तां सा सूक्तिधेनुः सरस्वती॥[42]

इति तत्पूर्वकमध्येतॄणां च सुमेधस्त्वमादिदेश। ततः प्रभृति तमुशनसं सन्तः कविरित्याचक्षते। तदुपचाराच्च कवयः इति लोकयात्रा। कविशब्दश्च कवृ वर्णने इत्यस्य धातोः काव्यकर्मणो रूपम्। काव्यैकरूपत्वाच्च सारस्वतेयोऽपि काव्यपुरुष इति भक्त्या प्रयुज्यते। एवं रोरवीति तात्पर्यं राजशेखरः प्रतिपादयति काव्यपुरुषप्रसङ्गे। महादेवो मर्त्यानाविवेश - महादेवो प्रकाशचिद्रूपः शब्दवृषभो मर्त्यान् आविवेश (मरणधर्मवतो मनुष्यानाविवेश)। व्याकरणज्ञानजन्येन शब्दरूपमहादेवज्ञानेन महता देवेन सहास्माकमैक्यं सम्पन्नं स्यादित्यध्येयं व्याकरणमिति। एवं वाक्यपदीयव्याख्यायां[43] अम्बाकर्त्र्यां रघुनाथशर्मणा प्रोक्तम्। राजशेखरः शब्दरूपस्य काव्यपुरुषस्य वर्णनं करोति - तत्रास्ति मनोजन्मनो देवस्य क्रीडावासो विदर्भेषु वत्सगुल्मनाम नगरम्। तत्र सारस्वतेयः तामौमेयीं गन्धर्ववत् परिणिनाय। ततस्तद् वधूवरं विनिवृत्य तेषु प्रदेशेषु विहरमाणं तुषारगिरिमेवाजगाम, तत्र गौरी सरस्वती च मिथः सम्बन्धिन्यौ तस्थतुः। तौ च कृतवन्दनौ दम्पती दत्वाशिषं प्रभावमयेन वपुषा कविमानसनिवासिनौ चक्रतुः। तयोश्च तं सर्गं कविभ्यः सर्गलोकमकल्पतां यत्र काव्यमयेन शरीरेण मर्त्यमधिवसन्तो दिव्येन देहेन कवयः आकल्पं मोदन्ते। रूपकेष्वपि काव्यशास्त्रयोरभिसम्बन्धः प्रतिपादितो राजशेखरेण -

यत्क्षेमं त्रिदिवाय वर्त्म निगमस्याङ्गं च यत्सप्तमम्
स्वादिष्टं च यदैक्षवादपि रसाच्चक्षुश्च यद् वाङ्मयम्।
तद्यस्मिन् मधुरं प्रसादि रसवत् कान्तं च काव्यामृतं
सोऽयं सुभ्रु पुरो विदर्भविषयः सारस्वतीजन्मभूः॥[44]

सत्कवीन् भावकाँश्च प्रेरयन् ब्रवीति -

सम्यक् संसारविद्याविषदमुपनिषद् भूतमर्थाद्भुतानां
ग्रथ्नन्तु ग्रन्थिबन्धं वचनमनुपतत्सूक्तिमुक्ताः सुयुक्ताः॥

42 का.मी.3.3
43 वा.प., 1.130
44 बा.रा., 10.74

सन्तः सन्तर्पितान्तःकरणमनुगुणं ब्रह्मणः काव्यमूर्ते-
स्तत्तत्त्वं सात्त्विकैश्च प्रथमपिशुनितं भावयन्तोऽर्चयन्तु ॥[45]

कल्पनाप्रवणत्वात्काव्यस्य व्याकरणादिशास्त्रवन्महत्त्वस्वीकारेऽरुचिं विलोक्य तत्सदृशमहत्त्वं स्थापयितुं प्रयतते राजशेखरः। एवं राजशेखरेण मर्त्यानाविवेशेत्यस्य काव्यदिशा व्यवहारिकं वर्णनं काव्यमीमांसायां तृतीयाध्याये व्यधायि। भगवता भर्तृहरिणा प्रोक्तम् -

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[46]

स कश्चनोपदेष्टृबुद्धिस्थः प्रतिपत्तृबुद्धिस्थो वा प्रत्ययः लोके नास्ति, यः शब्दानुगमादृते शब्दानुवेधशून्यः। अतः सर्वविधं ज्ञानं शब्दमयमेव भवति। काव्यं शब्दार्थमयं वाङ्मयं वा भवति अथ व्याकरणानुगतमेव। अत एव प्रायशः सर्वे काव्यशास्त्राचार्याः सादरं वैयाकरणानां मतनुसरन्ति।

व्याकरणस्य यत्प्रयोजनं पातञ्जलमहाभाष्ये प्रोक्तं तदपि काव्यप्रयोजनं सम्बद्धमिव प्रतीयते। महाभाष्ये प्रोक्तम् - 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'।

रक्षा - वेदानां रक्षार्थमध्येयं व्याकरणम्। येन लोपागमविकारज्ञानेन तद्रक्षा भवति। काव्यशास्त्रं कविशिक्षार्थमपि भवति, अतः शुद्धभाषाप्रयोगस्याग्रहोऽत्रापि विद्यते। यथाह दण्डी -

गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति[47]॥
तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥[48]

रुद्रटः -

ज्वलदुज्ज्वलवाक्प्रसरः सरसं कुर्वन् महाकविः काव्यम्।
स्फुटमाकल्पमनल्पं प्रतनोति यशः परस्यापि ॥[49]

45 बा.रा., 10.105
46 वा.प., 1.123
47 काव्या., 1.6
48 काव्या., 1.7
49 काव्या.रु., ४

भामहस्तु वैयाकरणानामुपासनामपि कर्तुं प्रेरयति -

शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।
विलोक्यान्यनिबन्धाँश्च कार्यः काव्यक्रियादरः
सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।
विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते॥[50]

काव्यप्रकाशे मम्मटोऽपि प्रयोजनकारिकायां शिवेतरक्षतये इति लिखति।

ऊहः - वेदेषु न सर्वैर्लिङ्गैर्न च सर्वाभिर्विक्तिभिर्मन्त्रा निगदिताः। अतो व्याकरणज्ञानेन यथायथं ते विपरिणमयितव्याः। ऊहः काव्येऽपि महत्त्वं विभर्त्ति। अन्योक्तौ साम्प्रतिके बिम्बप्रधाने काव्ये चोहं विनार्थगतिरेव न भवति। प्राक्तनेष्वऽपि काव्येषु नाटकेषु च तदवस्थितिः विद्यते यथा उत्तररामचरिते 'तामेव शान्तमथवा किमतः परेण' अत्र रामः सीतां परित्यक्तवानिति ऊहत एव ज्ञायते। तामेवेत्यनेनोहो भवति।

आगमः- अत्र महाभाष्यकारः ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। इति समुद्धृत्य वेदाङ्गेषु प्रधानत्वं व्याकरणस्य प्रतिपादयति। काव्यशास्त्राचार्यैरपि वेदज्ञानं कवयेऽनिवार्यं मन्यते। यथाह राजशेखरः -

श्रुतीनां साङ्गशाखानामितिहासपुराणयोः।
आर्षग्रन्थः कथाभ्यासःकवित्वस्यैकमौषधम्॥
वेदार्थस्य निबन्धेन श्लाघ्यन्ते कवयो यथा।
स्मृतीनामितिहासस्य पुराणस्य तथा तथा॥[51]

द्वितीये चाध्याये कथयति - शास्त्रपूर्वकत्वात्काव्यानां पूर्वं शास्त्रेष्वभिनिविशेत। नह्यप्रवर्तितप्रदीपास्तमसि तत्त्वार्थसार्थमध्यक्षयन्ति। अत्रैव अपौरुषेयवाङ्मयस्य सङ्केतोऽप्यकारि राजशेखरेण। महाकाव्येष्वपि वेदादिसन्निवेशं महाकवयो वाञ्छन्ति। तद्यथा नैषधकारः श्रीहर्षः -

मध्ये श्रुतीनां प्रतिवेशिनीनां सरस्वती वासवती मुखे नः।
ह्रियेव ताभ्यश्चलतीयमद्धा पथान्न संसर्गगुणेन नद्धा॥[52]

---

50 काव्या.भा., 1.10-11

51 का.मी., 8.11,13

52 नैष., 3.65

भवभूतिरुत्तररामचरिते लिखति वाल्मीकिविषये - प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय।[53]

लघु - लघ्वर्थं चाध्येयं व्याकरणम्, ब्राह्मणेनावश्यं शब्दा ज्ञेया इति महाभाष्यकारः। श्रीहर्ष: नैषधीये कथयति -

अये! ममोदासितमेव जिह्वया द्वयेऽपि तस्मिन्ननतिप्रयोजने।
गरौ गिरः पल्लवनार्थलाघवे मितं च सारं च वचो हि वाग्मिता॥[54]

माघोऽपि शिशुपालवधे -

यावदर्थपदां वाचमेवमादाय माधवः।
विरराम महीयांसः प्रकृत्या मितभाषिणः॥[55]
सङ्क्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः
सुविस्तरतरा वाचो भाष्यभूता भवन्तु ते॥[56]

महाकविकालिदासोऽपि रघुवंशिनो गुणवर्णने कथयति - सत्याय मितभाषिणाम्, एवं भाष्यकारमतमन्वितं विभाति।

असन्देहः - स्वरादिज्ञानेन शब्दस्यार्थो वेदवाक्येषु ज्ञायते। एवं तर्हि लौकिकसंस्कृतेऽपि विभक्तिप्रत्ययादीनां सम्यक् ज्ञानेन संदेहनिवारणं भवति। यथोक्तं -

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसदान्मयाऽच्युत!।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥[57]

यद्यपि सत्यमिदं यत् महाभाष्ये प्रोक्तानि प्रयोजनानि, विशेषतो व्याकरणज्ञानदिशा प्रतिपादितानि किन्तु भाषया काव्यरचना भवति, अतः काव्यदिशा तेषामन्वर्थता वरीवर्ति। अतोऽत्र काव्यशास्त्रकाव्ययोर्दिशाऽपि विवेचनमत्र प्रस्तुतीकृतम्। उक्तेन विवेचनेन सिद्ध्यति यत्काव्याधिकरणं वाक्, काव्यशास्त्रं काव्यं च ज्ञातुं कर्तुं च व्याकरणज्ञानं नितरामपेक्षितम्।

---

53 उ.रा., 2.5, p. 55
54 नैष., 9.8
55 शिशु., 2.13
56 शिशु., 2.24
57 गीता., 18.73

## शब्दसंकेत

1. अग्नि. - अग्निपुराणम्
2. अभि. - अभिज्ञानशाकुन्तलम्
3. अष्टा. - अष्टाध्यायी
4. उ.रा. - उत्तररामचरितम्
5. ऋ. - ऋग्वेदः
6. का.प्र. - काव्यप्रकाशः
7. का.मी. - काव्यमीमांसा
8. काव्या. - काव्यादर्शः
9. काव्या.भा. - भामहकाव्यालङ्कारः
10. काव्या.रु. - रुद्रटकाव्यालङ्कारः
11. गीता. - श्रीमद्भगवद्गीता
12. ध्व.लो. - ध्वन्यालोकः
13. न.का.मी. - नव्यकाव्यमीमांसा
14. ना.शा. - नाट्यशास्त्रम्
15. नैष. - नैषधीयचरितम्
16. पद. - पदमञ्जरी
17. बा.रा. - बालरामायणम्
18. वा.प. - वाक्यपदीयम्
19. बृ. - बृहदारण्यकः
20. शिशु. - शिशुपालवधम्

## सन्दर्भग्रन्थसूची

1. अग्निपुराणम्, सम्पा. हरि नारायण आप्टे, आनन्दाश्रममुद्रणालय, १९००
2. अभिज्ञानशाकुन्तलम्, एम्. आर्. काले (सम्पा.), मोतीलाल बनारसीदास, दिल्ली, १९६९
3. उत्तररामचरितम्, संशो. टी.आर.रत्नम् ऐयर्, निर्णयसागर प्रेस, मुम्बाई, १९२५
4. ऋग्वेद, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००६
5. काव्यमीमांसा मधुसूदनीविवृतिसहिता, मधुसूदन मिश्र (सम्पा.), चौखम्बा संस्कृत सिरीज, बनारस, १९९१
6. दण्डिना विरचितः काव्यादर्शः, पं. रंगाचार्य शास्त्री (सम्पा.), भण्डारकर ओरिएण्टल रिसर्च इन्स्टिट्युट्, पूना, १९३८
7. नैषधीयचरितम्, श्रीहर्षविरचित, पं. शिवदत्तशर्मा (सम्पा.), निर्णयसागर प्रेस, मुम्बाई, १९४२
8. पाणिनिविरचिता अष्टाध्यायी, परिष्कर्ता श्रीगोपालदत्तशास्त्री, श्रीगोपालदत्तपाण्डेयः (सम्पा.), चौखम्बा सुरभारती प्रकाशन ग्रन्थमाला, २०१७
9. राजशेखरप्रणीतं बालरामायणम्, सम्पा. गोविन्द देव शास्त्री, मेडिकल हाल प्रेस, वाराणसी, १८६९
10. रुद्रट काव्यालंकार, हिन्दीव्याख्या - डा. सत्यदेव चौधरी, वासुदेव प्रकाशन, दिल्ली, १९९५
11. वाक्यपदीयम्, भर्तृहरि, रघुनाथशर्मप्रणीत - अम्बाकर्त्रीव्याख्यासहितम्, वाराणसेयसंस्कृतविश्वविद्यालय, वाराणसी, १९६३
12. बृहदारण्यकोपनिषत्, महादेव चिमणजी आप्टे (सम्पा.), आनन्दाश्रममुद्रणालय, १८९१

13. शिशुपालवधम्, माघ, पं. दुर्गाप्रसाद (सम्पा.), निर्णयसागर प्रेस, मुम्बाई, १९३३

14. श्रीभामहविरचित काव्यालंकार, देवेन्द्रनाथ शर्मा (भाष्य.), बिहार राष्ट्रभाषा परिषद्, पटना, १९८५

15. श्रीमदानन्दवर्धनाचार्यप्रणीतो ध्वन्यालोकः, पं. दुर्गाप्रसाद (सम्पा.), निर्ण-यसागर प्रेस, मुम्बाई, १९२८

16. श्रीमद्भगवद्गीता, विनायक गणेश आप्टे (सम्पा.), आनन्दाश्रममुद्रणालय, १९३९

17. श्रीमम्मटभट्टविरचितः काव्यप्रकाशः, विनायक गणेश आप्टे (सम्पा.), आनन्दाश्रममुद्रणालय, १९२९

✿✿✿

# काव्यशास्त्रे व्याकरणस्य सन्दर्भः

रामलखनपाण्डेयः

व्याकरणं नाम सर्वशास्त्रमूर्धन्यं सर्वविद्याव्यवस्थापकं चेति विदितमेव। काव्यस्य गणना शास्त्रेषु न भवति। तथापि काव्ये सर्वाण्यपि शास्त्राणि प्रवर्तन्ते। काचिदपि विद्या शास्त्रीयां मर्यादां नोल्लङ्घयति। अन्यविद्या इव साहित्यविद्याऽपि शास्त्रीयं स्वारस्यं नूनमावहति। किन्तु तानि तानि शास्त्राणि साहित्ये प्रकारान्तरेण कविसहृदयानुकूलेन काव्यात्मकेन वा पथा प्रवर्तन्ते। सामान्यतस्तु व्याकरणस्य सांस्कारिकं संविधानं साहित्येऽपि स्वीकृतमेव। किन्तु व्याकरणेन साहित्यस्य यो हि विशिष्टः सम्बन्धस्तत्र कश्चन नूतनः प्रकारः प्रेक्ष्यते।

वैयाकरणाः शब्दनित्यत्ववादिनः सन्ति। साहित्यिकास्तत्र शब्दस्य व्यावहारिकं स्वरूपमेव स्वीकुर्वन्ति। कथं तेन व्यवहारेण परमार्थः सिद्ध्यतीति प्रश्ने सति ते शब्दार्थयोः साहित्यं पुरस्कुर्वन्ति। शब्दब्रह्मवादिनां वैयाकरणानां मतेन शब्दातिरिक्तस्यार्थस्य पृथक् सत्तैव सम्भवति। साहित्यिकाः शब्दस्यार्थस्य चेति द्वयोरपि पृथक् पृथक् सत्तामङ्गीकृत्य पुनस्तयोर्द्वयोरपि सहभावं साधयन्ति। तेन च तयोः सहभावेन सम्पूर्णोऽपि परमार्थः सुतरामेव सिद्ध्यति।

भारतीया संस्कृतिः केवलं लैकिकेन स्वरूपेण न सन्तुष्यति, पारलौकिकं सहास्तित्वमपि तत्र नितान्तमपेक्षितं भवति। भारतीयशास्त्रेषु तस्मादेव नित्यानित्यविवेकः प्रवर्तते। विनश्वरं जगद् यावदविनश्वरेण ब्रह्मणा न युज्यते तावन्नास्ति कल्याणम्। व्याकरणे शब्दब्रह्मणः सिद्धिः स्फोटवादेन क्रियते। स्फोटस्य शब्दनिष्ठत्वं व्यङ्ग्यत्वं च व्याकरणस्याभीष्टम्। किन्तु साहित्ये स स्फोटः कथमपि नैव स्वीक्रियते। साहित्यशास्त्रस्य पितामहो भामहाचार्यः कथयति -

शपथैरपि चादेयं वचो न स्फोटवादिनाम्।
नभःकुसुममस्तीति श्रद्दध्यात् कः सचेतनः॥[1]

व्याकरणस्य सन्दर्भमादाय आलङ्कारिकपितामहस्य भामहाचार्यस्य स्फोटविषयकं यदिदं शपथपूर्वकं वचनं तदतीव गभीरं प्रतिभाति। स्फोटवादिनः शब्दस्य नित्यतां शब्देनैव साधयन्ति। तत्र प्रत्यक्षं किमपि प्रमाणं नास्ति। अनुमानं प्रमाणमपि नास्ति। शब्देनैव प्रमाणेन शब्दस्य नित्यता साध्यते। आत्माश्रयो दोषस्तत्र निपतति। अनित्यः शब्दः नित्यं शब्दं स्फोटयतीति केन प्रत्यक्षीकृतम्। अनुमातुमपि तथा न शक्यते। शब्दः स्वस्य नित्यतां साधयितुं तथा करोतीति कथनमपि

[1] काव्या.भा., 6/12

विश्वासयोग्यं नास्ति। तथात्वे सति शब्दस्य शक्तिरेव तावद्विचारणीया। शक्तिश्च कस्मिन् शब्दे नित्ये वाऽनित्ये वा? अनित्यः शब्दः कामपि शक्तिं विना निजां नित्यतां कथं गमयति? शक्तिस्वीकारे पुनरनित्येन नित्यता नाभिधातुं युज्यते। अभिधा सङ्केतं विना न प्रवर्तते। मुख्यार्थबाधाभावाल्लक्षणापि न सम्भवति। व्यञ्जना सम्भवति। अनित्यः शब्दः नित्यं शब्दं व्यञ्जयतीति वक्तुं शक्यते। किन्तु शब्देन शब्दस्य व्यञ्जना भवति चेच्छब्देन अर्थस्य व्यञ्जनापि सम्भवति। तर्हि व्यावहारिकेनैव शब्देन पारमार्थिकस्यार्थस्य व्यञ्जनापि सम्भवत्येव। शब्देन शब्दो व्यज्यते। चेदर्थेनार्थोऽपि व्यज्येत। तेन व्यवहारः परमार्थं व्यञ्जयितुं शक्नोत्येव। तत्को लाभः स्फोटवादेन। तदुक्तं तत्रैव भामहेन -

तस्मात् कूटस्थ इत्येषा शाब्दी वः कल्पना वृथा॥[2]

किन्तु स्फोटवादस्य वृथात्वं भामह एव वक्तुं शक्नोति। ध्वनिवादिनस्तु स्फोटेन स्वात्मानं सर्वथैव समुपकृतं मन्यन्ते। ध्वनिमार्गस्य प्रतिष्ठापको मम्मटाचार्यः काव्यप्रकाशे कथयति- "बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतस्ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य" इति। तदेवं वैयाकरणानां स्फोटसिद्धान्तस्य कारणादेव साहित्यशास्त्रे ध्वनिसम्प्रदायस्य प्रादुर्भावो जातः। स्फोटसिद्धान्ते व्यङ्ग्यव्यञ्जनभावरूपा या दिक् प्रकटिता, तमेव दिङ्निर्देशं समधिकृत्य कवीनां ध्वनिमार्गः प्रवर्तते।

शाब्दिकीं व्यञ्जनां विना स्फोटसिद्धिर्न सम्भवति। स च स्फोटः यत्प्रयोजनमुद्दिश्य प्रवर्तते, तदेव प्रयोजनं काव्ये स्फोटं विनैव व्यञ्जनावृत्तिमधिकृत्य ध्वनिवादिभिः सुखेन साध्यते। साहित्यिके जगति व्याकरणस्य एष महानेव सन्दर्भः। ध्वनिरिति व्याकरणेऽपि व्यवहृतः, व्यवह्रियते। किन्त्वनयोर्मध्ये महदन्तरं वर्तते। वैयाकरणानां ध्वनिः प्रारम्भिकः वैखरीभूतः अपार्थ इव वर्तते, किन्तु साहित्यिकानां ध्वनिः पार्यन्तिकः परमार्थभूतश्च वर्त्तते। अत एव वैयाकरणाः ध्वनिवादिनो न भवन्ति। ध्वनिवादिनस्तु साहित्यिका एव कथ्यन्ते। वैयाकरणैरपदार्थ इव परित्यक्तो ध्वनिः साहित्यिकैः परमार्थतया स्वीकृतः। तथापि साहित्यजगति ध्वनिमार्गस्य प्रवर्तने यत्किमपि श्रेयः, तेन श्रेयसा व्याकरणस्य स्फोटसिद्धान्त एव श्रेयवान् भवतीति निर्विवादम्।

काव्यालङ्काराकारस्तत्रभवान् भामहाचार्यः स्फोटसिद्धान्तं तिरस्कुर्वन्नपि व्याकरणशास्त्रं सदैव श्रद्दधाति। व्याकरणेष्वपि पाणिनीयं व्याकरणं सः प्रमाण-

2 काव्या.भा., 6/11

तया पुरस्करोति[3]। पाणिनीयव्याकरणं व्याकरणातिरिक्तानां सर्वासामपि विद्यानामाश्रयो वर्तते। अन्यासां विद्यानमर्थजातैः सह पाणिनीयव्याकरणस्य कश्चिदपि विरोधो नास्ति। सर्वेऽपि विद्यावन्तो निर्विवादतया पाणिनीयव्याकरणस्य प्रामाण्यं स्वीकुर्वन्ति। भामहीयकाव्यालङ्कारस्य तत्पद्यं तावदुदाहरामि -

विद्यानां सततमपाश्रयोऽपरासां
तासूक्तान् न च विरुणद्धि कांश्चिदर्थान्।
श्रद्धेयं जगति मतं हि पाणिनीयं
माध्यस्थाद् भवति न कस्य यत्प्रमाणम्॥[4]

एकतस्तु भामहो व्याकरणस्य दुर्गाधतां कदाचिद्भयङ्करतामपि वदति[5], अपरतश्च तस्य सततमपरिहार्यतामपि निगदति -

सूत्राम्भसं पदावर्त्तं पारायणरसातलम्।[6]

धातूणादिगणग्राहं ध्यानग्रहबृहत्प्लवम्॥
धीरैरालोकितप्रान्तममेधोभिरसूयितम्।
सदोपभुक्तं सर्वाभिरन्यविद्याकरेणुभिः॥
नापारयित्वा दुर्गाधममुं व्याकरणार्णवम्।
शब्दरत्नं स्वयङ्गम्यमलङ्कर्तुमयं जनः॥
तस्य चाधिगमे यत्नः कार्यः काव्यं विधित्सता॥[7]

भामहो व्याकरणस्य शब्दसाधुत्वं समर्थयन्नपि काव्योचितशब्दसाधुत्वं समधिकतया प्रतिपादयति। व्याकरणस्य शब्दसाधुत्वं शब्दमात्रपरिच्छिन्नं भवति, काव्यस्य च शब्दसाधुत्वं तदर्थेन सहकृतं भवति। अथवा व्याकरणस्य शब्दसाधुत्वं काव्येषु सामान्यतयैव गृह्यते, तद्गतः विशेषस्तु साहित्ये स्वकीय एव। व्याकरणस्य शब्दसाधुत्वं काव्ये शब्दार्थसाधुत्वं भूत्वा विलसति। तदुक्तं ध्वनिकृता "यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवे" रिति। व्याकरणेन सुसाधिताः सर्वेऽपि

[3] काव्या.भा., 4.22, 6.21,63
[4] काव्या.भा., 6.63
[5] काव्या.भा., 6.2, 27,62
[6] पदावर्तं वार्तिकम्, परायणं महाभाष्यमिति केचित्
[7] काव्या.भा., 6.1-4

शब्दाः काव्ये प्रयोक्तुं योग्याः न भवन्ति। एवंविधानि कतिपयान्युदाहरणान्यपि भामहेन काव्यालङ्कारस्य शब्दशुद्धिसंज्ञके षष्ठे परिच्छेदे प्रदत्तानि। अप्रयुक्तस्य, दुर्बोधस्य, अपेशलस्य, ग्राम्यस्य, अश्लीलस्य, अपार्थस्य, अप्रसिद्धार्थस्य अपाणिनीयस्य च शब्दस्य प्रयोगस्तत्र निषेधितः[8]। 'सर्वथा पदमप्येकं न निगाद्यमवद्यवद्' इत्युक्त्वा भामहः काव्योचितशब्दचयनविषये मालाकारस्योदाहरणं प्रस्तौति -

एतद् ग्राह्यं सुरभिकुसुमं ग्राम्यमेतन्निधेयं
धत्ते शोभां विरचितमिदं स्थानमस्यैतदस्य।
मालाकारो रचयति यथा साधु विज्ञाय मालां
योज्यं काव्येष्वहितधिया तद्वदेवाभिधानम्॥[9]

मन्ये भामहानुसारेण शब्दाः रत्नानि सन्ति। अर्थाश्च पुष्पाणि सन्ति। तयोश्चैकीकरणादलङ्काराः प्रवर्तन्ते। रत्नानां रत्नत्वं तदेव यदलङ्कारतया तदुपस्थितिः। अलङ्कृतिरिति भिन्नैव सृष्टिः। सुपां तिङाञ्च व्युत्पत्तिरेव नालङ्कृतिः। अलङ्कृतिः यथा शब्दसाध्या तथैवार्थसाध्यापि। वस्तुतो व्याकरणिकशब्दसाधुत्वस्वीकारानन्तरं यदा काव्ये काव्यात्मकशब्दसाधुत्वंप्रवर्तते तदा काव्योचितशब्दसाधुत्वेन सहैव काव्योचितस्य अर्थसाधुत्वस्य स्वयमेव प्रादुर्भावो भवति। यतो हि अर्थविचारं विना काव्योचितस्य शब्दस्य चयनमेव न सम्भवति। "द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः" इत्यादिस्थलेषु पिनाक्यादिशब्दसद्भावेऽपि कपाल्यादिशब्दचयनं तत्र विचारणीयम्। तेन काव्ये अर्थस्य पृथगेव सत्ता निर्धार्यते। व्याकरणे अर्थस्य पृथक् सत्ता नास्ति। तत्र तु साधुशब्दव्युत्पत्तिरेव सर्वङ्कषा भवति काव्यानुकूला अर्थव्युत्पत्तिस्तत्र नास्ति। इदमेव कारणं यत्काव्ये शब्दार्थयोः पृथक् पृथक् स्वातन्त्र्यं स्वीकृत्य पुनस्तयोः सहभावः साध्यते। तदुक्तं भामहेन -

रूपकादिमलङ्कारं बाह्यमाचक्षते परे।
सुपां तिङाञ्च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिं॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयन्तु नः॥[10]

अतएव 'शब्दार्थौ सहितौ काव्य'मिति काव्यलक्षणमुच्यते। मम्मटोऽपि

8 अत्र अपाणिनीयेति सामान्येन ग्रहणम्
9 काव्या.भा., 1/59
10 काव्या.भा., 1.14-15

भामहस्येदं काव्यलक्षणं सर्वथा स्वीकरोति। तत्र च शब्दार्थयोः स्वातन्त्र्येण सहैव तयोर्यत्साहित्यं तत्कालिदासेन पार्वतीपरमेश्वरयोः सम्पृक्तिमुदाहृत्य सुस्पष्टीकृतम् -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥[11]

सम्पृक्तिर्नाम द्वयोः स्वतन्त्रसत्तात्वे सति सम्बन्धातिशयविशेषः। शब्दार्थयोः पार्थक्यं विना शब्दार्थयोः साहित्यं न सम्भवति। पण्डितराजः शब्दमात्रं काव्यं यदुवाच तत्र कापि सूक्ष्मेक्षिका देया। पण्डितराजः काव्यस्वरूपदर्शने शब्दमात्रतां समर्थयन्नपि शब्दार्थयोः प्रतिपाद्यप्रतिपादकभावसम्बन्धं स्वीकरोति। अथ च तयोस्तमेव सम्बन्धविशेषं स रमणीयतया ख्यापयति। रमणीयतायां शब्दार्थयोः सम्पृक्तिं ये न पश्यन्ति, ते रसगङ्गाधरं शिरसि धृत्वापि कूपे पतन्ति। रमणीयता चेदर्थमात्रस्य विशेषणं, किमर्थं शब्द एव काव्यस्य सर्वस्वमित्युच्येत।

साहित्यविद्या वस्तुतः शास्त्राणां पारस्परिकं विवादं परिहृत्य तेषां संवादं साधयितुं चेष्टते। व्याकरणशास्त्रं शब्दपरायणं दृष्ट्वा न्यायशास्त्रं चार्थपरायणं विलोक्य साहित्यविद्या यदि तयोः विवदमानयोः शब्दार्थयोः सहभावं साधयति, किमितः परं सौभाग्यं वाङ्मयस्य। सम्पूर्णमपि वाङ्मयं प्रकारान्तरेण द्विधा विभक्तं भवति काव्यं शास्त्रं चेति। काव्य-शास्त्रयोः पारस्परिकं सम्बन्धं द्रढयितुं कृतं शास्त्रं काव्यशास्त्रमित्युच्यते। इदं काव्यशास्त्रं यद्यपि स्वतन्त्रं किमपि शास्त्रं नास्ति, तथापि विख्यातानि सर्वाण्यपि शास्त्राणि काव्ये प्रवर्तयितुं केवलं काव्यशास्त्रमेव सामर्थ्यमावहति। तेन काव्यं काव्यशास्त्रं वा व्याकरणादिसर्वविद्याप्रकाशकं कथ्यते। साहित्यदर्शने चापि न्यायादीनि दर्शनानि स्वयमन्तर्भवन्ति। तेन साहित्यवर्त्मनि वाङ्मयं त्रिधा विभक्तं भवति काव्यं, काव्यशास्त्रं, काव्यदर्शनं चेति। अथवा दर्शनमपि शास्त्रमेवेति द्वैविध्यमेव वरम्।

काव्ये काव्यशास्त्रे च यो हि विवेकः सोऽपि लेखेऽस्मिन् वक्तव्य एव। काव्यमेव शास्त्रं न भवति, अपितु काव्यस्य शास्त्रं भवति, अर्थात् काव्यानुशासनत्वेन काव्यशास्त्रमिति बोद्धव्यम्। काव्यस्य काव्यशास्त्रस्य च परस्परमङ्गाङ्गिभावोऽपि स्वीक्रियते। काव्यमङ्गीभूतं, शास्त्रं चाङ्गभूतमिति काव्यशास्त्रयोरङ्गाङ्गिभावेन काव्यशास्त्रमिति समस्तपदस्य निर्वचनं भवति। काव्यशास्त्रे च शास्त्रत्वस्य यत्प्राधान्यं तदुत्तरप्राधान्येन तत्र युज्यते। तस्मिन् काव्यशास्त्रे व्याकरणादिना तदतिरिक्तानि सर्वाण्यपि शास्त्राणि यथायथं गर्भितानि भवन्ति। तदुक्तं पारस्परिकैः साहित्यिकैः - **"साहित्यं सर्वशास्त्राणां सरसं प्रतिपादनम्"** इति।

[11] रघु., 1.1

एवम्प्रकारेण साहित्यशास्त्रं सर्वशास्त्रनिष्यन्दभूतं कथ्यते। व्याकरणस्य सन्दर्भमादाय तदेतद्रहस्यं किञ्चिदाविष्कृतम्। तदपि केवलं भामहस्य मतेन ध्वनिवादिनां च मतेन। व्याकरणस्य शब्दनिष्ठा भामहस्य कृते शब्दार्थनिष्ठा भवति। व्याकरणस्य प्राथमिको ध्वनिश्च ध्वनिसम्प्रदाये परमार्थिको ध्वनिर्भूत्वा विलसति।

**शब्दसंकेत**

1. काव्या.भा. - भामहकाव्यालंकारः
2. रघु. - रघुवंशम्

**सन्दर्भग्रन्थसूची**

1. रघुवंशम् मल्लिनाथकृतसंजीवनीसमेतम्, काशीनाथ पाण्डुरंग परब (सम्पा.), निर्णयसागर प्रेस, मुम्बाई, १८८६
2. श्रीभामहविरचित काव्यालंकार, देवेन्द्रनाथ शर्मा (भाष्य.), बिहार राष्ट्रभाषा परिषद्, पटना, १९८५

✿✿✿

# पाणिनीयव्याकरणं संस्कृतकाव्यशास्त्रञ्च

हरिदत्त शर्मा

संस्कृत-काव्यशास्त्रं यथा भारतीयदर्शनस्य विभिन्नैः सिद्धान्तैः प्रभावितम्, तथैवेदं व्याकरणशास्त्रस्यापि प्रचुरं प्रभावं बिभर्ति। व्याकरणं हि मूलं सर्वशास्त्राणाम्। काव्यशास्त्रीयेषु ग्रन्थेषु प्रथमतया अभिधादीनां शब्दशक्तीनां यद् विवेचनं विहितम्, तत्र शाब्दबोधविचारणासन्दर्भे, पदवाक्यादीनां लक्षणस्य विचारे, सङ्केतग्रहस्य साधनानां विषयाणां च विमर्शे सर्वत्र व्याकरणशास्त्रस्य विषयविवेचनमपेक्ष्यते। ध्वन्यालोके ध्वनिलक्षणसन्दर्भे आचार्यानन्दवर्धनेन सम्यक् प्रतिपादितम् - "प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्।"[1]

इदमेव ध्वनिसिद्धान्ते ध्वनिशब्दप्रयोगस्य मूलं याति प्रथमं वैयाकरणैरेव प्रधानभूतस्फोटरूप-व्यङ्ग्य-व्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। ततस्तन्मतानुसारिभिः ध्वनिप्रस्थापनपरैराचार्यैः न्यग्भावितवाच्य-व्यञ्जनक्षमस्य शब्दार्थयुगलस्य। वैयाकरणैः स्फोटस्य व्यञ्जकः ध्वनिः मन्यते। आनन्दवर्धनाचार्येण वैयाकरणानां ध्वनेः व्यञ्जकतामाश्रित्य ध्वनिपदस्य प्रयोगः स्वीकृतः। उक्तं च तेन-

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥[2]

ध्वनिशब्दस्यापि आचार्येण अभिनवगुप्तेन व्याकरणशास्त्रव्युत्पत्तिमाश्रित्य एव 'ध्वनतीति ध्वनिः', 'ध्वन्यते इति ध्वनिः', 'ध्वननं ध्वनिः' इत्यादीनि ध्वनिनिर्वचनानि निरूपितानि। यथा ध्वनेस्तथा रसशब्दस्यापि निर्वचनं कृतमाचार्यैः। साहित्यदर्पणे विश्वनाथेन 'वाक्यं रसात्मकं काव्यम्'[3] इति काव्यं लक्षयता 'रस्यते इति रसः' इति व्युत्पत्तियोगः प्रतिपादितः। नाट्यशास्त्रे भरतमुनिः भावानां प्रसङ्गे व्याकरणगतव्युत्पत्तिदृष्ट्या प्रश्नमुत्थापयति - "किं भवन्तीति भावाः किं वा भावयन्तीति भावाः"[4], पुनश्च नाट्यप्रसङ्गे सः णिजन्तं व्युत्पत्तिमेव साधीयसीं मनुते। नाट्य-काव्य-साहित्य-रीति-वृत्त्यलङ्कारादयः सर्वे पारिभाषिकाः शब्दा व्याकरणगतव्युत्पत्तिसाध्या एव काव्यशास्त्रे प्रयुज्यन्ते। नाट्यशास्त्रे अभिनयविवेचनप्रकरणे वाचिकाभिनयं व्याचक्षाणो भरतः 'वाग् हि सर्वस्य कारणम्' इति मूलत्वेन पाणिनीयव्याकरणमाधारीकृत्य एव वाचिकाभिनयं विवृणोति -

---

1. ध्व.लो., 1/13 वृत्तिभागः (पृ. 242 मो.ब.सं.)
2. तदेव 1/13
3. सा.द., 1/3
4. ना.शा., अ.1 पृ. 183 (मधुसूदनीटीका)

आगमनामाख्यातनिपातोपसर्गसमासतद्धितैर्युक्तः ।
सन्धिवचनविभक्त्युपग्रहनियुक्तो वाचिकाभिनयः ॥[5]

तदनन्तरम् अचार्यः संस्कृत-वर्णमाला-विभागं विशदीकृत्य शब्द-स्वर-व्यञ्जन-नामाख्यातोपसर्ग-निपात-प्रत्यय-तद्धित-विभक्ति-सन्धि-पदादीनां शब्दानां पाणिनीयव्याकरणसम्मतां व्युत्पत्तिमर्थं च कारिकाभिः प्रकाशयति। अतः वागभिनयस्य समग्रं शास्त्रं पाणिनीयव्याकरणशास्त्रमेवाश्रित्य अग्रे सरति। भावप्रकाशने निजग्रन्थे आचार्यः शारदातनयः भावशब्दस्य व्याकरणसङ्गतां व्युत्पत्तिमित्थं प्रस्तौति -

भावः स्यात् भावनं भूतिरथ भावयतीति वा।
पदार्थो वा क्रिया सत्ता विकारो मानसोऽथवा ॥[6]

शृङ्गारप्रकाश इत्यभिहिते बृहति काव्यशास्त्रीये ग्रन्थे आचार्यो भोजराजः प्रथमं शब्दप्रकरणं विवृणोति। स आदिषु षट्सु प्रकाशेषु पाणिनीय व्याकरणमाधृत्य एव शब्दस्य विस्तृतां व्याख्यां प्रस्तौति। प्रकाशानां नामान्यपि व्याकरणाधृततया क्रमशः प्रकृत्यादिप्रकाशात्मा, प्रातिपदिकप्रकाशः, प्रकृत्यादिशब्दप्रकाशः, क्रियाद्यर्थचतुष्टयप्रकाशः, विभक्त्यर्थादिचतुष्टयप्रकाशः इत्यादिरूपेण कृतानि। शब्दस्य प्रकृतिं प्रतिपादयन् आचार्यः कथयति - "शब्दार्थभावनायां प्रत्ययात् प्रथममुपादानकारणमिव योपादीयते तां प्रकृतिरिति व्यपदिशन्ति। सा त्रिधा - धातुरूपा, प्रत्ययरूपा, प्रातिपदिकरूपा च।"[7]

पुनरिमां त्रिविधामपि प्रकृतिं प्रत्येकं स षोढा विभजति, यथा प्रत्ययरूपां प्रकृतिं स सुप्-तिङ्-कृत्-तद्धित-धातुप्रत्यय-स्त्रीप्रत्यय-भेदात् षट्-प्रकारं स्वीकरोति। तथैव धातुरूपां प्रातिपदिकरूपां प्रकृतिञ्चापि स षोढा विभजति। पुनः ता अपि भेद-प्रभेदैः व्याकुर्वन् आचार्यः नैकानि रूपाणि प्रस्तौति। यथा तदन्तर्गतस्य कृदन्तस्य षड् भेदान् निरूपयन् स कथयति - "कृतः षड् भाषायाम्। ते तु कृतः क्रियारूपाः, क्रियाफलरूपाः, क्रियाविशेषणरूपा, क्रियावधिरूपाः, क्रियाकर्मरूपाः, क्रियावयवरूपाश्च भवन्ति"[8]। विशेषेण ध्यातव्यमिदं तथ्यमाश्चर्यकरञ्च यत् शृङ्गारप्रकाशस्य आदिभागभूताः षट् प्रकाशाः साहित्यशास्त्रीयग्रन्थत्वेऽपि पूर्णतः अष्टा-

5 ना.शा., अ.1 पृ. 183 (मधुसूदनीटीका)
6 भा.प्र., 1/12
7 शृं.प्र., 1 , पृ. 4, डा. रेवाप्रसाद द्विवेदी
8 शृं.प्र., भा.प्र., 1 पृ. 38

ध्याय्यनुसरणपराः, परं मौलिकव्याकरणसिद्धान्तानां प्रतिपादका इत्यतो व्याकरणशास्त्रानुगामिता साहित्यशास्त्रस्य।

ध्वनिप्रस्थानस्य प्रस्थापकेन आनन्दवर्धनेन ध्वन्यालोके असंलक्ष्यक्रमव्यङ्ग्यध्वनेर्द्योतकत्वं यत् प्रतिपादितं, तत् समग्रतया व्याकरणपथानुगामित्वमेव दधाति। अस्मिन् विषये कृता कारिका अधोलिखिता वर्तते -

सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः।
कृत्तद्धित-समासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्॥[9]

नूनं काव्येषु सुब्विशेषैः, तिङ्विशेषैः, वचनविशेषैः, सम्बन्धविशेषैः, कारकशक्तिभिः, कृद्विशेषैः, तद्धितविशेषैः, समासविशेषैः, निपातोपसर्गकालादिभिः प्रयुक्तैः ध्वनेरात्मा रसादिरभिव्यज्यमानो दृश्यते। तत्कृते सर्वोत्तममुदाहरणम् उदाहृतं यथा -

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।
धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥[10]

अत्र 'मे' इति पदे एकवचनविभक्तेर्व्यञ्जना यद् जगत्येकवीरस्य लोकोत्तरपराक्रमशालिनो मेऽपि अरयः, अत्र बहुवचनप्रयोगः मम शत्रुसद्भावः असम्भवः इति सम्बन्धानौचित्यं व्यनक्ति। 'तत्रापि' शब्देन निपातसमुदायेन अत्यन्तासम्भवमनियत्वं व्यज्यते। 'तापस' इत्यत्र मत्वर्थीयस्याण्-प्रत्ययस्य प्रयोगात् रामस्य दीनत्वं, पुरुषार्थहीनत्वं, क्षीणदेहत्वं, क्षुद्रयतित्वञ्च व्यज्यन्ते। 'असौ' पदेन रामस्य हीनावस्थाया अतिशयिता द्योत्यते। 'रावयतीति रावणः' इत्यनेन रावणस्य त्रैलोक्यपीडाकरत्वं द्योत्यते। 'सोऽप्यत्रैव' इत्यत्र अव्ययद्वयप्रयोगेण रावणस्य अमर्षोत्कर्षो व्यञ्जितः। 'इन्द्रजित्' इति पदे भूतकालिकक्विप्-प्रत्ययप्रयोगे मेघनादस्य इन्द्रविजये अनास्था सूच्यते। 'उच्छूनैः' नैः इति कृदन्तप्रयोगे निरादरसूचकत्वं, ग्रामटिके'ति स्वार्थिकतद्धितप्रयोगस्य स्त्रीप्रत्ययसहितस्य अबहुमानास्पदत्वं प्रति, 'विलुण्ठन'शब्दे विशब्दस्य निर्दयावस्कन्दनं प्रति, 'वृथा'शब्दस्य निपातस्य स्वात्मपौरुषनिन्दां प्रति तथैव 'भुजै'रिति बहुवचनेन भुजानां भारमात्रत्वं प्रति व्यञ्जकत्वम्। अत्र यद् व्यञ्जकभूयस्त्वं घटमानं दृश्यते, तत् सर्वं व्याकरणगतचमत्कारचमत्कारितमेव वर्तते इत्याहो

[9] ध्व.लो., 3/16
[10] सा.द., प्रथमपरिच्छेदः, पृ. 7

व्याकरणप्रयोगविशेषसमाश्रितं सकलं व्यञ्जनाविहितसौन्दर्यम्। एषां सर्वेषां व्याकरणतत्त्वानां पृथक् पृथग् उदाहरणानि नैकानि ध्वन्यालोके सम्यगुपन्यस्तानि।

ध्वनिसिद्धान्तस्य प्रत्युत्तररूपेण विकासमाप्ते वक्रोक्तिसिद्धान्तेऽपि व्याकरणसम्बन्धिभिः बहुभिः प्रयोगैः वक्रतायाः प्रदर्शनं जातम्। स्वकीये वक्रोक्तिजीवितनामके ग्रन्थे आचार्येण कुन्तकेन पदपूर्वार्धवक्रतायाः ये अष्टौ भेदाः प्रतिपादितास्तेषु विशेषणवक्रता, संवृतिव्रक्रता, वृत्तिवक्रता, लिङ्गवैचित्र्यवक्रता, क्रियावैचित्र्यवक्रता च व्याकरणेनैव सम्बद्धाः। यथा पदपूर्वार्धवक्रतायाः स्वरूपं निरूपयति कुन्तकः -

वर्णविन्यासवक्रत्वं पदपूर्वार्द्धवक्रता।
वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः॥[11]

पदस्य सुबन्तस्य तिङन्तस्य वा यःपूर्वार्द्धः प्रातिपदिकलक्षणः धातुलक्षणः वा, तस्य वक्रता वक्रभावो विन्यासवैचित्र्यम्[12]। सन्त्यन्येऽपि वक्रतायाः प्रकाराः यथा - कारकवक्रता, सङ्ख्यावक्रता, पुरुषवक्रता, प्रत्ययवक्रता, पदवक्रता, वाक्यवक्रता इत्यादयः। पुरुषवक्रताया विचारावसरे आचार्यः आत्मनेपद-परस्मैपद-प्रयोगेऽपि वक्रतां विचारयति। पदवक्रतां व्याचक्षाणः कुन्तकः कथयति - "यस्यां वक्रतायामुपसर्गनिपातयोर्वैयाकरणप्रसिद्धाभिधानयो रसादिद्योतनं शृङ्गारप्रभृतिप्रकाशनम्'॥[13]

रामस्य सीतावियोगे चिन्तासंवलितः सम्भ्रमः अस्मिन् पदे समुन्मील्यते - वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव। अतः वक्रोक्तिविवेचनमपि पाणिनीयव्याकरणं समालिङ्गदेव दृश्यते।

वयमवलोकयामो यदलङ्कारविवेचनप्रकारेषु पाणिनीयव्याकरणस्य आलम्बनं गृहीत्वैव अग्रेसरणं भवति। समग्रोऽपि अलङ्कारविस्तारः, विशेषेण उपमाप्रपञ्चः पूर्णतया व्याकरणमाश्रित्य तिष्ठति। काव्यप्रकाशे मम्मटाचार्यः पूर्णोपमायाः श्रौत्यार्थीरूपं भेदद्वयं व्याकरणमाधृत्य एव विधत्ते। यथादिसाम्यबोधकशब्दानां प्रयोगे श्रौती, तुल्यादिशब्दानां प्रयोगे चार्थी इत्यतीव सूक्ष्मरुपेण भेदः प्रकल्पितः, यथा स प्रतिपादयति - "यथेववादिशब्दाः यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते, तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् सम्बन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा। साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्य-

11 व.जी., 1/19

12 व.जी., 1/19वृत्तिश्च

13 तदैव 2/33 वृत्तिभागः

स्यार्थत्वात् तुल्यादिशब्दोपादने आर्थी" ।[14]

इमौ भेदौ पुनर्वाक्यगा-समासगा-तद्धितगा भेदेन त्रिधा विभज्येते, तत्रापि व्याकरणमेव कारणम्। पुनः श्रौत्यार्थीरूपयोः उपमाभेदयोः भेदानां विकासस्तद्धितगानां समग्ररूपेण अष्टाध्यायीसूत्रयोराधारमासाद्य प्रभवति। प्रथमं तद्धितगा श्रौती 'तत्र तस्येव' इति सूत्रेण इवार्थे विहितस्य वतिप्रत्ययस्य उपादाने भवति। गुणद्रव्यादीनां साम्ये उपमा सप्तम्यन्तेन षष्यठ्यन्तेन वा शब्देन सह वतिप्रत्ययविधाने भवति यथा मथुरावत् पाटलिपुत्रे प्रकारा तथा मथुरावत् पाटलिपुत्रस्य विस्तारः इति प्रयोगयोः। तद्धितगा अर्थी चोपमा 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण क्रियामात्रसाम्ये तृतीयान्तपदेन भवति। अयमेवानयोर्व्याकरणगतविशेषः। इवशब्दप्रयोगे नूनं व्याकरणवैशिष्ट्यम्, यतो हि 'इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इति नित्यसमासे इवशब्दयोगे समासगा उपमा भवति। अतः शब्दशक्तिवैचित्र्येण व्याकरणगतसूक्ष्मप्रभावेण चायं पूर्णोपमाविषयः प्रकल्पते। पाणिनिना उपमालङ्कारप्रपञ्चविशदीकरणे अन्यापि सूत्राणि रचितानि यथा चन्द्रेण तुल्यं सुन्दरं मुखम् इत्यत्र साधारणधर्मप्रयोगे उपमानानि सामान्यवचनैः इति सूत्रं प्रयुज्यते, परन्तु पुरुषव्याघ्रः इति प्रयोगे 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति उपमानोत्तरपदकर्मधारयसमासे जायते। यथोपमालङ्कारे सूत्राणीमानि विधेयकानि, तथैव अभेदारोपरूपे रूपकालङ्कारे आधारभूतं सूत्रं वर्तते मयूरव्यंसकादयश्च, येन तत्पुरुषसमासविधानं भवति। यथा पूर्णोपमालङ्कारे तथैव लुप्तोपमालङ्कारे अधिकतरं व्याकरणनियमप्रयोगो दरीदृश्यते। काव्यप्रकाशे प्रतिपादिताः वाचकलुप्ताया उपमायाः सर्वेऽपि षड् भेदाः पाणिन्यष्टाध्यायीसूत्राण्येव **अनपवर्तन्ते** यथा - वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि कर्मकर्त्रोर्णमुलि[15]।

वाचकलुप्तायाः प्रथमोदाहरणं समासे सङ्घटते, यथा कामिनीगण्ड पाण्डुना इत्यत्र। पुनः कर्मणि क्यच्प्रत्यय विधानेन, आधारे क्यच्प्रत्ययविधानेन द्वौ भेदौ भवतो यौ उपमानादाचारे अधिकरणाच्च इति सूत्राभ्यां सिद्ध्यतः पुनश्च चतुर्थो भेदः कर्तुः क्यङ् सलोपश्च इति सूत्रस्य विधानेन सिध्यति, यथाऽत्रोदाहरणम् -

पौरं सुतीयाति जनं समरान्तरेऽसा-
वन्तःपुरीयति विचित्रचरित्रचुञ्चुः।
नारीयते समरसीम्नि कृपाणपाणे-
रालोक्य तस्य चरितानि सपत्नसेना॥[16]

---

14 का.प्र.,10, पृ 444

15 तदेव 10/88

16 का.प्र., 10/403

वाचकलुप्तायाः पञ्चमं रूपं कर्मणि णमुल् प्रत्ययप्रयोगेण तथा षष्ठं रूपं कर्तरि णमुल् प्रत्यययोगेन निष्पद्यते। तत्र 'उपमाने कर्मणि च' इति सूत्रेण णमुल्प्रत्ययः तथा 'कषादिषु यथाविध्यनुप्रयोगः' इति सूत्रेण धात्वनुप्रयोगं विधानं विधीयते यथा -

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे।
स पुनः पार्थसञ्चारं सञ्चरत्यवनीपतिः ॥[17]

अस्मिन्नेव लुप्तोपमाक्रमे धर्मवाचकलुप्ता उपमा क्विप् गता समासगता च द्विविधा भवति, धर्मोपमानलुप्ता समासे वाक्ये च भवति, वाचकोपमेयलुप्ता क्यच् गता भवति, वाचकधर्मोपमानानां लोपे च समासगा भवति। एषु सर्वेषु प्रकारेषु व्याकरणसूत्रविधानमेव कारकतत्त्वम्।

पण्डितराजेन जगन्नाथेन स्वकीये काव्यशास्त्रीये ग्रन्थे रसगङ्गाधरे रसप्रसङ्गे ये अश्रव्यतारूपा काव्ये वर्जनीया दोषा प्रतिपादिताः, तत्रापि व्याकरणशब्दविधान-मेव कारणम्। यथा एकत्र स अश्रव्यान्तराणि संगृह्य वक्ति - एवं रोरुत्वस्य, हलि लोपस्य, यण्-गुणवृद्धिसवर्णदीर्घ-पूर्वरूपादीनां नैकट्येन बाहुल्यमाश्रयताहेतुः। एवमिमे सर्वेऽप्यश्रव्यभेदाः काव्यसामान्ये वर्जनीयाः[18]। तेषु तेषु रसेषु विशेषतो ये वर्जनीयास्तेषामपि विस्तरेण प्रतिपादनं यदाचार्येण कृतं तत्र मधुररसेषु दीर्घसमा-सानां विसर्जनीयादेशसकार-जिह्वामूलीयोपध्मानीयादीनां यङन्तानां, यङ्लुगन्तानां च शाब्दिकप्रियाणामपि प्रयोगा वर्जनीया मताः। अतः शब्दशास्त्रसरणिमेव पण्डि-तराजोऽपि अनुसरति। अतोऽत्र निष्कर्षरूपेण तथ्यमिदं स्फुरीभवति यत् साहित्य-शास्त्रकारैराचार्यैः विभिन्नानां काव्यसिद्धान्तानां प्रतिपादने भूयस्त्वेन व्याकरणशास्त्रं विशेषरूपेण पाणिनिप्रणीतं व्याकरणशास्त्रम् आधारीकृतम्।

**शब्दसंकेत**

1. का.प्र. - काव्यप्रकाशः
2. ध्व.लो. - ध्वन्यालोकः
3. ना.शा. - नाट्यशास्त्रम्
4. भा.प्र. - भावप्रकाशन
5. र.गं - रसगङ्गाधरः
6. व.जी. - वक्रोक्तिजीवितम्

[17] का.प्र., 10/404
[18] र.गं., आ-1, पृ 212

7. शृं.प्र. - शृंगारप्रकाशः
8. सा.द. - साहित्यदर्पणः

**सन्दर्भग्रन्थसूची**


1. Sringaraprakasha of Bhoja, ed. Venkatarama Raghavan, The Department of Sanskrit and Indian Studies, harvard University, 1998

2. भावप्रकाशनम्, हिन्दीभाष्यानुवादः - डा. मदन मोहन अग्रवाल, चौखम्बा सुरभारती ग्रन्थमाला, वाराणसी, १९८३

3. महाकविश्रीजगन्नाथपण्डितविरचितो रसगङ्गाधरः, नागेशभट्टकृतया टीकया समेतः, निर्णयसागर प्रेस, मुम्बाई, १८८८

4. वक्रोक्तिजीवितम् सटिप्पण प्रकाश हिन्दीव्याख्योपेतम्, सम्पा. श्री राधेश्याम मिश्रा, चौखम्भा संस्कृत संस्थान, वाराणसी, १९९८

5. विश्वनाथकविराजप्रणीतः साहित्यदर्पणः, श्रीमदनन्तदासेन विरचितया लोचनाख्यया भट्टाचार्यश्रीमहेश्वरतर्कालङ्कारप्रणीतया प्राचीनया विज्ञप्रिया-समाख्यया च व्याख्यया समलङ्कृतः, मोतीलाल बनारसीदास, पटना, १९३८

6. श्रीमदानन्दवर्धनाचार्यप्रणीतो ध्वन्यालोकः, सम्पा. पं. सुर्गाप्रसाद, निर्णयसागर प्रेस, मुम्बाई, १९२८

7. श्रीमद्भरतमुनिप्रणीतं नाट्यशास्त्रम्, अभिनवभारतीविवृत्या मधुसूदनीबालक्रीडाभिः समुद्भासितम्, सम्पा. श्रीमधुसूदनशास्त्री, काशी हिन्दू विश्वविद्यालयः, वाराणसी, १९७१

8. श्रीमम्मटभट्टविरचितः काव्यप्रकाशः, सम्पा. विनायक गणेश आप्टे, आनन्दाश्रममुद्रणालय, १९२९


✿✿✿

# काशी के सौम्य एवं उत्कृष्ट वैयाकरण आचार्य रामप्रसाद त्रिपाठी

भगवत्शरण शुक्ल

भगवान् भूतभावन भवानीपति विश्वनाथ की कृपा काशी की भूमि पर अवश्य रही है। यह ज्ञान की खान है, अघ की नाशिका है, मुक्ति की परमभूमि है। न केवल शैव, अपितु वैष्णव, गाणपत्य, शाक्त, कबीरपन्थ, बौद्ध, जैन आदि सिद्धान्तों के अनुयायियों ने अपने सिद्धान्त के आधार पर यहाँ साधना की और इस काशी की भूमि को अपने बहुमूल्य उपदेशों, ग्रन्थ रचनाओं तथा स्वाध्याय, अध्यापन आदि के द्वारा समृद्ध किया। चारों वेदों के विभिन्न शाखाओं के वैदिक यहाँ अपनी साधना करते हैं तो व्याकरण, न्याय, वेदान्त, मीमांसा, धर्मशास्त्र, ज्योतिष आदि के विद्वान अपनी अप्रतिम प्रतिभा से काशी के गौरव की अभिवृद्धि करते हैं।

काशी में व्याकरण की परम्परा बाबा विश्वनाथ से ही प्रारम्भ होती है। भगवान् शिव ने तपस्यारत परम तपस्वी भगवान् पाणिनि को सानुबन्ध वर्णसमाम्नाय का उपदेश दिया था। आचार्य कात्यायन, आचार्य पतञ्जलि के द्वारा भी काशी क्षेत्र की शोभा संवर्धित की गयी। आचार्य वामन जयादित्य ने काशिका नाम से पाणिनि सूत्रों की वृत्ति लिखी। आचार्य कैयट ने महाभाष्य की प्रदीप टीका की रचना इसी काशी में किया। भट्टोजिदीक्षित ने शब्दकौस्तुभ के साथ सिद्धान्तकौमुदी तथा प्रौढमनोरमा की, उनके गुरु ने आचार्य रामचन्द्र द्वारा विरचित प्रक्रियाकौमुदी पर प्रकाशटीका की रचना की है। इसी प्रकार अनेक महान् वैयाकरणों ने अपने उदात्त एवं गम्भीर चिन्तन-मनन, अध्यापन से अनेक सुयोग्य शिष्यों को तैयार किया तथा अनेक ग्रन्थों की रचना की। इन्हीं में शिव कुमार शास्त्री, दामोदर शास्त्री, तात्या शास्त्री, जयदेव मिश्र, वेणी माधव शुक्ल, रामयश तिवारी महाशय जी, पूर्णचन्द्राचार्य प्रभृति वैयाकरणों से काशी सुशोभित होती रही।

बीसवीं शताब्दी में काशी में एक ऐसे महामानव वैयाकरण का आगमन हुआ जिन्होंने अपने सौम्य व्यक्तित्व, अप्रतिम पाण्डित्य, सद्विचार, सदाचरण से सम्पूर्ण काशी के विद्वत् समाज को आलोकित किया। वे महामानव हैं आचार्य रामप्रसाद त्रिपाठी। जौनपुर जनपद के अन्तर्गत ग्राम बेल्छा पोस्ट लाल बाजार मसीदा में परम सात्विक सदाचारी परमब्रह्मण्य आचार्य राम स्वरूप त्रिपाठी जी के घर में प्रथम पुत्र के रूप में हमारे आचार्य रामप्रसाद त्रिपाठी जी का जन्म मार्गशीर्ष मास में पन्द्रह दिसम्बर उन्नीस सौ बीस में हुआ था। आपकी पूज्य माता जी का शुभ नाम श्रीमती दशवन्ती देवी था। आप सरयूपारीण ब्राह्मणों में तीन घर के ब्राह्मणपरम्परा में श्री

मुखशाण्डिल्य गोत्र में सिरजम त्रिपाठी वंश से सम्बद्ध थे। आपकी प्रारम्भिक शिक्षा अपने ग्राम में हुई। परम्परा की, आचार आदि की शिक्षा अपने पूज्य माता-पिता जी से हुई। फिर बाबा विश्वनाथ की कृपा आप पर हुई और आप काशी में अध्ययनार्थ आये। आपका व्याकरणशास्त्र, न्यायशास्त्र, धर्मशास्त्र आदि में अत्यधिक परिश्रम था। आपने-अपने अभ्यास से व्याकरण विद्या को सिद्ध कर लिया था। प्रत्येक शब्दों के (चाहे जिस भाषा का हो) प्रकृतिप्रत्यय की परिकल्पना कर उसका साधुत्व प्रस्तुत कर देते थे। व्याकरण में सिद्धान्त कौमुदी उन्हें सिद्ध थी। इसके साथ प्रौढ़ मनोरमा, लघुशब्देन्दुशेखर, परिभाषेन्दुशेखर आदि महाभाष्य, वाक्यपदीय आदि टीका ग्रन्थ तथा सभी ग्रन्थों का चिन्तन आपका अभूतपूर्व था। आपने व्याकरण में प्रौढ़ता, आचार्य श्री हरिनारायण तिवारी जी के नाम से काशी में प्रतिष्ठित विद्वान थे उनके सान्निध्य में प्राप्त की। आचार्य रघुनाथ शर्मा जी से भी व्याकरण के अनेक ग्रन्थों का अध्ययन किया था। गोपाल शास्त्री नेने जी ने व्याकरण में आपको प्रवेश कराया था। न्यायशास्त्र की प्रौढ़ता अापने आचार्य केशव द्विवेदी जी प्राप्त किया। इन सब विषयों का अध्ययन करके शिष्यों के अध्यापन में संलग्न रहना, स्वतंत्र चिन्तन को लेख बद्ध करना, भगवान् विश्वनाथ की आराधना करना यही आपके जीवन के परम-लक्ष्य थे। काशी हिन्दू विश्वविद्यालय के तत्कालीन संस्कृत कालेज जो सम्प्रति संस्कृत विद्या धर्म विज्ञान संकाय के नाम से है, के प्राचार्य रामव्यास जी एक पण्डित सभा में आपके शास्त्रीय प्रतिपादन से प्रभावित हुए और आपको 1953 में अपने यहाँ व्याकरण प्रवक्ता पद पर नियुक्त कर दिया। तत्कालीन व्याकरण विभागाध्यक्ष प्रो. राजनारायण पाण्डेय जी ने भी आपसे प्रभावित हो अपने विभाग में प्रवक्ता पद पर नियुक्ति हेतु पूर्ण उत्साह के साथ अपनी स्वीकृति प्रदान की थी। यहाँ आपने 1953 से 1965 तक अपने वैदुष्यपूर्ण अध्यापन से व्याकरण विभाग को कृतार्थ किया। 1965 में ही आचार्य पद पर तत्कालीन वाराणसेय संस्कृत विश्वविद्यालय जो सम्प्रति सम्पूर्णानन्द संस्कृत विश्वविद्यालय के नाम से विख्यात है, उसमें प्रतिष्ठित हुए। यहाँ पर आपने 1981 तक अपने अध्यापन एवं विशिष्ट व्याख्यानों से शिष्यों एवं विद्वानों को उपकृत किया। सेवानिवृत्त होने के बाद भी जीवन के अन्तिम क्षणों तक वरिष्ठ सम्मानित आचार्य के रूप में आप निरन्तर अध्यापन में संलग्न रहे। अनेक विश्वविद्यालयों में विशिष्ट व्याख्यान हेतु आप आमन्त्रित होते थे। आज भी जिन्होंने आपके वक्तव्य को सुना है। उनकी इच्छा आपकी वाणी सुनने की लालसा लिए रहती है। पर संसार तो नश्वर है। अतः आपका भी 29 मई 1998 को शिवसायुज्य हो गया। यद्यपि आचार्य त्रिपाठी हमारे बीच नहीं रहे। परन्तु उनके द्वारा अध्यापित शिष्य तथा उनके द्वारा लिखित उत्तम शब्द आज भी उनकी उपस्थिति का अनुभव कराते रहते हैं।

आपने अपने विचारों को जन-जन तक पहुँचाने के लिए जिन ग्रन्थों की रचना की उनके मूलस्रोत यद्यपि महाभाष्य वाक्यपदीप आदि व्याकरण के प्रमुख ग्रन्थों में विद्यमान थे तथापि उन सिद्धान्तों को परम्परया लेकर उनकी प्रस्तुति ग्रन्थों में इस प्रकार किया कि वे ग्रन्थ उनके मौलिक सिद्धान्त के संवाहक जैसे लगते हैं। आपके द्वारा रचित प्रमुख ग्रन्थ हैं -

**1. पाणिनीव्याकरणे प्रमाण समीक्षा**

'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः' इस सिद्धान्त के होने से प्रत्येक सिद्धान्त की स्थापना हेतु प्रमाणों की आवश्यकता होती है। किन्तु व्याकरण के किसी भी ग्रन्थों में प्रमाण की चर्चा प्राधान्येन कहीं नहीं है। महाभाष्य में यद्यपि उपमानानि सामान्यवचनैः[1] इस सूत्र के व्याख्यान में महर्षि पतञ्जलि तथा कैयट एवं नागेश ने प्रमाण सामान्य का लक्षण करते हुए उपमान प्रमाण में प्रमाणत्व का खण्डन किया है। प्रसंगानुसार अन्यत्र भी प्रमाणों की चर्चा है। यथा - अपरोक्षे च[2], परोक्षे च[3] इनमें अपरोक्ष से प्रत्यक्ष प्रमाण की चर्चा है। तथैव परोक्ष से अनुमान शब्द, अर्थापत्ति का ग्रहण कर सकते हैं। आचार्य त्रिपाठी ने अन्य दार्शनिकों के प्रमाणों की पूर्ण चर्चा करके इन चारों प्रमाणों की वैयाकरण के सिद्धान्तानुसार स्थापना की। यद्यपि वाक्यपदीय में इनके अतिरिक्त 'अदृष्ट''अभ्यास' प्रमाण की भी चर्चा आती है। परन्तु इनका अलौकिक सन्निकर्ष के माध्यम से प्रत्यक्ष प्रमाण के अन्तर्गत मानकर इन्होंने मात्र प्रत्यक्ष, अनुमान, शब्द और अर्थापत्ति इन चार प्रमाणों को ही स्वीकार किया। इस ग्रन्थ में प्रत्यक्ष प्रमाण तीन पुष्पों में, अनुमान प्रमाण तीन पुष्पों, शब्द प्रमाण चार पुष्पों में, तथा अर्थापत्ति एक पुष्प में विवेचित है। इनके अतिरिक्त प्रत्याख्येय प्रमाणों की चर्चा दो पुष्पों में, अर्थापत्ति एक पुष्प में विवेचित है। इनके अतिरिक्त प्रत्याख्येय प्रमाणों की चर्चा दो पुष्पों में, प्रमेय का विचार दो पुष्पों में हुआ है। इन सभी विषयों का सप्रमाण ससन्दर्भ विवेचन जितना वैदुष्यपूर्ण रीति से इस ग्रन्थ में हुआ है। उतना अन्यत्र दुर्लभ है। यह ग्रन्थरत्न न केवल वैयाकरणों के लिए अपितु समस्त दार्शनिकों के लिए उपादेय है। इस ग्रन्थ का आकार चार सौ पृष्ठों का है। जिसमें पृथक्तया अतीव महत्त्वपूर्ण 53 पृष्ठ की भूमिका है।

[1] 2/1/55
[2] 3/3/119
[3] 3/2/115

## 2. वैयाकरणसिद्धान्तलघुमञ्जूषा की हिन्दी टीका (सरला)

व्याकरणशास्त्र में दर्शन के ग्रन्थों में वाक्यपदीय के बाद वैयाकरण-भूषण सार और उसके बाद नागेश विरचित वैयाकरणसिद्धान्तमञ्जूषा, लघुमञ्जूषा, परमलघुमञ्जूषा ये तीन दार्शनिक ग्रन्थ प्रसिद्ध हुए। इनमें लघुमञ्जूषा में विषय का विवेचन प्रौढ़ रीत्या हुआ है। पाठ्यक्रम में इस ग्रन्थ के निर्धारित होने से विद्यार्थियों के कल्याण हेतु स्वसंज्ञा को चरितार्थ करने वाली सरला नाम टीका से इस ग्रन्थ का उद्धार किया। यह टीका इस ग्रन्थ के प्रारम्भ से लेकर तात्पर्य प्रकरण तक के ग्रन्थ पर है। क्योंकि इतना अंश ही पाठ्यक्रम में निर्धारित है। यह टीका काशी की अध्ययन अध्यापन परम्परा के अनुसार है। इससे न केवल छात्रों का अपितु अध्यापकों का भी कल्याण हुआ है।

## 3. वैयाकरणभूषणसार टिप्पणी सुबोधिनी

इस ग्रन्थ में आपके पूज्य गुरु आचार्य गोपालशास्त्री नेने की सरला टीका है, जिसमें जहाँ न्याय एवं मीमांसा का विवेचन है उसका उपस्थापन टिप्पणी द्वारा सम्यग् रीति से किया है, यथा सोमेन यजेत की टिप्पणी द्रष्टव्य है "अत्र सोमस्य सोमवति लक्षणायां लक्ष्यार्थस्य धात्वर्थयागेऽभेदेनान्वये "सोमवता यागेन इष्टं (स्वर्गादि) भावयेदिति बोधो मीमांसकैः स्वीक्रियते, तत्र क्व समानविभक्तित्वम्" पृ. 9" यह टिप्पणीग्रन्थ सम्पूर्ण ग्रन्थ के मुख्य-मुख्य स्थलों पर है।

## 4. सिद्धान्तचिन्तामणि भाग दो

यह ग्रन्थ विवेचन की दृष्टि से अत्यन्त महत्त्वपूर्ण है। इसमें 82 नि-यमसूत्रों का 139 अपवाद एवं निषेध सूत्रों का विवेचन किया गया है। नियम स्थल में नियामक शास्त्रीयोद्देश्यतावच्छेदक का व्यापक तथा नियम्य-शास्त्रीयोद्देश्यतावच्छेदक का व्याप्य जो धर्म तादृशधर्मावच्छिन्नाति-रिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्न में संकोच होता है। नियम शास्त्र की विधिमुखेन निषेध मुखेन इन दो प्रकारों से प्रवृत्ति होती है। इसका पूर्ण विवेचन आचार्य त्रिपाठी जी ने किया है। यद्यपि शेखर की टिप्पणियों में इस विषय का विवेचन हुआ है, पर इतना व्यापक विवेचन किसी ग्रन्थ में नहीं है।

## 5. गौरवाभिसन्धिप्रकाश

इस लघु ग्रन्थ में आचार्य त्रिपाठी जी द्वारा नवाह्निक महाभाष्य में अपने पूज्य गुरु आचार्य रघुनाथ शर्मा की टिप्पणी में अन्य विद्वानों के द्वारा समागत,

आरोपों का समाधान किया गया है। तात्त्विक विचार की दृष्टि से यह लघु ग्रन्थ श्लाघनीय है। इसी ग्रन्थ के साथ और जो ग्रन्थ प्रकाशित है उस ग्रन्थ का नाम है। "महाभाष्ये प्रदीपोद्धारः" इसमें प्रदीप ग्रन्थ में नागेश के आक्षेप का समाधान है। इसमें प्रथम एवं द्वितीय आह्निक अंश तक का विचार है। जिसमें प्रदीप के विचारों को पूर्ण तर्क संगत सिद्ध किया गया है।

### 6. शाब्दिकवृत्तिविमर्शः

यह ग्रन्थ वस्तुतः "पाणिनीयव्याकरणे प्रमाणसमीक्षा" का एक अंश है। फिर भी शक्ति लक्षणा व्यंजना रूप वृत्ति के अध्ययन के लिए यह ग्रन्थ पूर्ण प्रामाणिक एवं परमावश्यक है।

### 7. स्फोटवादविमर्शः

यह ग्रन्थ स्फोट विचार को लेकर है। इसमें स्फोट से सम्बन्धी अन्य दार्शनिकों के मतों की समीक्षा करते हुए वैयाकरणों के मत की सशक्त स्थापना है।

### 8. वैयाकरणसिद्धान्तकौमुदी टीका

यह ग्रन्थ अप्रकाशित है। यह टीका कितने अंश में है अभी ज्ञात नहीं हैं। आपके मध्यम पुत्र श्रेष्ठ विद्वान् प्रो. जयप्रकाश त्रिपाठी एतदर्थ प्रयासरत हैं।

### 9. विविध शास्त्रीयनिबन्ध

व्याकरण, भाषाविज्ञान एवं अन्य विषयों के अनेक शोध निबन्ध सरस्वती,-सुषमा एवं अन्य प्रसिद्ध शोध पत्रिकाओं में ससम्मान प्रकाशित हुए हैं। जो अपने गम्भीर विचारों से संस्कृत जगत् के विद्वानों की सतत ज्ञानवृद्धि कर रहे हैं।

ऐसे भी अनेक निबन्ध हैं जो आपने अपने विद्यार्थियों को पढ़ाने के उद्देश्य से लिखाये और उन्हीं के नाम से प्रकाशित कराये हैं। ये आपकी उदारता एवं शिष्यवत्सलता का सशक्त प्रमाण है।

आपके परिवार में आप तीन भाई थे। जिसमें आप ज्येष्ठ थे। मध्यम श्री पं. (स्व.) रामचन्द्र त्रिपाठी थे। कनिष्ठ श्री पं. रामदेव त्रिपाठी है। जो सम्प्रति अपनी साधना से सबको उपकृत कर रहे हैं। आपके तीन पुत्र एवं तीन पुत्री थीं। डॉ. रामेश्वर प्रसाद त्रिपाठी दर्शन नेशनल पी.जी. बड़हलगंज, गोरखपुर दर्शन-विभागाध्यक्ष, डिग्री कालेज, प्रो. जयप्रकाश त्रिपाठी, अध्यक्ष रामानुज वेदान्त

सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी प्राध्यापक हैं। आचार्य स्व. राजेन्द्र प्रसाद त्रिपाठी, व्याकरण विभाग, परमहंस संस्कृत महाविद्यालय सरस्वती फाटक, वाराणसी में प्राध्यापक थे। आपकी पुत्रियों में सभी से ज्येष्ठ श्रीमती मालती देवी, मध्यमा श्रीमती जयदेवी, कनिष्ठा श्रीमती गङ्गादेवी तथा आपकी परम साध्वी पत्नी श्रीमती छविराजी देवी त्रिपाठी थीं। जिनका शिवसायुज्य आपके जीवन काल में ही (सन् 1991) हो गया था।

आपके हजारों शिष्य है जो अपने प्रकृष्ट ज्ञान एवं सद्विचार तथा पवित्र आचार से आपके यश के साथ-साथ अपने यश का अभिवर्द्धन कर रहे हैं। इनमें आचार्य रामयत्नशुक्ल जी का प्रथम स्थान है, जो आपके समान ही काशी में अध्ययन-अध्यापन, लेखन एवं प्रवचन से संस्कृतशास्त्रों की सेवा में सतत संलग्न हैं। सम्पूर्णानन्द संस्कृत विश्वविद्यालय में प्रवक्ता, उपाचार्य, आचार्य संकायप्रमुख आदि अनेकों उत्तरदायित्वों का कुशलतापूर्वक निर्वाह करते हुए आज भी अपने आवास में निरन्तर छात्रों को विद्यादान में संलग्न हैं। इसी प्रकार अनेक शिष्य अनेक विश्वविद्यालयों में, महाविद्यालयों में अपनी सेवा प्रदान करते हुए आपके द्वारा सम्प्राप्त विद्या के संवर्धन में सतत संलग्न हैं। यद्यपि हमें आपसे साक्षात् अध्ययन करने का सौभाग्य प्राप्त नहीं हुआ परन्तु आपके शिष्य परम तपस्वी एवं चिन्तक व्याकरण न्याय तथा वेदान्त के उद्भट विद्वान् (स्व.) डॉ. मधुकर पाठक (अध्यक्ष व्याकरण विभाग, रामदेशिक संस्कृत महाविद्यालय, प्रयाग) जी से पढ़ने का, चिन्तन करने का सौभाग्य अवश्य प्राप्त हुआ। जो आपके यश का वर्णन हमेशा करते थे। मेरे द्वितीय गुरुवर परम् तपस्वी न्याय व्याकरण वेदान्त मीमांसा एवं धर्मशास्त्र के उद्भट विद्वान् परमशास्त्रार्थी आचार्य (स्व.) पंडित रामवदन शुक्ल जी जो आपसे वरिष्ठ थे, वे भी आपकी प्रशंसा हमेशा करते थे। आचार्य त्रिपाठी जी का यश आज भी संस्कृत जगत में विद्यमान है। आप में वैदुष्य के साथ सौम्यता, नम्रता, निरभिमानिता का भंडार था। शायद ही किसी ने आपके आचरण में काम, क्रोध, लोभ, मोह, मद, मत्सर इन षड् विकारों का अतिरेक देखा हो। वस्तुतः आप साक्षात् विद्यामूर्ति तपोमूर्ति थे। ऋषि महर्षियों के पंक्ति के थे। ऐसा लगता है कि कोई देवर्षि किसी कर्म विशेष के भोगार्थ मृत्युलोक में आकर सभी का कल्याण कर चले गये। आचार्य त्रिपाठी जी को मेरा शत शत नमन।

✿✿✿

# व्याकरणदर्शनं जातिमीमांसा च

प्रमोद कुमार शर्मा

व्याकरणदर्शनस्य आरम्भः अतिप्राचीनकालादेवावलोक्यते। वैदिकसाहित्ये अप्यस्य स्वरूपं दृश्यते - ॐकारं पृच्छामः को धातुः किं प्रातिपदिकम् किं नामाख्यातम् किं लिङ्गम्। किं वचनम्। का विभक्तिः। कः प्रत्ययः इति[1]। यदि एतेषां प्रश्नानामुत्तरं प्रदीयते तर्हि सम्पूर्णव्याकरणदर्शनं स्वयमेव समक्षमागच्छति। पुराकाले एतेषां प्रश्नानां समाधानाय प्रयासं कृतवन्तः - आख्यातोपसर्गानुदात्तस्वरितलिङ्गविभक्तिवचनानि च संस्थानाध्यायिनः आचार्याः पूर्वे बभूवुः[2] इति।

यास्काचार्येण नामाख्यातादीनां विवरणं निरुक्ते कृतमस्ति। प्रसङ्गवशात् तत्र कतिपयपूर्वाचार्याणामपि उल्लेखो दृश्यते पूर्वाचार्याणां व्याकरणदर्शनसम्बन्धिविचाराः अपि इदानीमल्पीयांसः एव सुरक्षिताः सन्ति।

महर्षिपाणिनिना यथा संस्कृतव्याकरणस्य सुव्यवस्थितं स्वरूपमुपस्थापितं तथैव व्याकरणदर्शनस्य स्पष्टरूपेण आरम्भोऽपि कृतः अष्टाध्याय्यामाविर्भावो महर्षिणा विहितः।

अत एव व्याकरणदर्शनस्य एका विस्तृता पृष्ठभूमिः पाणिनिना स्वयमेव सञ्जीकृता। पाणिनिदर्शिताः विभाषा-पदविधि-आदेश-विप्रतिषेध-उपमान-लिङ्ग-क्रियातिपत्ति-कालविभाग-वीप्सा-प्रत्ययलक्षण-भागलक्षणशब्दार्थप्रकृतिसदृशाः शतशः शब्दाः प्रतीकभूताः सन्ति येन ज्ञायते यत् पाणिनिः न केवलं तात्कालिकदार्शनिकप्रवादान् पूर्णरूपेण जानाति स्म अपितु स्वयमेव अत्युच्चकोटिकः चिन्तक अपि आसीत्। नैकानि पाणिनिसूत्राणि तस्य स्वयमेव दर्शनभूतानि सन्ति। तथा हि -

- सरूपाणामेकशेष एकविभक्तौ[3]
- जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्[4]
- स्वतन्त्रः कर्ता[5]
- तदशिष्यं सञ्ज्ञाप्रमाणत्वात्[6]

---

1 गोप., प्रथमः प्रपाठकः – 1, 24
2 गोप., प्रथमः प्रपाठकः – 1, 27
3 अष्टा., 1-2-64
4 अष्टा., 1-2-58
5 अष्टा., 1-4-54
6 अष्टा., 1-2-53

- समुच्चये सामान्यवचनस्य[7]
- तस्य भावस्त्वतलौ[8]
- प्रकारे गुणवचनस्य[9]। इत्यादीनि।

पाणिनिः वस्तुतः प्रमाणभूत आचार्यो अस्ति। पाणिनेरन्तरम् अन्यवैयाकरणैः व्याकरणसम्बद्धं यत्किमप्युक्तं तस्यानुमोदनं पाणिनेः केनचित् सूत्रेण अवश्यमेव क्रियते। अत एव केनचित् प्राचीनाचार्येण सम्यगुक्तं यत् वार्तिकेषु वृत्तिग्रन्थेषु च यत्किमपि अस्ति तत्सर्वं पाणिनिसूत्रेषु निहितमस्ति - 'सूत्रेष्वेव हि तत्सर्वं यदवृत्तौ यच्च वार्तिके' इति।

व्याकरणदर्शनदृष्ट्यापि सूक्तिरियं समुचिता प्रतिभाति व्याडिनामाचार्योऽपि व्याकरणदर्शनस्य संग्रहनामानं ग्रन्थं चकार। आचार्यभर्तृहरेः वचनात् प्रतीयते यदयं ग्रन्थः पाणिनीयसम्प्रदायात् सम्बद्ध आसीत् - संग्रहोऽपि अस्यैव शास्त्रैकदेशः। तत्रैकतन्त्रत्वात् व्याडेश्च प्रामाण्यादिहापि सिद्धशब्दः उपात्तः[10] इति।

महर्षिपतञ्जलिनापि संग्रहविषये उक्तमस्ति शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः[11] इति। वार्तिककारकात्यायनेन स्वप्रथमवार्तिकारम्भः सिद्धशब्दादेव कृतः। सिद्धे शब्दार्थसम्बन्धे इति अत्र महाभाष्ये पतञ्जलिना स्पष्टमुक्तं यदयं सिद्धशब्दः वार्तिककारेण व्याडेः संग्रहग्रन्थात् उपात्तः। संग्रहे मूलप्रयोगः अयमासीत् - किं कार्यः शब्दः अथ सिद्धशब्द इति[12]।

पतञ्जलिमते सिद्धशब्दो नित्यार्थवाचकोऽस्ति। उपपत्तिः, निष्पत्तिः तथा मङ्गलमिति शब्दत्रयस्यार्थे सिद्धशब्दस्य प्रयोगो दृश्यते। पाणिनिसदृशमेधाविनः कात्यायनस्यापि व्याकरणदर्शनेऽस्ति विशिष्टं स्थानम्।

वार्तिकग्रन्थारम्भे एव सिद्धे शब्दार्थसम्बन्धे इति प्रथमवार्तिके व्याकरणदर्शनस्य स्वरूपं समक्षमायाति। वाक्यस्य परिभाषा कात्यायनेन एवं दत्ताऽस्ति।

महर्षिपतञ्जलिविरचितमहाभाष्यमतीव प्रसिद्धमस्ति। अस्य गाम्भीर्यं सागरसमं वर्तते। व्याकरणदर्शनस्य अयमपि आकरग्रन्थोऽस्ति -

---

7 अष्टा., 3-4-5
8 अष्टा., 5-1-119
9 अष्टा., 8-1-12
10 म.भा.दी., पृ. 23 पूना संस्करणम्
11 म.भा., 2-3-66
12 संग्रहे एतत् प्रस्तुतं किं कार्यः शब्दोऽथ सिद्धः इति म.भा.दी., पृ. 23

अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात्।
तस्मिन्नकृतबुद्धीनां नैवावस्थितनिश्चयः ॥[13]

रत्नाकरमिव गभीरोऽयं ग्रन्थो वस्तुतो व्याकरणस्य सर्वविधसिद्धान्तान् आविष्करोति। तथाहि -

- सर्ववेदपारिषदं हि इदं शास्त्रं। तत्र नैकः पन्थाः शक्यः आस्थातुम्[14]
- न सत्तां पदार्थो व्यभिचरति[15]
- संस्कृत्य संस्कृत्य पदानि उत्सृज्यन्ते[16]
- प्रातिपदिकनिर्देशाश्चार्थतन्त्राः भवन्ति, न कांश्चित् प्राधान्येन विभक्तिमाश्रयन्ति[17]
- इह व्याकरणे यः स्वल्पीयान् स्वरव्यवहारः स मात्रया भवति, नार्धमात्रया व्यवहारोऽस्ति[18]

अत्र एकमेकं वाक्यं दर्शनस्य व्यापकभावभूमेः संकेतं करोति। तदेवं महाभाष्ये वर्ण-शब्द-आकृतिपदार्थ-द्रव्यपदार्थ-गुणपदार्थ-लिङ्ग-वचन-संख्या-वृत्ति-वाक्य-वाक्यार्थादिषु अपि पर्याप्तविचाराः प्राप्यन्ते। एतेन महाभाष्यं संग्रहस्य प्रतिनिधिकल्पो सर्वन्यायबीजानामधिष्ठानमस्ति। अत एव आह भर्तृहरिः -

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धनम्॥ इति[19]

न्यायबीजशब्दोपरि स्वाभिप्रायं प्रकटयन् एवमाह पुण्यराजः तत्र भाष्यं केवलं व्याकरणस्य निबन्धनम् यावत् सर्वेषां न्यायबीजानां बोद्धव्यम् इति। अत एव महच्छब्देन विशिष्य महाभाष्यमित्युच्यते लोके[20] पुण्यराजः पुनरपि लिलेख महाभाष्यं

---

13 वा.प. (अम्बाकर्त्तीसहित) का. 2/487
14 म.भा., 5-1-58 पूर्वापरप्रथमचरमजघन्यसमान-मध्यमध्यमविराश्च
15 म.भा., 5-2-94 तदस्यास्त्यस्मिन्निति मतुप।
16 म.भा., 1-1-1 वृद्धिरेचि
17 म.भा., 1-8-156
18 म.भा., 8-1-1 सर्वस्य द्वे
19 वा.प. वाक्यकाण्डम्., 2-488
20 वा.प., 2-485

हि बहुविधवादवलमार्षं व्यवस्थितम्[21] इति। वार्तिकेषु यत्किमपि अस्ति वर्णितं तत्तु महाभाष्ये विद्यते,एतेन सह अन्यदपि विवेचनमस्ति। अतः महाभाष्यं व्याकरणस्य तथा व्याकरणदर्शनस्य आकरग्रन्थोऽस्ति। अतः सम्पूर्णव्याकरणदर्शनं महाभाष्ये यत्र तत्र प्रस्फुटितमस्ति।

व्याकरणदर्शननाम्ना यद् वस्तु महाभाष्ये पार्थक्येनावलोक्यते तद् भर्तृहरिणा वाक्यपदीये संगृहीतं तथा महाभाष्यस्थिताः सिद्धान्ताः एव नवीनरूपेण संकलिता अपि। अतः प्रायः सर्वाणि दर्शनानि अधिकृत्य अत्र शाब्दिकग्रन्थेषु विचारणा प्रवर्तते।

व्याकरणदर्शनं नाम न केवलमितरदर्शनसिद्धान्तसम्मिश्रणम्। अस्यास्ति स्वीयं दर्शनमिति संशीतिरहितो वादः। व्याकरणदर्शनस्योपलब्धग्रन्थेषु महाभाष्यं वाक्यपदीयं च प्रामुख्यं भजेते।यद्यपि महाभाष्यं पाणिनिसूत्रव्याख्यात्मकं प्रक्रियापरं तथापि तत्र दार्शनिकसिद्धान्तप्रतिपादनमपि प्राचुर्येण वर्तते।

वाक्यपदीयमपि व्याकरणदर्शनस्य प्रमुखतमो ग्रन्थः। व्याकरणदर्शने अस्यास्ति स्वीयं वैशिष्ट्यम्। वाक्यपदीय प्रथमकाण्डे महाभाष्यविरचिताः दार्शनिकसिद्धान्ताः सम्यक् वर्णिताः। द्वितीयकाण्डे वाक्यचर्चा सविशदमुपस्थापिता। अवशिष्टे पदकाण्डाभिधे तृतीये काण्डे तत्तत्पदार्थदृष्ट्या ते ते पदार्थाः सम्यक् निरूपिताः। तृतीयकाण्डस्यास्ति खलु महत्वपूर्णं स्थानं तच्च वाक्यपदीयकारवचनेनैव निर्धार्यते -

वर्त्मनामत्र केषाञ्चिद् वस्तुमात्रमुदाहृतम्।
काण्डे तृतीये न्यक्षेण भविष्यति विचारणा॥

कारिका शाब्दिकसिद्धान्ते तृतीयकाण्डमहत्वमेव निरूपयति। अत्र काण्डे विकीर्णान् महाभाष्यसिद्धान्तान् सम्यक् निरूपितवान् भर्तृहरिः। अत्र स्वसिद्धान्तोपस्थापनेन सहैव परसिद्धान्तालोचनापि कृता। पदकाण्डमिदं चतुर्दशमुद्देशेषु विभक्तमस्ति। अत्र जाति-द्रव्य-सम्बन्ध-गुण-दिक्-साधन-क्रिया-काल-संख्या-उपग्रह-पुरुष-लिङ्ग-वृत्तिपदार्थाः दर्शनान्तरसन्दर्भे व्याकरणदर्शनानुसारं विवेचिताः सन्ति। आचार्यभर्तृहरिणा आदौ जातिसमुद्देशे जातिपदार्थ एव विवेचितः।

जातिपदार्थविषये महाभाष्ये पतञ्जलिना किमुक्तमित्येवादावत्र निरूप्यते किञ्चित् - जातिशब्दव्युत्पत्तिमादाय जातिलक्षणं कुर्वता महाभाष्यकारेणोक्तं यत् जननेन या प्राप्यते सा जातिः इति[22]। अत्र जननेन प्रयोज्यत्वं तृतीयार्थः। जन-

[21] पुण्यराजः, वा.प. वाक्यकाण्डे., 2-488
[22] म.भा. 5-3-55 अतिशायने तमबिष्ठनौ

नप्रयोज्या इति तात्पर्यम्। अत्र महाभाष्यकृता जातेः सम्बन्धः स्पष्टरूपेण जननात् स्थापितः तथा अस्यामपकर्षः प्रकर्षो वा न स्वीकृतः। एतेन जातौ अयत्नलभ्यता दृश्यते इति भाष्यकारस्याभिप्रायः इति कैयटाचार्यः प्रोवाच[23]। अन्यथा परमाण्वादिनित्यपदार्थेषु जननाभावात् तत्र जातिविरहः सेत्स्यति।अयत्नलभ्यः अर्थः सत्ता अस्ति, यस्यां प्रकर्षापकर्षौ न भवतः।यत्नादुत्पाद्येषु घटादिपदार्थेषु जातिः नित्यतया भवति, जातेः नित्यत्वात्। गुणे आश्रयभेदात् भेदो दृश्यते। अतः तस्मिन प्रकर्षोऽपकर्षो वा न भवति। अत्र नागेशेन जननात् प्राप्तं जातिलक्षणम् अद्वैतदर्शानुकूलं स्वीकृतम्। अद्वैतवादानुसारं ब्रह्मातिरिक्तं यत् किमपि अस्ति तत्सर्वं जन्यमस्ति। ब्रह्मणि नास्ति कश्चिदपि धर्मः, अतस्तत्र जातिरपि नास्ति[24]। महाभाष्यकारस्य मते जातेर्द्वितीयं लक्षणम् -

आकृतिग्रहणा जातिः लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह॥[25]

जातेः द्वितीयलक्षणमिदंमाकृतितः सबद्धमस्ति। आकृतिमाश्रित्य यस्याः अवबोधो भवति सा जातिः। अर्थात् जातिः अवयवसन्निवेशविशेषाद् अभिव्यक्ता भवति, यथा गोत्वम् इति। उपदेशबोध्यलिङ्गाद् अपि जातिः व्यक्ता भवति। विशेषचिह्नैः तथा केनचिद् उक्तानि लक्षणानि दृष्टवा ब्राह्मणस्य परिज्ञानं भवति। ब्राह्मणत्वजातिः आरोपितधर्मस्वरूपा अस्ति , गोत्वमिव स्वाभविकी नास्ति।

ये च पुनः सर्वाणि लिङ्गानि स्त्रीपुंक्लीबरूपाणि न गृह्णन्ति तेऽपि जातिमन्तो भवन्ति। यथा ब्राह्मणक्षत्रियवैश्यशूद्रादयो न सर्वलिङ्गयुक्ताः भवन्ति। यद्यपि तटशब्दः सर्वलिङ्गी वर्तते तथापि तत्र जातिप्रतिपादनम् अप्राप्तप्रापणरूपे मन्यते अतो यत्र सर्वलिङ्गसम्भावनास्ति तत्रापि जातिः भवितुमर्हति तथा, यद् असर्वलिङ्गमस्ति तत्रापि जातिः भवितुं नार्हति। यथा क्रमशः तटशब्दे देवदत्तशब्दे च।

येन सकृत् कथनादेव पिण्डान्तरेऽपि यस्या कथनं विनैव बोधः साऽपि जातिः, अत एतदपि जातिलक्षणमस्ति।यथा गौः इति शब्दमात्रकथने सति अन्यगोव्यक्तौ स्थितस्य गोत्वस्य अपि बोधो जायते।

---

23 अयत्नलभ्यत्वप्रतिपादनपरमेतत्। नित्यानां परमाण्वादीनां जननाभावात् तद्गतायाः जातेः जननाऽप्राप्यत्वात्। अयत्नलभ्यश्चायमर्थः, सत्तादिर्न प्रकर्षाप्रकर्षभाक्। घटादिके च द्रव्ये यत्नेनोत्पाद्यमाने पुरुषप्रयत्नेन विना नित्या जातयो व्यक्तिमायान्ति। इति म.भा.प्र., 5-3-55

24 जनजनने इति जुहोत्यादिगणपाठित धातोः क्तिन् प्रत्यये जजन्ति इति जातिः जजन्ति, जजातः जज्ञति। केचित्तु जननेन प्राप्यते इति लक्षणमद्वैतिनये, तेषां ब्रह्मातिरिक्तं सर्वं जन्यमेव। ब्रह्मणस्तु निर्धर्मकत्वात् तत्र जातिरेव नास्ति। इति म.भा., 5-3-55 अतिशायने तमबिष्ठनौ

25 म.भा., 4-1-63 जातेरस्त्रीविषयोपधात्।

चरणेन सह गोत्रमपि जातिमभिव्यनक्ति। अत्र चरणशब्देन शाखाध्यायिनो गृह्यन्ते, तत्र गोत्रमितिपदेन अपत्यमित्यर्थः प्रतीयते। गोत्रस्य सर्वलिङ्गत्वात् पृथगुपादानम्। अनेन प्रकारेण व्याकरणशास्त्रोपयोगि जातिलक्षणम् एतत् सर्वमुपयुक्तं सङ्कलय्य एकस्मिन् श्लोके महाभाष्यकृता पठितम्[26]।

जातेस्तृतीयं लक्षणं भाष्यकृता यत् प्रदर्शितं तद् आविर्भावविनाशाभ्यां सम्बद्धमस्ति। वस्तुनः आविर्भावात् तथा विनाशाद् यस्याःआविर्भावः तथा तिरोभावो भवति सा जातिः। अर्थात् यावद् द्रव्यमस्ति तावद् जातिरस्ति। यथा गवादिप्रत्ययस्योत्पत्तौ गोत्वादिसामान्यं गवादिना पिण्डेन सह सम्बद्धं सद् अनुभवपथमारोहति , एतस्मिन् अनुत्पद्यमाने तु गवादीनि द्रव्याणि गोत्वादिसामान्येन सम्बध्यमानानि न संलक्ष्यन्ते -

प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद् गुणैः।
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः[27]॥ इति

अर्थात् यावत् द्रव्यस्य स्थितिकालास्तावत्कालं सा जातिः तस्मिन् द्रव्ये तिष्ठति। एतेन यावद् द्रव्यभागिनी सा इत्युच्यते. यथा द्रव्यं गुणरहितं द्रव्यं कदापि न भवति तथा जातिरहितं द्रव्यं कदापि न भवति तथा जातिरहितमपि द्रव्यं नाऽनुभूयते, द्रव्येषु जातेरनुस्यूततया उपलभ्यमानत्वाद् जातिरियं बहुषु विषयेषु व्याप्ताऽस्ति तथा असर्वलिङ्गाऽस्ति।

जातेस्तृतीयमिदं लक्षणं द्वितीयलक्षणाद् भिन्नमस्ति। तेन प्रयोगे भिन्नता भवति। अत एवाह भाष्यकारः कः पुनरेतयोर्जातिलक्षणयोः विशेषः यदा पूर्वं जातिलक्षणं तदा कुमारीभार्य इत्यनेन भवितव्यम्। अथोत्तरं तदा कुमारभार्यः इति भवितव्यम्[28]। अर्थात् जातेर्द्वितीयलक्षणात् तु कुमारादीनां जातित्वं सिद्धं भवति,कुमारतत्वादीनामवयवसंस्थानैरभिव्यज्यमानत्वात्। जातेश्च इति पुंवद्भावस्य प्रतिषेधात् कुमारीभार्यः इति,तथा जातेस्तृतीयलक्षणेन कुमारादीनामवयाद् द्रव्यभावित्वात् जातित्वं न सिद्ध्यति तदा अस्मिन् लक्षणे कुमारभार्यः इत्येव भविष्यति। न तु कुमारीभार्यः इति उभयोलक्षणयोर्भेदः। एतयोः जातिलक्षणयोः कतरज्जातिलक्षणं पतञ्जलिना अभीप्सितम्। इति प्रश्ने जाते सति कैयटेन पूर्वोक्तं जातेर्द्वितीयं लक्षणं भाष्यसम्मतमस्तीत्युक्तम्[29]।

---

26 आकृतिग्रहणाजातिः लिङ्गानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैश्र्च सह॥ इति म.भा., 4-1-63

27 म.भा., 4-1-63 जातेरस्त्रीविषयादयोपधात्।

28 म.भा., 4-1-63 जातेरस्त्रीविषयादयोपधात्

29 पूर्वोक्तमेव लक्षणं भाष्यकारस्याभिमतम् अपर आहेत्यभिधानादाहुः इति। (म.भा.प्र., 4-1-

जातेश्चतुर्थं लक्षणं भाष्यकृता इदमुक्तं यत् - यत् तर्हि तत् भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः नेत्याह। आकृतिर्नाम सा[30] इति। अर्थात् व्यक्तिषु भिन्नेषु छिन्नेषु च यस्याः भेदनच्छेदौ न भवतः ब्राह्माणत्वघटत्वादिषु साधारण्येन बोधं जनयति। यतो हि यथा गवादिव्यक्तीनां भेदनादिक्रियायां जातायामपि, गोत्वादीनामेषा क्रिया न जायते। तथा मनुष्यादिव्यक्तीनां नाशेऽपि मनुष्यत्वादीनामेषा क्रिया न प्रवर्तते। तेनैतेषां जातिः न विनश्यति, अतः कुमारत्वादिजातीनां सम्प्रत्ययो भवत्येव।

भिन्नेष्वप्यभिन्नमित्यनेन एकत्वं लक्षितं भवति छिन्नेष्वपि अछिन्नमित्यनेन जातेरनित्यत्वमभिप्रेतं भवति। अत एव आह नागेशः वस्तुतस्तु भिन्नेष्वभिन्नं छिन्नेष्वछिन्नमिति पश्पशास्थ भाष्यबोधितं नित्यत्वे एकत्वे च सत्येकानुगतत्वमेव जातिलक्षणं भाष्यसम्मतं ब्राह्मणत्वघटत्वादिसाधारणम् इति[31]।

चतुर्थेऽस्मिन् जातेर्लक्षणे पतञ्जलिना सामान्यभूतशब्दस्य उपयोगः कृतः अत्र भर्तृहरिणा भूतशब्दः उपमावाची इत्युक्तम्[32]। कैयटाचार्योऽपि भूतशब्दम् उपमार्थे स्वीकरोति। अतः सामान्यभूतशब्दस्य अर्थः सामान्यम् इव इति भवति। अत्र सत्ताख्यमहासामान्यं गोत्वादेः उपमानमस्ति।

जात्याकृत्योर्मध्ये अस्ति कश्चिद् भेदः। आकृतेः सम्बन्धः सदा अवयवसंस्थानाद् भवति।जातिश्च पुनः अवयवसंस्थाननिरपेक्षापि भवितुं शक्नोति। परन्तु भर्तृहरिमते भाष्यकर्तु उपर्युक्तजातिलक्षणे आकृतिशब्दः जातिपूरकोऽस्ति। तथाहि -आकृतिरिति न तत्संस्थानम् किं तर्हि जातिरेव। यथा आकृत्याभिधानं वाजप्यायनः इति। आक्रियते अनयेति आकृतिः। आक्रियते भिद्यते पदार्थान्तरेभ्यः इत्याकृतिः[33]।

वाक्यपदीयपदकाण्डस्थजातिसमुद्देशानुसारं यदा पदार्थः विवेच्यते तदा तत्र आचार्यभर्तृहरिणा इदं स्वीकृतं यत् -

सत्याऽसत्यौ तु यौ भावौ प्रतिभावं व्यवस्थितौ।
सत्यं यत् तत्र सा जातिः असत्या व्यक्तयो मताः[34]॥ इति

63) जातेरस्त्रीविषयादयोपधात्। अतएव नागेशेन प्रातिकात् इति सूत्रशेखरे उक्तं वयोवाचिनां वैकल्पिक जाति। कार्यं भाष्ये दृष्टमस्ति

30 म.भा.पस्प.

31 म.भा., 4-1-63 जातेस्त्रीविषयादयोपधात्

32 भूतशब्दः उपमावाची, इति म.भा.दी., पृ. 3, पूना संस्करणम्

33 म.भा., 3-3-133 क्षिप्रवचने लृट्

34 वा.प., जातिसमुद्देशः 11

अर्थात् प्रतिभावं प्रतिपदार्थं तु यौ सत्यासत्यौ भावौ व्यवस्थितौ सन् घटः, सन् पटः इत्याद्यनुभवेन निश्चितौ। तत्र यत् सत्यं सा जातिः। अद्वैतमते एकस्य ब्राह्मणः पारमार्थिकत्वमिति वस्तुतः भावभेदाऽभावे अपि परमतेन वस्तूनां भेदमाश्रित्य प्रतिभावमिति वीप्सा ज्ञेया।

सत्ताजातिवादः भर्तृहरिणा स्वयमेव प्रतिपादितः। सत्ता जातिः विभिन्नपदार्थेभ्यो भिन्ना सती सम्बन्धभेदमाश्रित्य जातिरित्युच्यते -

सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते तस्यां सर्वे शब्दाः व्यवस्थिताः[35]॥ इति

अश्वस्य सत्ता अश्वत्वमस्ति, एतदतिरिक्तम् अन्यत् किमपि वस्तु नास्ति। गोः सत्ता गोत्वमस्ति। एवमेव डित्थस्याऽपि सत्ता डित्थत्वमस्ति। सर्वे शब्दाः सत्ता मात्रस्य वाचकाः सन्ति। सत्ताविषये महाविषये महाभाष्येऽपि दृश्यते - तत्र बुद्ध्या नित्यां सत्तामध्यवस्यस्ति[36] इति। तथा न सत्तां व्यभिचरति[37] इति च। अस्य व्याख्यायां भर्तृहरिणा महाभाष्यदीपिकायामुक्तं यत् सत्ता जातिरस्ति। सा एव महासामान्यमिति महासत्ता इति च निगद्यते। अभावस्याऽपि बुद्धिकल्पिताकाराद् निरूपणं भवति। सत्तया सह अभावस्य सम्बन्धोऽस्ति। सत्ता प्रातिपदिकार्थ इत्युच्यते। सा नित्यास्ति। महानात्मा स एव अस्ति पाणिनिना त्वतलप्रत्ययाभ्यां तस्या एव निर्देशः कृतः। त्वतलादयः भावे भवन्ति। शब्दानां प्रवृत्तिनिमित्तमेव भाव इत्युच्यते। कस्यचिदपि शब्दस्य भावः सत्तातिरिक्तमन्यत् किं भवितुमर्हति। ब्रह्मरूपसत्ता साध्यात्मना प्रतीयमाना धातुभिरप्यभिधीयते -

तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥
प्राप्तक्रमा विशेषेषु क्रिया सैवाभिधीयते।
क्रमरुपस्य संहारे तत्सत्वमिति कथ्यते[38]॥ इति

पाकादिक्रियायाः विशेषेषु अधिश्रयणाद्यधःश्रयणान्तादिषु स्थितारोपलब्धक्रमा क्रियासत्ता एवाऽस्ति।अर्थात् पौर्वापर्यक्रमत्वेन सत्ता एव सक्रमा सती-सक्रमा धातुवाच्या क्रिया अस्ति। तत्तत्साधनसम्पर्कात् पौर्वापर्य्येण सन्तन्यमा-

---

35 वा.प., जातिसमुद्देशः 33
36 म.भा., 3-3-133 क्षिप्रवचने लृट्
37 म.भा., 5-2-94 तदस्यास्त्यस्मिन्निति मतुप् प्रातिपदिकार्थः सत्ता इति कारिका
38 वा.प., जातिसम्ममुद्देशे 34-35

नरूपाणाम् अधिश्रयणाद्यधःश्रयणान्तादीनां क्रियाणाम् अपरामर्शे पाकत्वादिरूपेण तत्समुदायस्यैव परामर्शे सति अलब्धक्रमा सिद्धस्वभावा सत्तैव द्रव्यमित्युच्यते।षड्भावविकाराणां योनिरपि सा एव। तथाहि -

सैव भावविकारेषु षडवस्थाः प्रपद्यते।
क्रमेण शक्तिभिः स्वाभिः एवम्प्रत्यवभाषते[39]॥इति।

क्रमाख्यशक्तेरपि मूलं सा एव सत्ताऽस्ति।सत्ताजातिवादस्य विवेचनं भर्तृहरिणा सांख्यादिदर्शनदिशाऽपि कृतम्।

**उपसंहारः**

भर्तृहरेरयं स्वभावोऽस्ति यत् सः एतादृशप्रसङ्गेषु अन्यदर्शनदर्शितमान्यतानामपि सङ्केतङ्करोति। सर्वशब्दवाच्या सत्तैवास्ति। अत एव जातिपदार्थस्य व्यक्तिरप्युत्पन्ना भवति। यद्यपि भर्तृहरिणा द्रव्यपदार्थविवेचने ब्रह्मद्रव्युपाधिभेदात् भिन्नं भिन्नमित्युक्तं तथापि तात्पर्यभेदावस्थाभेदोऽवगन्तव्यः। जातिपदार्थपक्षे जातिरूपे सर्वत्र ब्रह्म विवक्षितमस्ति। तथा द्रव्यपदार्थपक्षे ब्रह्मपरिनिष्ठितरूपे विवक्षितमस्ति। सोऽयं दार्शनिको विकल्पः। वस्तुतः। परमार्थतया उभयोः पक्षयोरनुगतमेकमेव तत्वमस्ति तच्च सत्तैवास्ति।

आचार्यभर्तृहरिणा जातिविषये स्वकीयं मतमन्यदर्शनसन्दर्भे प्रतिपादितमस्ति। सत्ताजातिवादे द्रव्यस्यापि सत्वरूपेण स्वीकारात् सिद्धस्वभावसत्ता एव सत्वं द्रव्यमित्युक्तम्।

**परिशिष्टखण्डः**

## अपोहवादिनां बौद्धानां मतम् -

बौद्धानां सौगतानां सम्बन्धि काल्पनिकं जातिदर्शनं कथयन्नेवमाह भर्तृहरिः -

अनुप्रवृत्तेति यथा भिन्ना बुद्धिः प्रतीयते।
अर्थो व्यावृत्तरूपोऽपि तथा तत्वेन गृह्यते॥

अस्यायमभिप्रायः - इहाभिन्नबुद्धिग्राह्या गोत्वघटत्वादिरूपा जातिरिति जातिवादिभिः उच्यते। न च वस्तुतोऽभिन्ना बुद्धिरस्ति, अर्थभेदेन बुद्धीनां भेदात्।

[39] वा.प., जातिसमुद्देशे 36 व्यक्तिविवेककारः

नहि एकगोव्यक्तिविषयकः प्रत्ययः स एव द्वितीयगोव्यक्तिविषयको नत्वन्यः इति वक्तुं शक्यते। अतो नैव भिन्नेष्वभिन्नः कश्चित् प्रत्ययः। केवलं भिन्नापि वस्तुतो बुद्धिः प्रतिव्यक्त्यनुप्रवृत्ताऽनुगते अभिन्ना प्रतीयते।

तत्र च न बुद्धिस्वरूपं विहाय अन्यत् विषयस्य ज्ञानाकारत्वे गोत्वादिकं भेदे च ज्ञानत्वादिकं वाऽस्ति। सामान्यस्यापि योऽभिन्नः प्रत्ययः तस्य प्रतिबुद्धिभेदात्। तत्राप्यन्यसामान्यकल्पनाया मनवस्थानात्। किञ्च न तत्र बुद्धिगतस्य कल्प्यस्य अपरसामान्यस्य असाधरणः कश्चित् वाचकोऽस्ति, येन तत्र किञ्चित् सामान्यं नाम कल्प्येत।

अनवस्थादोषः तत्समाधानम् -

या शब्दजातिः शब्देषु शब्देभ्यो भिन्नलक्षणा।
जातिः सा शब्दजातित्वमप्यतिक्रम्य वर्तते॥[40]

शब्दजातयः इमाः इत्यत्र शब्दपदेन गोशब्दादीनामेव शब्दजातिशब्दस्यापि अभिधानेन संग्रहात् गोशब्दत्वजातिवत् शब्दजातिपदेनैव शब्दजातिशब्दगताऽपि जातिः प्रत्याय्यते।

**वैशेषिकनये जातिपदार्थः -**

अनुप्रवृत्तिधर्मो वा जातिस्स्यात् सर्वजातिषु।
व्यावृत्तिधर्मसामान्यं विशेषे जातिरिष्यते॥[41]

अर्थात् विशेषे क्रियादिरूपे तु व्यावृत्तिरूपं व्यावर्तकत्वरूपं धर्मसामान्यं साधारणो धर्मो जातिः इष्यते। विशेषेषु साधरणस्यैव धर्मस्य व्यावृत्तिरूपस्य जातित्वमभ्युपगम्यते।

**आकाशेऽपि जातिः -**

संयोगिधर्मभेदेन देशे च परिकल्पिते।
तेषु देशेषु सामान्यमाकाशस्यापि विद्यते॥[42]

[40] वा.प., ३-1-10

[41] वा.प., ३-1-14

[42] वा.प., ३-1-15

अर्थात् - संयोगिनाम् अकाशसंयोगिनां घटादीनां यो धर्मभेदः धर्मविशेषः प्रत्यक्षादिप्रमाणसिद्धः परिमितत्वरूपस्तेनाकाशस्यापि देशे परिकल्पितेरूसति तेषु घटादिपरिमितेषु देशेषु स्थितस्य आकाशस्यापि परत्वसामान्यस्य इदमाकाशम् इदमाकाशम् इत्यभिन्नाभिधानप्रत्ययनिमित्तमाकाशरूपं सामान्यं विद्यते। आकाश इत्युपलक्षणम्। पदार्थान्तरस्यापि।

**सांख्यमते जातिः -**

सांख्यनयेन जगतो मूलकारणं सर्वकारणत्वेन सर्वानुगतत्वेन च सामान्यरूपं प्रधानमाश्रित्य, अथवा अद्वैतनयेन सत्तासामान्यरूपं सर्वकारणं सर्वानुगतं च ब्रह्मैव निदर्शनं कृत्वा सादृश्यसमर्थाभ्यां व्यतिरिक्तां घटत्त्वादिजातिं समर्थयन्ति सांख्याः -

यदा भेदान् परित्यज्य बुद्ध्यैक इव गृह्यते।
व्यक्त्यात्मैव तदा तत्र बुद्धिरेका प्रवर्तते॥[43]

अर्थात् - इह सर्वेषु भावेषु प्रत्येतृभेदेन सुखदुःखमोहात्मकत्वस्य अनुभवेन कारणत्वेन तदनुगतस्य प्रधानस्यापि सुःखदुःखमोहत्मकत्वं गुणत्रयात्मकत्वं च कल्प्यते इति सांख्या। एकस्यैव प्रधानस्य ब्रह्मणो वा कार्यरूपेण अनेकधावस्थानात्। सर्व एकस्यैव प्रधानस्य परिणामः इति सांख्यैः, एकस्यैव ब्रह्मणो विवर्त इति अद्वैतिभिः अभ्युपगमात्। एवञ्च कार्यकारणयोः धर्मिधर्मिणोः सामान्यविशेषयोश्च नात्यन्तं भेदः नाप्यत्यन्ताभेदः।सन् घटः इति सामानाधिकरण्येन प्रतीतेः।

**शब्दसंकेत**

1. अष्टा. - अष्टाध्यायी
2. गोप. - गोपथब्राह्मणम्
3. म.भा.दी. - महाभाष्यदीपिका
4. म.भा.पस्प. - महाभाष्य पस्पशाह्निक
5. म.भा. -महाभाष्यम्
6. वा.प. - वाक्यपदीयम्

[43] वा.प., 3-1-96

## सन्दर्भग्रन्थसूची

1. Mahabhashya dipika of Bhartrihari, critically edited by G.V. Devasthali and G.B. Palsule, Bhandarkar Oriental Research Institute, Poona, 1989
2. गोपथब्राह्मणम्, संपा. श्रीजीवानन्दविद्यासागर, कलिकातानगरी, १८९१
3. पाणिनिविरचिता अष्टाध्यायी, परिष्कर्ता श्रीगोपालदत्तशास्त्री, सम्पा. श्री गोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन ग्रन्थमाला, २०१७
4. बृहदारण्यकोपनिषत्, सम्पा. महादेव चिमणजी आप्टे, आनन्दाश्रम मुद्र-णालय, १८९१
5. वाक्यपदीयम्, भर्तृहरि, रघुनाथशर्मप्रणीत-अम्बाकर्त्रीव्याख्यासहितम्, वाराणसेयसंस्कृतविश्वविद्यालय, वाराणसी, १९६३
6. श्रीमन्महर्षिपतञ्जलिविनिर्मितं पाणिनीयव्याकरणमहाभाष्यम्, श्रीमन्नागेश-भट्टविरचित भाष्यप्रदीपोद्योतोद्भासितेन, 1-6 खण्डः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९८७

✿✿✿

# सिद्धान्तचिन्तामणौ पण्डितश्रीरामप्रसादत्रिपाठिनोपज्ञाताः सिद्धान्ताः (सिद्धान्तचिन्तामणिसन्दर्भे)

रामसलाही द्विवेदी

"श्रीगुरुभ्यो नमः"

लोकस्य सम्यक् संचालनाय शास्त्रव्यवस्थाव्यापितोऽनादिभूतः कश्चिन्नियम-विशेषो भगवता व्यवस्थापितः । अयं नियमो वेदाधीनः, वेदाश्च भगवत्स्वरूपा एव। तदेवोक्तम् -

पदाङ्गसन्धिपर्वाणं स्वरव्यञ्जनभूषितम्।
तमक्षरं दिव्यमाहुः नारायणं परं प्रभुम्॥[1]

एतेन भगवन्नारायणस्य सपर्यायां समग्राणि शास्त्राणि तत्पराणि भवन्ति। तथा च तत्र शास्त्रेषु प्रकल्पितचित्ताः समर्थितजीवनाः केचन विरला एव भवन्ति महात्मोनः । तदेवोक्तम् -

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । इत्यादि।

तत्रैव शास्त्रनिष्ठातत्परेषु अत्यन्तन्निपुणाः सुधियः सेवन्ते यां तामाहुः काशीमिति, तत्रस्था विद्वत्परम्परा वृहत्तरा तत्रैवाभूवन् हरिनारायणत्रिपाठिमहाभागाः तेषां शिष्यपरम्परासु अत्यन्तं विज्ञानचणाः शास्त्रविशारदाः नैकशास्त्रविचक्षणाः परं वैयाकरणाः पण्डितश्रीरामप्रसादत्रिपाठिनोऽभूवन् इति। एतेषां जनिः जौनपुरजन-पदे समभूत्। एते स्वप्रतिभया सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदवेदाङ्गसंकाय आध्यक्ष्यं वोढ्वा संस्कृतसमाजस्य महत्तरोपकारं कृतवन्तः। एतेऽतीव सरला आसन्, आसूर्योदयात् सायं यावत् समग्रं दिनम् अध्यापनमेव परमं कर्म आसीत्। एतैः बहुविधाः ग्रन्थाः प्रकल्पिताः । तत्र प्रमुखाः ग्रन्थाः प्रमाणमीमांसा, सिद्धान्त-चिन्तामणिः, वैयाकरणसिद्धान्तलघुमञ्जूषायाः सरलाख्यं व्याख्यानम् एवञ्च वैयाक-रणभूषणसारे एतदभिधानमेव टिप्पणं, शिक्षासंग्रहग्रन्थस्य सम्पादनं किञ्च बहुवि-धानां तन्त्रशास्त्राणां सम्पादनम् इत्यादि। तत्र सर्वत्रापि यदेभिः प्रकल्पितं तत्स-र्वमेव विलक्षणम् अपूर्वञ्च। भवन्तः जानन्ति यद् व्याकरणशास्त्रम् अष्टाध्यायीमयं

---

1 गीतायाः पृष्ठभागे पञ्चरत्न्याम्

वर्तते। सा चाष्टाध्यायी सामान्यविशेषलक्षणैः सूत्रैः मण्डिता वर्तते। अत्र सामान्यविशेषधर्ममधिकृत्य कश्चिन्नियमविशेषोऽपि पूज्यचरणैः श्रीरामप्रसादत्रिपाठिमहाभागैः यल्लक्षणजातम् उपज्ञातं तत्सर्वमतिविदग्धमेव। तस्य एव केचनांशाः तद्ग्रन्थात् सिद्धान्तचिन्तामणिरित्याख्यात् इहोपनिबध्यन्ते।

तत्रादौ सूत्रस्य लक्षणमवश्यं ज्ञातव्यम्। सामान्यज्ञाने सत्येव तद्विशेषज्ञानस्यौचित्यात्। तच्च -

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥[2]

इति शिष्टानुसारं सारवदल्पाक्षरत्वे सति, विश्वतोमुखत्वे सति, स्तोभरहितत्वे च सति, निश्चयात्मकज्ञानजनकवाक्यत्वमिति सूत्रलक्षणं प्राप्तं भवति। "वर्णेनाप्यनर्थकेन न भवितव्यं किं पुनरियता शास्त्रेण"[3], "सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्"[4], "सूत्रं हि नाम तद् ध्वति, भ्रमति, मूहूर्तमपि नावतिष्ठते"[5] इत्यादिभाष्योक्तिभिरिदं लक्षणं पूर्णतया समर्थितं भवति। अष्टाध्यायीसूत्रेषु लक्षणमेतत् संघटत एव, नास्त्यत्र संशयलेशः, तच्चेदं षट्षु भागेषु विभाजयितुं शक्यते।

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥[6]

अत्र सूत्रलक्षणमित्यत्र लक्षणपदं स्वरूपपरं न त्वसाधारणधर्मरूपलक्षणपरमतो नासम्भवदोषग्रस्तता।

ननु 'अ इ उ ण् इत्यादीनामिष्टान् वर्णान् श्रोत्स्यामहे'[7] इति भाष्योक्त्या वर्णसाधुत्वविधायकतया विधिसूत्रत्वं प्राप्तम्। आदिरन्त्येन सहेतेत्यनेनैकवाक्यतया शक्तिग्राहकत्वं तथा संज्ञासूत्रत्वमपि प्राप्तम्।[8] तर्हि विधिपदार्थः कथं संगच्छेत्? यतश्च – स्वसमभिव्याहृतपदार्थताऽवच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकबोधानुकूलो व्यापारो विधिपदार्थः।[9] एतेन ज्ञायते यद् विधिपदसमभिव्या-

2 ल.श.शे., अभिनवचन्द्रिका टीका, पृष्ठ-३
3 म.भा.-अष्टा., १/३/१
4 तत्रैव ६/१/७
5 तत्रैव १/३/३
6 ल.श.शे., अभिनवचन्द्रिका टीका, पृष्ठ-३
7 महा., १/२ अइउण् सूत्र
8 ल.श.शे., अभिनवचन्द्रिका टीका, संज्ञाप्रकरण-५
9 तत्रैव

हृतं पदं सूत्रपदम्, तदर्थतावच्छेदको धर्मः सूत्रत्वम्, तद्व्याप्यमिथोविरुद्धाः यावन्तो धर्माः संज्ञात्वपरिभाषात्वादयः षट्संख्यकाः, तत्प्रकारको बोधः संज्ञात्वेन संज्ञा इति परिभाषात्वेन परिभाषा इति संज्ञात्वादिप्रकारको बोधः, तदनुकूलो व्यापारः संज्ञा च परिभाषा चेत्यादिशब्दप्रयोगरूप ईदृशविधिपदार्थ एकत्र सूत्रे संज्ञात्वविधित्वयोरेकत्र द्वयोः धर्मयोः समावेशेन संघटते। सूत्रत्वव्याप्ययोः संज्ञात्वविधित्वयोरेकत्र स्थित्या सहानवस्थानलक्षणविरोधाभावात्। अत्रोच्यते – षड्विधं सूत्रलक्षणमित्यत्र सूत्रपदं भावप्रधाननिर्देशमहिम्ना सूत्रत्वपरम्, एवञ्च तदर्थताऽवच्छेदकं सूत्रत्वत्वम्, तद्व्याप्यधर्माः संज्ञात्वत्वपरिभाषात्वत्वादयः। तेषां मिथः विरोधो विद्यत एव। 'उपधेयसांकर्येऽपि उपाध्योरसांकर्यात्' इति हेत्वाभासशिरोमणिग्रन्थोक्तन्यायेन समाधानस्य सुलभत्वात्। यतो हि संज्ञात्वं विधित्वं चैकसूत्रे वर्तता नाम, परन्तु संज्ञात्वत्वन्तु संज्ञात्व एव, विधित्वत्वन्तु विधित्व एवेति कृत्वा नानयोः सामानाधिकरण्यलक्षणः संकरः।[10]

शक्तिनियामकत्वं संज्ञासूत्रत्वम्।[11] संज्ञासूत्रं द्विविधम् – शब्दसंज्ञाऽर्थसंज्ञाभेदात्। वृद्धिगुणप्रभृतिसंज्ञाः शब्दसंज्ञाः, लोपकर्मकरणप्रभृतयोऽर्थसंज्ञाः। अन्वर्थानन्वर्थभेदाभ्यामपि तद्द्विविधम् – आद्यं सर्वनामकारक-अव्ययप्रभृतिसंज्ञासूत्रम्। घिघुभप्रभृतिसंज्ञा अनन्वर्थाः। सर्वनामादिसंज्ञानामन्वर्थं नाम स्वावयवार्थबोधकत्वम्। यथा सर्वेषां नाम सर्वनाम इति व्युत्पत्त्या सर्वनामपदं स्वीयप्रधानसर्वार्थबोधकमिति। तादृशामेव सर्वनामसंज्ञा भविष्यति नेतरेषाम्। टिषु भादिष्वियं स्थितिर्नास्तीति ता अनन्वर्थाः। सर्वे संज्ञाशब्दाः स्वार्थ(संज्ञि)निरूपितशक्तिग्राहकाः, यथा वृद्धिशब्दो आदैज्निरूपितशक्तिग्रहजनक इति तस्य संज्ञात्वं सम्मान्यते।

स्वदेशे लक्ष्यासंस्कारकबोधजनकत्वे सति विधिसूत्रैकवाक्यतया बोधजनकत्वम्।[12] अधिकारसूत्रेऽतिव्याप्तिवारणाय सत्यन्तदलम्। यदि पुनरपि 'अङ्गस्य[13]-भस्य[14]-विभाषा[15]' इत्यादिषु सूत्रेष्वतिप्रसंगवारणायाऽधिकारसूत्रलक्षणे 'स्वदेशे वाक्यार्थशून्यत्वे सति' इत्यंशमधिकारलक्षणे निवेश्य परिभाषालक्षणे सत्यन्तदलं नोपादेयमित्युच्यते। तन्न युक्तियुक्तम्, 'शेषे' इत्यत्राव्याप्तिप्रसंगात्। यदि तु 'शेषे'[16] इत्यस्यावृत्या एकस्य विधित्वमपरस्याधिकारत्वमित्युच्येत, तदिदमपि सुव-

---

10 तत्रैव-९
11 तत्रैव-९
12 सि.चि., भूमिका पृष्ठ-९
13 अष्टा., ६/४/१
14 अष्टा., ६/४/१२९
15 अष्टा., २/१/११
16 अष्टा., ४/२/९२

चमिति वक्तुं शक्यते। किन्तु तावताऽपि यदि 'पूर्वत्रासिद्धम्'[17] 'प्राग्दीव्यतोऽण्'[18] इत्यादौ वाक्यार्थबोधशून्यत्वाभावेनाव्याप्तिप्रसंग उच्यते, तद्वारणाय यदि साक्षाल्लक्ष्यसंस्कारकवाक्यार्थशून्यत्वे सतीत्येव परिष्क्रियते तदा पुनरपि परिभाषासूत्रेण सांकर्यमागतमेव तदपाकरणाय 'प्रतिज्ञाविषयस्वरितधर्मविशिष्टत्वमिति' पर्यवसितमधिकारसूत्रलक्षणं वक्तव्यम्। नन्वेवमपि 'इको यणची'त्यादौ अच्पदे स्वरितत्वप्रतिज्ञावशादतिव्याप्तिरिति चेदत्रोच्यते – 'प्रतिज्ञातस्वरितस्वरितधर्मविशिष्टत्वे सति सूत्रत्वम्' इति सूत्रलक्षणेनाचीत्यस्य सूत्रत्वाभावेन दोषाभावः। न च 'समर्थानां प्रथमाद्वा'[19] 'अलुगुत्तरपदे'[20] इत्यादौ प्रत्येकं पद एव स्वरितत्वं प्रतिज्ञातं न तु सूत्रे, अत एवोक्तं मूले कौमुद्याम् - 'इदं पदत्रयमधिक्रियते' इत्यादीति वाच्य्यम्, 'प्रतिज्ञातस्वरितधर्मविशिष्टत्वे सति सूत्रत्वमिति परिष्कारेण सर्वदोषनिरासात्।

वैशिष्ट्यञ्च स्वोद्देश्यत्व-स्वविशिष्टपदविशिष्टत्वेत्येतदन्यतरसम्बन्धेन। पुनर्वैशिष्ट्यम् – स्वोद्देश्यपदघटितत्वस्वानुद्देश्यपदाघटितत्वेतदुभयसम्बन्धेन। 'पूर्वत्रासिद्धम्' 'प्राग्दीव्यतोऽण्' इत्यादौ सूत्रमुद्दिश्य स्वरितत्वं विहितमिति तत्राद्यसम्बन्धः। 'समर्थानां प्रथमाद्वा'[21] इत्याद्यर्थं द्वितीयः सम्बन्धः। 'इको यणची'त्यादावतिव्याप्तिर्न शङ्कनीया स्वानुद्देश्ययणादिपदघटितत्वात्।

यत्र क्वचन 'अनुस्वारस्य ययि परसवर्णः'[22] इत्यादौ पकारे सकारे पदैकदेशे स्वरितत्वप्रतिज्ञा कृतास्ति। तत्रैकदेशेन समग्रं पदं लक्ष्यते सामर्थ्यात्। स्वरितत्वप्रतिज्ञाविचारः 'स्वरितेनाधिकारः'[23] इति सूत्रव्याख्याने शब्देन्दुशेखरे महाभाष्यादौ च कृतोऽस्ति। यस्मिन् सूत्रे पदे वा स्वरितत्वं प्रतिज्ञातं तस्यैवोत्तरोत्तरमनुवृत्तिर्भवति। पुनश्च भाष्यव्याख्यानान्निवृत्तिरपि बोध्यते। क्वचन स्वरितत्वप्रतिज्ञाबलेन कस्यचन पदस्यापकर्षोऽपि भवति। अतश्चोत्तरोत्तरगमनमधिकारत्वव्यापकं नास्ति। अस्तु, एतावता विवरणेनेदमायातं यत् परिभाषासूत्रस्य लक्षणम् - 'विधिसूत्रैकवाक्यतया शाब्दबोधजनकत्वम्' सा चेयमेकवाक्यता त्रिविधा भवति। वाक्यैकवाक्यता, पदैकवाक्यता, पदार्थैकवाक्यता च। तत्रोपजीव्योपजीवकभावापन्नबोधप्रयोजकत्वरूपाऽऽद्या। यथा 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[24] इति परिभाषासूत्रस्य

---

[17] अष्टा., ८/२/१
[18] अष्टा., ४/१/८३
[19] अष्टा., ४/१/८२
[20] अष्टा., ६/३/१
[21] अष्टा., ४/१/८२
[22] अष्टा., ८/४/५८
[23] अष्टा., १/३/११
[24] अष्टा., १/१/६६

वाक्यार्थबोध उपजीव्यः, 'इको यणचि'[25] इत्यस्य विधिसूत्रस्य वाक्यार्थबोध उपजीवक इति कृत्वा द्वयोः वाक्ययोरेकवाक्यतायामुपजीव्योपजीवकभावापन्नो बोधः समायात इति। तादृशबोधप्रयोजिकेयमेकवाक्यता वाक्यैकवाक्यताऽस्ति। यतो हि 'इको यणची'त्यस्य पूर्वं सामान्यतो बोधो भवति। अच्समीपवर्तिन इकः स्थाने यण् भवतु, अनेन बोधेनेदं सूत्रं 'सुधी+उपास्यः' इत्यत्रोकारेऽपि प्रसक्तम्। अतश्च तस्मिन्निति परिभाषासूत्रं सहायकं मत्वा ततोऽव्यवहितपूर्वांशं लब्ध्वा अजव्यवहितपूर्वस्येकः स्थाने यण् भवत्विति वाक्यार्थं बोधयित्वाऽनिष्टप्रसंगान्निवर्तते।

एवमेव 'प्रयाजैश्चरन्ती'त्याद्यङ्गवाक्यानां 'दर्शपूर्णमासाभ्यां यजते' इत्याद्यङ्गवाक्यानाञ्च परस्परं वाक्यैकवाक्यता द्रष्टव्या। परस्परनिरूप्यनिरूपकभावापन्नविषयताप्रयोजकपदघटितत्वं पदैकवाक्यत्वम्। यथा 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'त्यस्य 'इको यणची'ति विधिशास्त्रेण सह। तथाहि तस्मिन्नित्यतो 'निर्दिष्टे पूर्वस्य' इति पदद्वयम् 'इको यणची'त्यत्रोपतिष्ठते। निर्दिष्टेऽचि पूर्वस्येको यण् स्यादिति सूत्रार्थः सम्पद्यते। तत्र 'निर्दिष्टे' इति प्रकारताप्रयोजकं पदम्, 'अचि' इति च तन्निरूपितविशेष्यताप्रयोजकं पदम्। अतश्च निरूप्यनिरूपकभावापन्नविषयताप्रयोजकमिदं पदद्वयम्, 'निर्दिष्टे' इति 'अचि' इति च तद्घटितत्वम् – इको यणचीति सूत्रीयवाक्यस्येति समन्वयो बोध्यः।

पदार्थैकवाक्यत्वञ्च - "परस्परनिरूपकभावापन्नविषयताश्रयत्वम्"। तच्चापि पूर्वोक्तयोः सूत्रयोरस्त्येव। 'निर्दिष्टे, अचि' इत्यनयोर्यावर्थौ तयोः परस्परं तादृशविषयताश्रयत्वमस्त्येव। अनियमे सति नियमकारित्वं परिभाषासूत्रस्वभावो न विस्मर्तव्यः।

वतिप्रत्ययघटितत्वमतिदेशसूत्रलक्षणम्।[26] यस्य सूत्रस्य घटकीभूतं पदं वतिप्रत्ययप्रकृतित्वेन गृहीतं भवति अथवा विनाऽपि वतिं वृत्यर्थस्तत्र ज्ञातो भवेत् तत्सूत्रमतिदेशसूत्रं कथ्यते। यथा 'स्थानिवदादेशोऽनल्विधा'[27]विति स्थानिवत्पदघटितमेवास्ते। 'असंयोगाल्लिट् कित्'[28] 'गाङ्कुटादिभ्योऽञ्णिन्ङित्'[29] इत्यादीनि द्वितीयस्योदाहरणानि, किद्वत् ङिद्वत् इत्याद्यर्थकरणाद् आरोपबोधकत्वमस्य स्वरूपम्।

अयमाशयः - अन्यस्य धर्मोऽन्यस्मिन्नतिदिश्यते आरोप्यते अनेन इति

25 अष्टा., ६/१/७७
26 सि.चि., भूमिका पृष्ठ-११
27 अष्टा., १/१/५६
28 अष्टा., १/२/५
29 अष्टा., १/२/१

कृत्वाऽऽरोपबोधकत्वं तस्योच्यते। यथा – स्थानिवृत्तिधर्मः आदेशे आरोप्यते स्थानिवदादेश इत्यनेन। तत्फलं भवति - 'रामाय' इति प्रयोगे 'ङेर्यः'[30] इत्यनेन यादेशे कृते सति तत्र ङेवृत्तिः सुप्त्वधर्मः आरोपितोऽनेन ततश्च 'सुपि चे'[31]ति सूत्रेण दीर्घः सिद्धो भवति। अत एव अतस्मिन् तद्धर्मारोपः क्रियतेऽनेन। एतावदेवागतम् – यद् विधिसंज्ञादिसूत्राणां क्षेत्रवर्धनं क्रियतेऽतिदेशशास्त्रेण। अतिदेशसूत्रं षड्विधं भवति। तथाहि निमित्त-व्यपदेश-तादात्म्य-शास्त्र-कार्यरूप-विषयकत्वेनाऽतिदेशस्य षड्विधत्वमिति मनोरमायामुक्तम्। 'पूर्ववत्सनः' इत्यादीन्युदाहरणान्यपि तदीयशब्दरत्ने दत्तानि।

साक्षाल्लक्ष्यसंस्कारकसाधुत्वप्रकारकबोधजनकत्वं विधिसूत्रस्य लक्षणमुक्तं शब्देन्दुशेखरस्य अभिनवचन्द्रिकाटीकायाम्। इदं च विधिसूत्रं द्विविधं द्रष्टव्यम् – उत्सर्गापवादभेदाभ्याम्। सामान्यरूपेण कस्यचन कार्यस्य विधायकं सूत्रमुत्सर्गसूत्रं कथ्यते। यथा 'कर्मण्यण्'[32] इत्यादि। विशेषरूपेण तत्कार्यस्य विधायकं सूत्रमपवादसूत्रमुच्यते। यथा - 'आतोऽनुपसर्गे कः'[33] इत्यादि। इदं सूत्रं कर्मवाचकपद उपपदे सत्युपसर्गरहितादादन्ताद्धातोः कप्रत्ययं कर्त्रर्थे विदधाति। 'कर्मण्यण्' इति सूत्रन्तु कर्मवाचक उपपदे सति धातोरण्प्रत्ययं कर्तरि विदधाति। तदीयोद्देश्यतावच्छेदको धर्मः कर्मवाचकोपपदधातुवृत्तिधातुत्वम्। 'आतोऽनुपसर्गे कः' इत्यस्योद्देश्यतावच्छेदको धर्मः कर्मवाचकोपपदकानुपसृष्टादन्तधातुत्वम्। एषश्च धर्मो व्याप्यः 'कर्मण्यण्' इत्यस्योद्देश्यतावच्छेदकः कर्मवाचकोपपदधातुवृत्तिधातुत्वम्। एषश्च 'आतोऽनुपसर्गे कः' एतदीयोद्देश्यतावच्छेदकव्यापकः। यतश्च यत्र यत्र कर्मवाचकोपपदकानुपसृष्टादन्तधातुवृत्तिधातुत्वं तत्र तत्र कर्मवाचकोपपदकधातुवृत्तिधातुत्वं वर्तत एव। अत एतेनापवादशास्त्रेण न प्राप्तस्योत्सर्गशास्त्रस्य बोधो भवति। अत एव च व्याप्यधर्मावच्छिन्नातिरिक्तत्वे न व्यापकधर्मावच्छिन्ने उत्सर्गशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचो भवतीति सिद्धान्तः पर्यवसन्न उत्सर्गापवादयोः शास्त्रयोः।

अन्यनिवृत्तिफलकत्वे सति सिद्धार्थप्रतिपादकत्वमिति लक्षणमुक्तं नियमसूत्रस्य। अन्यदपि लक्षणमुक्तम् - 'यत्किञ्चिच्छास्त्रविशिष्टत्वम्' इति, वैशिष्ट्यञ्च स्वविशिष्टोद्देश्यतावच्छेदकावच्छिन्नोद्देश्यताकत्वम्, स्वविधेयतावच्छेदकावच्छिन्नविधेयताकत्वोभयसम्बन्धेन। सम्बन्धघटकवैशिष्ट्यञ्च स्वविधेयत्वस्वविधेयाभाववत्वोभयसम्बन्धेन। यथा 'व्रीहीनवहन्ति' इत्यत्र व्रीहीणां चरुनिमित्तं तण्डुलाः सम्पाद्या इति

[30] अष्टा., ७/१/१३
[31] अष्टा., ७/०३/१०२
[32] अष्टा., ३/२/१
[33] अष्टा., ३/२/३

वाक्येन कदाचिन्नखविदलनेन कदाचिदवघातेन च तत्सम्पादनस्य व्रीहिषु यथेच्छं प्राप्ततया नखविदलनेन पक्षेऽवघाताभावस्य सत्त्वेन लक्षणसमन्वयः। एवमेव 'ऋतौ भार्यामुपेयात्' इत्यादौ रागप्राप्तस्य नियमेन रागेण कदाचित् गमनस्य कदाचित् तदभावस्यापि प्राप्ततया समन्वय ऊहनीयः। इदं च नियमस्वरूपं पाक्षिकप्राप्तौ सत्यां बोध्यम्। उक्तञ्च –

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥[34]

विधेरुदाहरणम् - 'इको यणचि' इत्यादि, 'अश्वमेधेन यजेते'त्यादि च। नियमस्योदाहरणम् - 'व्रीहीनवहन्ती'त्याद्युक्तमेव। व्याकरणशास्त्रे 'कर्मणि द्वितीयैव' एवं परं 'कर्मणि द्वितीया'[35] इत्यादिसूत्रम्। परिसंख्योदाहरणम् - 'पञ्च पञ्चनखाः भक्ष्याः' इत्यादिकम्। 'कृत्तद्धितसमासाश्च'[36] इत्यत्र समासग्रहणं 'धातोस्तन्निमित्तस्यैव'[37] 'पतिः समास एव'[38] इत्यादि च। परिसंख्यातत्त्वञ्च यत्किञ्चिच्छास्त्रविशिष्टत्वम्। वैशिष्ट्यञ्च स्वीयोद्देश्यतावच्छेदकव्याप्योद्देश्यतावच्छेदकत्वस्वीयविधेयतावच्छेदकावच्छिन्नविधेयताप्रयोजकत्वोभयसम्बन्धेन। 'पञ्च पञ्चनखाः भक्ष्याः' इत्यस्य रागप्राप्तपञ्चनखभक्षणस्य विधायकतया तदुद्देश्यावच्छेदकीभूतपञ्चनखत्वव्याप्यपञ्चसंख्याकपञ्चनखत्वावच्छिन्नोद्देश्यताकतया परिसंख्यात्वं सिद्ध्यति।

इदमत्र तत्त्वम् – विधेयस्य यत्रैवकारार्थेऽन्वयस्तत्र नियमः। यथा 'व्रीहीनवहन्ती'त्यत्र अवहन्यादेवेत्यर्थः। 'कर्मणि द्वितीये'त्यस्य कर्मणि द्वितीयैवेति। उद्देश्यस्य यत्रैवकारार्थेऽन्वयस्तत्र परिसंख्या। यथा 'पञ्च पञ्चनखाः भक्ष्याः' इत्यस्य पञ्चनखाः भक्ष्याश्चेत्तर्हि पञ्चैवेत्युद्देश्यदल एवकारान्वयः, एवमेव पूर्वभागपदघटितसमुदायस्य चेत्प्रातिपदिकसंज्ञा तर्हि समासस्यैवेत्युद्देश्यांश एवकारान्वयः।

किं वा नियमशास्त्रेण नियम्यशास्त्रविधेये तदीयोद्देश्यतावच्छेदकव्यापकत्वं बोध्यते। यथा 'व्रीहीनवहन्ति' 'कर्मणि द्वितीया' इत्यादौ। परिसंख्याशास्त्रेण तु परिसंख्याशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने स्वीयोद्देश्यतावच्छेदकव्यापकीभूतपरिसंख्याशास्त्रीयोद्देश्यतावच्छेदकव्याप्यभूतरूपावच्छिन्नातिरिक्तत्वेन सङ्कोचो विधीयते। इयमेव परिसंख्याशास्त्रस्य विधिमुखेन प्रवृत्तिरुच्यते।

---

34 अर्थसंग्रह
35 अष्टा., २/३/२
36 अष्टा., १/२/४६
37 अष्टा., ६/१/८०
38 अष्टा., १/४/८

निषेधमुखेन प्रवृत्तौ तु स्वीयोद्देश्यतावच्छेदकावच्छिन्नो यः स्वीयोद्देश्यतावच्छेदकव्यापकपरिसंख्येयशास्त्रीयोद्देश्यतावच्छेदकव्याप्यरूपावच्छिन्नतदतिरिक्तत्वेन परिसंख्येयशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचमात्रं परिसंख्याशास्त्रेण विधीयते। कार्यन्तु परिसंख्याशास्त्रेणैव। एवञ्च तत्र तदुद्देश्यतावच्छेदकावच्छिन्नेतरत्र निषेधमात्रमनेन क्रियते। 'पञ्च पञ्चनखाः भक्ष्याः' इत्यत्रैतत्पक्षे पञ्चसंख्याकपञ्चनखातिरिक्ताः पञ्चनखाः न भक्ष्या इति बोध्यते। समासातिरिक्तस्य पूर्वभागपदघटितसमुदायस्य प्रातिपदिकसंज्ञा न स्यादिति बोधः समासग्रहणस्य।

अन्यनिवृत्तिफलकसिद्धविषयकविधित्वं नियमत्वमिति शेखरोक्तलक्षणे स्वीकृतेऽन्यनिवृत्तिः फलति न तु शब्दतः क्रियते। इति दृष्ट्या विधिमुखेनैव प्रवृत्तिर्व्याकरणशास्त्रसम्मता प्रतीयते।

द्वितीयेऽपि पक्षे नियमशास्त्रीयोद्देश्यतावच्छेदकस्य व्यापकं रूपम, तदेव च नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यतया विमृश्य तद्रूपावच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचः प्रदर्शितः।

इतरव्यावृत्तिसादृश्यदृष्ट्या परिसंख्याऽपि नियमपदेनैव व्यवह्रियते व्याकरणशास्त्रे। पाक्षिकप्राप्तौ सत्यां नियमस्तु नियमपदेन व्यपदिश्यमानो वर्तत एव। 'कर्मणि द्वितीये'त्यादौ तूभयविधनियमोऽभ्युपेयेत कर्मण्येव द्वितीयेति परिसंख्यारूपः। कर्मणि द्वितीयैवेति च पाक्षिकप्राप्तिविषयकः। एवम्प्रकारेण पूज्याः विविधानि शास्त्राण्यालोड्य सप्रमाणलक्षणानि संगृहीतवन्तः। यद्यप्ययं ग्रन्थो विशेषतो नियमसूत्राणां परिप्रेक्ष्ये वर्तते तथापि सन्दर्भत अन्येषामपि सूत्राणामुपादेयः एवेति हेतोरत्र लक्षणानां स्थापनं कृतवन्तः। इमानि लक्षणानि शब्देन्दुशेखरस्य 'अभिनवचन्द्रिका'टीकायास्सन्ति। साऽपि टीका श्रीत्रिपाठिनां गुरुपरम्परायामेव वर्तते। तस्मादेतत्सर्वं लक्षणजातं पारम्परिकमेव मत्वा सन्देहो न कर्तव्यः।

अथ च संज्ञासूत्राणां द्वैविध्यं यत्प्रतिपादितं तत्तु "स्वं रूपं शब्दस्याशब्दसंज्ञा"[39] इत्यत्र शब्दशास्त्रीया या संज्ञा तां विना इत्यादिभाष्यानुमोदितपक्षमाश्रित्यैव कृतं वर्तते। अत्र 'उपधेयसाङ्कर्येऽपि उपाध्योरसाङ्कर्यात्' इत्यादिवाक्यं न्यायशास्त्राद् गृहीतम्, अन्यान्यपि वाक्यानि आचार्याणां भाष्यसम्मतानि एव।

अनन्तरं परिभाषेन्दुशेखरस्य भूतिटीकायाः येन नाप्राप्तिन्याये यद्विशिष्टव्याख्यानं तत्सर्वं विशिष्टतया श्रीमद्भिरत्र स्थापितम्। अयं निबन्धः तेषां स्वोपज्ञत्वसंकलनायैव मया साक्षात्क्रियत अतस्तेषां प्रोक्तमेव यथायथं स्थाप्यते।

[39] अष्टा., १/१/६८

इदं सिद्धं यन्नियम्यनियमशास्त्रयोरुद्देश्यतावच्छेदकस्य व्याप्यव्यापकभावस्य सम्बन्धेऽत्यन्तमवधानेन भवितव्यम्, अन्यथा स्खलनं सम्भवत्येव। परन्तु गुरुचरणानां व्याख्यानशैल्या तत्सर्वं हस्तामलकवत् प्रतिबोध्यते प्रत्यक्षं पश्यामः। विशेषशास्त्रीयोद्देश्यो यो विशेषधर्मावच्छिन्नस्तद्वृत्तिर्यः सामान्यधर्मस्तदवच्छिन्नोद्देश्यताकशास्त्रस्य विशेषशास्त्रेण बाधो भवति। सामान्यधर्मो नाम व्यापकधर्मः, विशेषधर्मो नाम व्याप्यधर्मः।

अथ शङ्कते[40] सामान्यधर्मे विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिविशेषणं व्यर्थमेव। सामान्यधर्मे विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्ना वृत्तित्वसत्वे तस्य सामान्यत्वासम्भवादिति चेत् सत्यम्, उद्देश्यतावच्छेदकावच्छेदकसम्बन्ध एव व्यापकतावच्छेदको ग्राह्य इति भ्रमवारणायैवात्रोक्तविशेषणस्य सार्थक्यात्। अत एव 'एकाचो द्वे प्रथमस्य'[41] 'अजादेर्द्वितीयस्य'[42] इति सूत्रयोर्व्याप्यव्यापकभावाभावेन बाध्यबाधकभावो न भवेदिति। अजादेर्द्वितीयस्येति व्याप्यसूत्रस्योद्देश्यतावच्छेदको धर्मो द्वितीयैकाच्त्वम्, स च स्वरूपसम्बन्धेन यत्र वर्तते तत्र स्वरूपसम्बन्धेन धात्ववयवप्रथमैकाच्त्वं व्यापकशास्त्रीयोद्देश्यतावच्छेदकं नास्ति, अतः सामानाधिकरण्याभावेन व्याप्यव्यापकभावाभावात् बाध्यबाधकभावो न भवेत्। गृहीते तु तस्मिन् विशेषणे येन केनापि सम्बन्धेन सामानाधिकरण्येऽपि व्याप्यव्यापकभावे 'अजादेर्द्वितीयस्ये'ति व्याप्यशास्त्रीयोद्देश्यतावच्छेदकं द्वितीयैकाच्त्वं स्वरूपेण सम्बन्धेन वर्तते।

एकाचो द्वे प्रथमस्योद्देश्यतावच्छेदकं धात्ववयवप्रथमैकाच्त्वं स्वघटकाच्त्ववदुत्तरत्वसम्बन्धेन द्वितीयैकाचि वर्तते। अतो द्वयोः धर्मयोरेकत्र वर्तमानतया व्याप्यव्यापकभावेन बाध्यबाधकभावः सिद्ध्यति।

शङ्कते – साक्षादुद्देश्यतावच्छेदकधर्मयोर्व्याप्यव्यापकभावोऽपेक्ष्यते बाधार्थम्, उत साक्षात्परम्परासाधारणोद्देश्यतावच्छेदकयोः। नाद्यः, 'नेमौ रहौ कार्यिणौ किन्तर्हि निमित्त'मिति भाष्यविरोधापत्तेः। परम्परयोद्देश्यतावच्छेदकयोर्ञ्णित्प्रत्ययत्वञिण्णित्तद्धितत्वयोर्व्याप्यव्यापकभावेन तद्धितेष्वचामिति शास्त्रेण 'अचो ञ्णिति[43], अत उपधाया[44]'रित्यनयोर्बाधादेवोक्तार्थसिद्धेः निरुक्तभाष्यविरोधः स्पष्ट एवेति चेन्न, व्याप्यव्यापकधर्मयोः साक्षात्परम्परया वा तत्तदुद्देश्यतावच्छेदकयोर्विशेषणदलप्रविष्ट्या वत्पदार्थसङ्कुचितयोरेव ग्रहणेन

---

40 सि.चि., भूमिका पृष्ठ-१५
41 अष्टा., ६/१/१
42 अष्टा., ६/१/२
43 अष्टा., ७/२/११५
44 अष्टा., ७/२/११६

तद्धितेष्वचामादेरिति शास्त्रीयतादृशोद्देश्यतावच्छेदकस्याज्घटिताङ्गावधिकपरत्व-विशिष्टञिण्णित्तद्धितत्वस्याददुपधावधिकपरत्वविशिष्टञिण्णित्प्रत्ययत्वस्याजन्ताङ्-गावधिकपरत्वविशिष्टञिण्णित्प्रत्ययत्वस्य रूपस्य च तदुभयशास्त्रीयोद्देश्यतावच्छे-दकाभाववति मारुतशब्दघटकतद्धिते वर्तमानत्वेन तस्य व्याप्यत्वाभावादेवानेन न्यायेनादिवृद्धेरन्त्योपधावृद्धिबाधनासम्भवेनोक्तज्ञापकपरभाष्यविरोधाभावात्।

'अचो रहाभ्यामि'त्यत्राजव्यवहितपरत्वयरव्यवहितपूर्वत्वधर्माभ्यां सङ्कुचितस्य रत्वस्याजव्यवहितपूर्वत्वाभावरूपधर्मसङ्कुचितस्य 'अनचि च[45]'ति शास्त्रीयोद्देश्यता-वच्छेदकयत्र्वस्यापेक्षया व्याप्यत्वेनैव 'नेमौ रहौ' इति भाष्यसङ्गतिश्च। यद्वा अत्रो-द्देश्यतापदेन उद्देश्यदलप्रविष्टशाब्दबोधीयविषयत्वमात्रं गृह्यते, सा च सङ्कुचितैवा-स्तीति न विशेष्यविशेषणदलप्रविष्ट्या वत्पदार्थसङ्कुचितेति निवेशस्योपयोगः।

अत्र विषयतयोर्व्याप्यव्यापकभावः तद्विषयतामात्रवृत्तिस्तद्व्यक्तित्वादिनैवेति नाग्रहः, किन्तु अन्यतरत्वादिनाऽपि। अत एव 'अकः सवर्णे दीर्घः'[46] इत्यनेन 'इको यणची'ति शास्त्रीयविषयतायाः 'आद्गुणः'[47] इति शास्त्रीयविषयतायाश्चान्य-तरत्वेन व्यापकतामादाय उभयोर्बाधो भवतीति सिद्धम्।

नन्वेवमपि कुप्वोरितिशास्त्रेण 'विसर्जनीयस्य सः'[48] 'शर्परे विसर्ज-नीयः'[49] इत्येतच्छास्त्रीयविसर्जनीयपदप्रयोज्यविषयताद्वयस्यापि अन्यतरत्वेन स्वघटक-विसर्जनीयपदप्रयोज्यविषयताव्यापकत्वेन तयोर्द्वयोः बाध इति। न च स्वव्यापकतावच्छेदकत्वस्वव्यापकतावच्छेदकाव्यापकत्वोभयसम्बन्धेन स्वघट-कपदप्रयोज्यविषयताविशिष्टधर्मावच्छिन्नव्यापकतावद्विषयताकशास्त्रस्य स्वेन बाध इत्यर्थकल्पनेन निरुक्तविषयताद्वयवृत्यन्यतरत्वेन कुप्वोरिति शास्त्रीयपदप्रयोज्य-विषयताया आयसम्बन्धेन वैशिष्ट्येऽपि स्वव्यापकतावच्छेदकः 'विसर्जनीयस्य सः' इत्येतच्छास्त्रीयविसर्जनीयपदप्रयोज्यविषयतावृत्तितद्व्यक्तित्वव्यापकत्वेन द्वितीयसम्बन्धेन तदभावात् बाध्यत्वप्रयोजकोक्तरूपाभावेन नोक्तशास्त्रद्वयबाध इति वाच्यम्। उर्ऋदिति शास्त्रस्येरारामपवादत्वानाप्तेरिति चेन्न, निरुक्तद्वितीय-सम्बन्धघटकव्यापकतावच्छेदकपदेन पुगन्तीति शास्त्रीयेक्पदप्रयोज्यविषयता उपधायाश्चेति शास्त्रीया ऋक्पदप्रयोज्यविषयता चेत्येतद् द्व्यावृत्तिनो ग्रहणेन सर्वत्र दोषाभावात्। न चैवमपि यचि भमिति शास्त्रेण बाध्यसामान्यचिन्तया सुप्तिङन्तं

---

45 अष्टा., ८/४/४७
46 अष्टा., ६/१/१०१
47 अष्टा., ६/१/८७
48 अष्टा., ८/३/३४
49 अष्टा., ८/३/३५

स्वादिष्विति शास्त्रद्वयबधनापत्तिः। तदुभयशास्त्रीयविषयताद्वयवृत्यन्यतरत्वस्य स्वव्यापकतावच्छेदक-स्वादिष्विति शास्त्रीयविषयतावृत्तितद्व्यक्तित्वव्यापकत्वात्। तथा च 'राजन्यः' इति शब्दे सुबन्तत्वेन पदत्वान्नलोपापत्तिरिति वाच्यम्।

स्वव्यापकतावच्छेदकव्यापकत्वेति द्वितीयसम्बन्धस्थाने स्वव्यापकत्वस्वाश्रयविषयताव्याप्य विषयतावृत्तित्वोभयसम्बन्धेन, स्वव्यापकतावच्छेदकविशिष्टभिन्नत्वमित्यस्य निवेशेनोक्तान्यतरत्वस्य स्वव्यापकतावच्छेदकस्वादिष्विति शास्त्रीयवृत्ति तद्व्यक्तित्वव्यापकत्वेऽपि तद्व्यक्तित्वाश्रयविषयतामादायापि 'रामः' इति सुबन्ते सुप्तिङन्तमिति शास्त्रीयविषयतायाः सत्वेन तस्याः व्याप्यत्वाभावात् स्वाश्रयविषयताऽव्याप्यविषयताऽवृत्तित्वरूपद्वितीयसम्बन्धाभावेनैकसत्वेऽपि 'द्वयं नास्ती'ति न्यायेनोभयसम्बन्धस्वविशिष्टभिन्नत्वरूपसत्त्वेनोभयशास्त्रबाधकत्वस्य सुवचत्वात्। 'उत्तरपदत्वे च' इत्यस्य प्रत्याख्याने 'यचि भमि'त्यत्र सुबनुवृत्या सुबन्तस्य भसंज्ञाविधानेन स्वातत्र्येण यचि भमित्यस्य सुप्तिङन्तमित्येतद् बाधकत्वस्य दुर्वारत्वात्। 'अचि र ऋतः'[50] इत्यादौ तु अच्पदादितत्तद्विभक्तिघटकाच्त्वादिना बोधकतया न दोष इति।

एवम्प्रकारेण पाणिनिसूत्राणां निष्कृष्टार्थावधारणे "प्रकल्प्य चापवादविषयं तदुत्सर्गोऽभिनिविशते"[51] इति सिद्धान्तेन बाध्यबाधकभावस्थले काचिदग्रदृष्टिरवश्यमेव करणीया, अन्यथा परस्परं विरोधावगम आचार्याणामप्रामाण्यापत्तिः विकल्पापत्तिश्च सम्भाव्येत्। अत एव नियम्यनियामकस्थले प्राक्प्रदर्शितनियमेन मध्यवर्तिनो रूपस्य निर्धारणं विना परिष्कृतार्थस्य बोधोऽसम्भव एव। मन्येऽहमस्मिन्नुपक्रमे सुधियामप्यतिकष्टतरः प्रस्तरो वर्तते। तत्रैव स्वमनीषया श्रीमन्तो गुरुचरणाः तादृशं परिष्कृतभागं सर्वत्र सूत्रे स्थापितवन्तः यादृशं रूपं केनाऽप्यद्यावधि न कृतम्। तदेव कतिपयसूत्रेषु तां गतिं पश्यामः। यथा 'तपस्तत्कालस्ये'[52]त्यस्मिन् सूत्रे।

"तत्र तपरोऽण् संज्ञादलं विधेयताप्रयोजकं पदम्, तपरवर्णकालसमानकालिकत्वविशिष्टसवर्णपदमुद्देश्यपदम्, तद्वृत्तिधर्म उद्देश्यतावच्छेदको धर्मः, तद् व्यापको धर्मः तपरवर्णाधिकरणकालसमानकालिकत्वविशिष्टसवर्णत्वरूपो धर्मः। नियम्यशास्त्रमणुदिच्छास्त्रम्, तदीयविधेयताप्रयोजकमण्पदमुद्देश्यदलं सवर्णस्येति, उद्देश्यतावच्छेदको धर्मः सवर्णत्वरूपः तद्व्याप्योऽपि धर्मः तपरवर्णसम्बन्धिकालसमानासमानकालिकत्वविशिष्टं सवर्णत्वम्, तद्धर्मावच्छिन्नातिरिक्तत्वेन सवर्णत्वावच्छिन्ने सङ्कोचोऽत्र कर्त्तव्यः। तेन तपरवर्णः तपरवर्णसम्बन्धिकालसमानासमानका-

[50] अष्टा., ७/२/१००

[51] परि.शे., ६४

[52] सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-१

लिकत्वविशिष्टसवर्णस्य संज्ञा चेत्तर्हि तपरवर्णसम्बन्धिकालसमानकालिकत्वविशिष्टसवर्णस्यैव" इत्यादिना सूत्रस्य नियमपरत्वं मत्वा गुरुभिरेतस्य निरुपणं कृतम्। विधिपक्षस्तु 'गुणाभेदकाः' इति सिद्धान्तेन निराकृत एव। एवमेव 'वा हतजग्धयो'रित्यस्मिन् सूत्रेऽपि। तथापि फलतो हलवसानान्यतरपरत्वं हलवसानान्यतराव्यवहितपूर्वत्वं वा यर्पदार्थे लभ्यत एव। एवञ्च फलतः - हलवसानान्यतराव्यवहितपूर्वत्वविशिष्टमजुत्तरत्वविशिष्टं यर्त्वमुद्देश्यतावच्छेदकरूपतया शब्दत अजव्यवहितपूर्वत्वाभावविशिष्टमजव्यवहितोत्तरत्वविशिष्टं[53] यर्त्वं वा तद्रूपतया निर्णीतम्। वैशिष्ट्यञ्च समानाधिकरणसम्बन्धेन। अस्य व्याप्यं रूपन्तु क्तान्ततदाद्यव्यवहितपूर्वत्वविशिष्टाजुत्तरत्वविशिष्टं पुत्रशब्दावयवयर्वृत्तियर्त्वम्, तद्रूपावच्छिन्नातिरिक्तत्वेनाजव्यवहितपूर्वत्वभागविशिष्टाजुत्तरत्वविशिष्टयर्वृत्तियर्त्वावच्छिन्ने सङ्कोचः कर्त्तव्यः।

स्पष्टं प्रतिभाति 'अनचि चे'त्यनेन प्रसज्यप्रतिषेधस्य सिद्धान्तिते 'वा हतजग्धयो'रित्यस्य वैयर्थ्यापत्तौ यो ह्यर्थः कदापि न विचारितः स एवापूर्वोऽर्थः गुरुभिः परिशीलितः। तथैव 'वान्तो यि प्रत्यये' इत्यत्र विलक्षणा गतिरवलोक्यते।

तथाहि यदि प्रत्ययपरे ओकारौकाररूपस्यैचोऽवावादेशरूपो वान्तादेशो भवत्वित्यस्ति 'वान्तो यि प्रत्यये' इत्यस्य सूत्रार्थः। तत्रोद्देश्यतावच्छेदकं रूपं यादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टमुक्तरूपगतमेच्त्वमिति। तस्य व्याप्यता पूर्वोक्ते रूपे वर्तत एव। यतश्च यत्र यत्र यादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टमेजन्तधातुघटकोक्तरूपगतैच्त्वावच्छिन्नातिरिक्तत्वेन यादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टोक्तरूपगतैच्त्वावच्छिन्ने सङ्कोचे कृते सति - "यादिप्रत्ययाव्यवहितपूर्वत्वविशिष्टैजन्तधातुघटकोक्तरूपगतैच्त्वावच्छिन्नस्य एचो वान्तादेशश्चेत्तर्हि यादिप्रत्ययनिमित्तकस्यैवेति सूत्रार्थः सम्पन्नः।

यद्यपि अयं नियमकारः 'धातोस्तन्निमितस्यैवे'[54]ति सूत्रमुपक्रम्य वर्तते स च नियम एवपदेन स्पष्टं प्रतिबोध्यते, तथापि यावत् 'वान्तो यि प्रत्यये'[55] इत्यस्य समानविषयत्वादर्थस्य परिशीलनं न कृतं भवति तावदस्य रहस्यः केनाऽपि ज्ञातुं न शक्येत। एतत्सर्वं गुरुभिरेवोपज्ञातमिति महते सौभाग्याय। अर्थवत्सूत्रे यादृशो विचारः कृतः स तु बहुचर्चित अतस्तन्नोपस्थाप्यते। तानि सूत्राण्येवात्र विवेच्यन्ते येषां मध्यमवर्ति रूपं क्वचिदपि नोपलभ्यते तेषामेवात्र निरूपणं क्रियते। यथा 'नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृती[56]'त्यत्र पूर्वत्रासिद्धीयं शास्त्रमभिव्याप्य यावान्

53 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-७
54 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-७
55 अष्टा., ६/१/७९
56 अष्टा., ८/२/२

विचारः क्रियते सः स्थाप्यते।

तत्रोद्देश्यतावच्छेदकरूपं विचार्यते। तच्च सुब्विधिस्वरविधिसंज्ञाविधिकृन्-निमित्तकतुग्विधिरूपपूर्वत्वविशिष्टसापादिकशास्त्रावधिकत्रैपादिकरूपपरत्वविशिष्टन-लोपविधायकशास्त्रत्वम् अदसीयोद्देश्यतावच्छेदकं रूपं मन्तव्यम्। तद्व्याप - कञ्च रूपं सापादिकशास्त्रावधिकपरत्वविशिष्टनलोपविधायकशास्त्रत्वम्।

पूर्वत्रासिद्धमिति[57] नियम्यशास्त्रस्योद्देश्यतावच्छेदकं रूपं सापादिक-शास्त्रावधिकपरत्वविशिष्टत्रैपादिकशास्त्रत्वत्रैपादिकशास्त्रान्तर्गतपूर्वशास्त्रावधिकप-रत्वविशिष्टशास्त्रत्वान्यतरत्। तद्व्याप्यञ्च रूपं सापादिकशास्त्रावधिक-परत्वविशिष्टनलोपविधायकशास्त्रत्वम्। एतदेव मध्यवर्तिरूपम्, एतद्रूपावच्छिन्ना-तिरिक्तत्वेन नियम्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचः कार्यः। अतश्च सापादिकशास्त्रावधिकपरत्वविशिष्टनलोपविधायकशास्त्रस्यासिद्धत्वं चेत्तर्हि सुब्-विधिस्वरविधिसंज्ञाविधिकृन्निमित्तकतुग्विधिरूपपूर्वत्वविशिष्टसापादिकशास्त्रावधिक-परत्वविशिष्टनलोपविधायकशास्त्रस्यैवेति नियमस्वरूपं सम्पन्नम्। तत्फलन्तु 'राजाश्वः' इत्यादिरूपेण प्रसिद्धमेव।

अत्र गुरवः किमपि विशिष्टमुत्पादयन्ति[58] यदस्मिन् सूत्रे संज्ञापदेन घिसं-ज्ञाया एव ग्रहणं करणीयम्, अत एव 'दण्डिदन्तौ ' इत्यादौ घित्वप्रयुक्तः पूर्वनिपातो न भवति, तस्मादत्र भाष्यकृन्मतं प्रमाणत्वेनोपन्यस्यते। तथाहि भाष्ये 'दण्डिदत्तौ' 'दण्डिदण्डिनौ' प्रयोगद्वयमुपलभ्यते। सत्यां हि घिसंज्ञायां दण्डिशब्दस्य नित्यमेव प्राक्प्रयोगः स्यात्।

एवमेव[59] 'विप्रतिषेधे परं कार्यम्'[60] इत्यस्मिन् सूत्रे गुरुभिः बहवः पक्षा उपस्थापिताः। अत्र सूत्रे गुरवः किमपि विशिष्टं लिखन्ति – महाभाष्ये तु पक्षेऽस्य सूत्रस्य विधायकताऽपि स्वीकृताऽस्ति। तथाहि द्वयोः स्वामिनोर्यदैकः प्रेष्यो भ-वति सः तयोः पर्यायेण कार्यं करोति, यदा तमुभौ युगपत् प्रेषयतः नानादिषु च कार्यं भवति तदा स प्रेष्यो द्वयोरपि कार्यं न करोतीति लोके प्रसिद्धो विषयः। तथैवान्य-त्र लक्ष्ये चरितार्थयोर्द्वयोः शास्त्रयोर्यदैकस्मिँल्लक्ष्ये युगपत्प्राप्तिर्जायते तदा विरोधः सुतरामायाति। अस्यां स्थितौ तेन लक्ष्येन द्वयोरपि निवृत्तिर्विधीयते 'यन्मह्यं विरोधो न रोचते, भवद्भ्यां मम संस्काराय कृपा विधेया' इति। तदा द्वयोरपि निवृत्तौ सत्यामिदं विप्रतिषेध इति सूत्रं परशास्त्रमुत्थापयति, त्वयाऽत्र प्रवर्तितव्यमिति।

57 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-७
58 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-१८
59 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-२३
60 अष्टा., १/४/२

अतश्चास्य विधायकता सम्पद्यते। तस्मिन् परशास्त्रे प्रवृत्ते सति यदि पूर्वस्य निवृत्तिः सम्भवति तदा पूर्वशास्त्रमपि तत्र प्रवर्तत एव। एतन्मूलिकैव पुनः प्रसङ्गविज्ञानमिति परिभाषाऽस्ति। यथा - 'राजन् सु' इत्यत्र हल्ङ्यादिलोपात्परत्वात् सर्वनामस्थाने चासम्बुद्धावित्युपधादीर्घे कृते पश्चादपि प्राप्तस्य हल्ङ्यादिलोपस्य प्रवृत्तिर्भवत्येव। एवं ण्वुल्तृचाविति शास्त्रीयदृष्टान्तोऽस्य नियमार्थत्वपोषकः, प्रेष्यदृष्टान्तस्तु विधायकत्वपोषकः। पक्षद्वयेऽपि परिभाषाद्वयस्योद्गमश्च।

मह्यं विरोधो न रोचते[61] – अयमभिप्रायः यत् यदा लक्ष्यद्वयस्यापि निवृत्तिर्भवति तदोद्देश्यतावच्छेदकस्यानाक्रान्तत्वात् कुतो विरोधः। एवम्प्रकारेण बहुधा सूत्रेषु तैः स्वकीयं मतमपूर्वत्वेनोपस्थापितम्। अत्र 'प्रत्ययलोपे प्रत्ययलक्षणम्'[62] इत्यस्मिन् विषये बहुविधं व्याख्यानमुपलभ्यते अतस्तत्सौकर्यार्थं तस्य कश्चिदंशः प्रस्तूयते।

प्रत्ययत्वव्याप्यं यद्रूपं तद्रूपावच्छिन्नोद्देश्यताककार्यप्रयोजकीभूतप्रत्ययलोपत्वमिति तद्व्यापकञ्च रूपं सामान्यतः प्रत्ययलोपत्वमिति नियम्यस्य स्थानिवत्सूत्रस्योद्देश्यतावच्छेदकन्त्वादेशमेव। तद्व्याप्यञ्च रूपं प्रत्ययलोपत्वमिति। तद्रूपमेव मध्यवर्तिरूपतया ग्राह्यम्। तद्रूपावच्छिन्नातिरिक्तत्वे आदेशत्वावच्छिन्ने सङ्कोचे कृते सति प्रत्ययलोपे प्रत्ययलक्षणं चेत्तर्हि प्रत्ययत्वव्याप्यधर्मावच्छिन्नोद्देश्यताककार्यप्रयोजकीभूते एव प्रत्ययलोपे इति नियमाकारः सुसम्पन्नो भवति।

अत्र[63] वार्तिककाराणां मतं गुरुभिः स्वीकृतं भाष्यकारस्यापि 'मित्रशीः' इत्यादिसिद्धये भाष्यकृन्मतमप्युपन्यस्तं वर्तते। तत्सर्वं सिद्धान्तचिन्तामणिग्रन्थे द्रष्टुं शक्यते। संज्ञाशास्त्राणामपि नियमाक्रान्तत्वमवलोकनीयम्। अत्र सूत्रे नियम्यस्य पाक्षिकसिद्धविधेयकत्वविशिष्टमुपपादितम्। अत्र सो ग्रन्थोऽवश्यमेवावलोकनीयः।

ननु उक्तोदाहरणे विशेषणं विशेष्येणेत्येव समासे सिद्धे पुनरिदं सूत्रं किमर्थमिति चेदुच्यते – संज्ञायामेवायं समासो भवत्विति नियमार्थमिदम्। नियमश्चायं पाक्षिकसिद्धविधेयकत्वविशिष्टः न तु परिसंख्यारूपः। यथा - 'व्रीहीनवहन्ति' इत्यनया श्रुत्या पाक्षिकप्राप्तस्यावघातस्य नियमः क्रियते, अवघातेनैव तण्डुलानां वितुषीकरणं भवतु न तु नखविदलनादिना। तथैवात्रापि संज्ञात्वविशिष्टस्यैव समासस्यानेन साधुत्वं बोधनीयं न तु तदन्यस्य। यथा व्याकरणशास्त्रेऽपि कर्मणि द्वितीयैव साधुत्वं बोध्यतां न तु तदन्यविभक्त्येति।

विशेषतः कारकप्रकरणस्थसूत्राणि नियमपराण्येव, अतः प्रतिशास्त्रं कारक-

61 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-२३
62 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-२४,२५
63 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-२५

सूत्राणां नियम्यनियामकयोः केनचिन्मध्यमवर्तिना रूपेण भवितव्यमेव।[64] अतः 'कर्मणि च'[65] एवं 'स्वौजसमौट्..'[66] इत्यादिसूत्रयोः व्याप्यव्यापकभावस्य मध्यवर्तिनो रूपस्य स्वरूपमवश्यमेव प्रदर्शनीयं स्यात्। अतस्तदप्युपस्थाप्यते। एकत्वादिसंख्याविशिष्टानुक्तकारकबोधकप्रातिपदिकत्वम्, अनुक्तकारकगतैकत्वादिसंख्याबोधकप्रातिपदिकत्वं वा। वैयर्थ्यप्रयोजकं शास्त्रं स्वौजसमौडिति। तदीयोद्देश्यतावच्छेदको धर्म एकत्वादिसंख्याबोधकप्रातिपदिकत्वम्। तद्व्याप्यो धर्म एकत्वादिसंख्याविशिष्टानुक्तकारकबोधकप्रातिपदिकत्वम्, अनुक्तकारकगतैकत्वादसंख्याबोधकप्रातिपदिकत्वं वा। तद्धर्मावच्छिन्नातिरिक्तत्वेन वैयार्थ्यप्रयोजकशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचे कृते सति – इदं 'कर्मणि द्वितीया'[67] इति सूत्रं विधिमुखेन प्रवृत्तौ फलतो द्वितीयाविधायकं भवति। एवञ्च एकत्वादिसंख्याविशिष्टानुक्तकर्मार्थबोधकप्रातिपदिकादेव, अथ च – अनुक्तकारकगतैकत्वादिसंख्याबोधकप्रातिपदिकाच्चेद् द्वितीयैकवचनादि तर्हि अनुक्तकर्मार्थगतैकत्वादिसंख्याबोधकप्रातिपदिकादेव इति नियमाकारः सम्पद्यते।

अत्र विषये 'दिवः कर्म च'[68] इत्यस्यासंग्रहार्थमुद्देश्यदलेऽपि एवकारस्य समन्वयो विधीयते। अत उद्देश्यतावच्छेदकपर्याप्त्यधिकरणधर्मावच्छिन्नेनापि कारकस्यान्वयः कर्त्तव्यः, तदर्थं लघुशब्देन्दुशेखरस्यार्थनियमपक्षः प्रत्ययनियमपक्षश्चावश्यमवलोकनीयः। अतस्तेऽत्र विषये किमपि विशिष्टमेव प्रतिपादयन्ति।

यथा – अत्र नियमो द्विविध अर्थनियमः प्रत्ययनियमश्च। अन्त्योऽपि द्विविधः प्रकृतार्थापेक्षः सामान्यापेक्षश्च। तत्र एकत्वादिविशिष्टकर्माद्यर्थयोग्यप्रातिपदिकाच्चेद् एकत्वादिविशिष्टे कर्मणि विभक्तिस्तदा द्वितीयैकवचनमेव इत्यादिरर्थनियमः। यत एवकारस्ततोऽन्यत्र नियम इति सिद्धान्तात्।

अथ च कर्माद्यर्थयोग्यप्रातिपदिकाच्चेद् द्वितीया तदा कर्मण्येव न करणादौ, संख्यावदर्थयोग्यप्रातिपदिकाच्चेदेकवचनं तर्ह्येकत्व एव न द्वित्वादौ – इत्यादिः प्रकृतार्थापेक्षप्रत्ययनियमः संख्याकारकयोर्विशेषणविशेष्याभावाभावेन। अनयोर्विशेषणविशेष्यभावे त्वेकत्वादिसंख्याविशिष्टानुक्तकर्माद्यर्थयोग्यप्रातिपदिकाच्चेद् द्वितीयैकवचनादि तर्ह्येकत्वादिविशिष्टानुक्तकर्मण्येव। किं वा कर्माद्यर्थगतैकत्वाद्यर्थयोग्यप्रातिपदिकाच्चेद् द्वितीयैकवचनादि तदा कर्माद्यर्थगतैकत्वादावेव, न तादृशद्वित्वादौ। एषः प्रकृतार्थापेक्षप्रत्ययनियमः।

64 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-६९
65 अष्टा., ३/१/११६
66 अष्टा., ४/१/२
67 अष्टा., २/३/२
68 अष्टा., १/४/४३

उभयोः कर्तृकर्मणोः प्राप्तिर्यस्मिन् कृति तद्योगेऽनुक्ते कर्मणि षष्ठी स्यादिति सूत्रार्थः।[69] अदसीयमुद्देश्यतावच्छेदकं रूपम् - उभयप्राप्तिककृत्प्रत्यययोगविशिष्टानुक्तकर्मबोधकप्रातिपदिकत्वम्। तद्व्यापकं रूपम् - उभयप्राप्तिककृत्प्रत्यययोगविशिष्टानुक्तकर्तृककर्मान्यतरबोधकप्रातिपदिकत्वम्। नियम्यशास्त्रं 'कर्तृकर्मणोः कृति' इति। तदीयमुद्देश्यतावच्छेदकं रूपम् – कृत्प्रत्यययोगविशिष्टानुक्तकर्तृकर्मान्यतरबोधकप्रातिपदिकत्वम्। एतद्व्याप्यं रूपम् – उभयप्राप्तिककृत्प्रत्यययोगविशिष्टानुक्तकर्तृकर्मान्यतरबोधकप्रातिपदिकत्वम्। एतद्रूपावच्छिन्नातिरिक्तत्वेन 'कर्तृकर्मणोः कृती[70]'त्यस्योद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचः कार्यः। अतश्च उभयप्राप्तिककृत्प्रत्यययोगविशिष्टानुक्तकर्तृकर्मान्यतरबोधकप्रातिपदिकाच्चेत् षष्ठी तर्ह्युभयप्राप्तिककृत्प्रत्ययविशिष्टानुक्तकर्मबोधकादेव प्रातिपदिकात्। अतश्च कर्तुर्व्यावृत्तिः सिद्धा। तेन "आश्चर्यो गवां दोहोऽगोपेन" इत्यत्र गोपदात् षष्ठी न अपि तु तृतीयैव भवति। एवम्प्रकारेण बहुधा सूत्राणां समीक्षणं विधाय अध्येतॄणां सौकर्यमासादितं भवति।

प्रातिपदिकार्थसूत्रे गुरुभिः यादृशं प्रतिपादनं कृतं तत्तु क्वचिदपि सम्भूय नोपलभ्यते। तत्र प्रथमा विभक्तिः कारकविभक्तिरुपपदविभक्तिरपि। "प्रातिपदिकार्थलिङ्ग परिमाणवचनमात्रे प्रथमा" "सम्बोधने च" इति सूत्रद्वयं प्रथमां विदधाति। कारक - प्रथमाविषये नियमविषयको विचारः प्रदर्शित एव। उपपदविभक्तित्वपक्षे विचारः क्रियते।

तत्र प्रातिपदिकार्थमात्रे वर्त्तमानप्रातिपदिकाच्चेत् सुब्विभक्तिस्तर्हि प्रथमैव।[71] इत्येवमर्थनियम एव साधीयान्। तत्फलं तु - "विस्पष्टं पटुः विस्पष्टपटुः" सह सुपेत्यनेन समासो भाष्ये दर्शितः। विस्पष्टं यत्पटुत्वं तद्वानिति शाब्दबोधः। एवमेव स्तोकं पचतीति। अत्रापि स्तोकमिति नपुंसकं प्रथमान्तं चेत्युद्योतकारः हेतुमति चेति सूत्रे। "स्तोकाभिन्ना विक्लित्तिः" तदनुकूलो व्यापार इति बोधः। एवमेव 'उष्ट्रासिका आस्यन्ते' 'हतशायिकाः शय्यन्ते' इत्यादावपि प्रातिपदिकार्थमात्रेति प्रोक्तमुद्योतकृता, तथैव अनेन नियमेन प्रातिपदिकार्थमात्रे प्रथमेतरद्वितीयादीनां व्यावृत्तिः, अनर्थकनिपातेभ्यश्च स्वौजसमौडिति प्रथमा सिध्यति।

प्रातिपदिकार्थसूत्रे पूज्यैः द्विविधो विचारः कृतः। प्रथमः पक्षः प्रथमां कारकविभक्तिं मत्वा प्रागेव विस्तरेण प्रतिपादनं कृतम्। इयञ्च प्रथमा विभक्तिः

[69] सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-७५
[70] अष्टा., २/३/६४
[71] सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-७७

कारकविभक्तिः, तत्र प्रमाणम् - 'सहयुक्तेऽप्रधाने'[72] इति सूत्रेऽप्रधानमित्यस्य हलश्च अन्यथा साधकत्वपक्षे प्रधानतृतीयायाः वर्णनम् "उपपदविभक्तेः कारकविभक्तिर्बलीयसी"। इत्यादिपरिभाषाऽवलम्बनपरं भाष्यमेव। परन्त्वत्र सूत्रे कारकस्याधिकाराभावात् केचन इमां विभक्तिमुपपदविभक्तिमपि मन्वते। तत्पक्षेऽपि पूज्यचरणैः महान् विचारः प्रदर्शितः। यथा एतत्सर्वमुपनिबद्धमेवास्माभिस्तत्र 'विस्पष्टपटु'रित्यत्र या प्रथमा सा प्रातिपदिकार्थमात्रे वर्तमानात् प्रातिपदिकाच्चेत् सुब्विभक्तिस्तर्हि प्रथमैव' इत्यादिरूपेणार्थनियमेनैव, यतस्तत्र विस्पष्टशब्दस्य पटुत्वेऽन्वयस्तेन विस्पष्टं यत्पटुत्वं तद्वान् इति बोधः सर्वानुभवसिद्धः। एवमेव स्तोकं पचति यद्यपि द्वितीया "क्रियाविशेषणानां कर्मत्वं क्लीबत्वञ्चे"ति नियमात्, परन्तु "स्तोकं पचति" अत्र स्तोकमित्यत्र प्रथमैवेत्युद्योतमते "हेतुमति च"[73] इति सूत्रे प्रतिपादिते प्रथमा प्रसिद्ध्यति।

वस्तुतस्तु "उष्ट्रासिका आस्यन्ते" "हतशायिकाः शय्यन्ते" इत्यत्र स्वार्थे णुङः सत्त्वात् असत्त्वभूतक्रियार्थकप्रातिपदिकात् प्रथमाभिधानम् अबाधितफलं विज्ञेयम्। किञ्च न केवलं कारकविभक्तीनां नियमाकारः पूज्यैरुपपादित अपितु उपपदविभक्तीनामपि तदेव सम्भूय उपस्थाप्यते। यथा - 'नमःस्वस्तिस्वाहास्वधा[74]' इत्यस्मिन् सूत्रे कृतं व्याख्यानमुपनिबध्यते।

उपपदपञ्चमीविषये नियमविषयको विचारः प्रस्तूयते।[75] तत्र "अन्यारादितरर्ते[76], पञ्चम्यपाङ्परिभिः[77], प्रतिनिधिप्रतिदाने च यस्मात्[78], विभाषा गुणेऽस्त्रियाम्[79], पृथग्विना नानाभिस्तृतीयान्यतरस्याम्[80], दूरान्तिकार्थेभ्यो द्वितीया च[81], पञ्चमी विभक्तेः[82], यतश्चाध्वकालनिमानं तत्र पञ्चमी" इत्यादीनि वचनानि पञ्चमीविधायकानि सन्ति। अत्रैषां समेषां वचनानामुद्देश्यतावच्छेदकमन्यतम-त्वेन संगृह्य तद्व्यापकं रुपं कारकेतरबोधकप्रातिपदिकत्वञ्च गृहीत्वा तद्रूपावच्छिन्नातिरिक्तत्वेन स्वौजसमौडित्यस्योद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचं विधाय

72 अष्टा., २/३/१९
73 अष्टा., ३/१/२६
74 अष्टा., २/२/१६
75 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-७८
76 अष्टा., २/३/१९
77 अष्टा., २/३/१०
78 अष्टा., २/३/११
79 अष्टा., २/३/२५
80 अष्टा., २/३/३२
81 अष्टा., २/३/३५
82 अष्टा., २/३/४२

कारकेतरबोधकप्रातिपदिकात् पञ्चमी चेत्तर्हि 'अन्यारादितरर्ते' इत्यादिवचनानामुद्देश्यताऽवच्छेदकानामन्यतमत्वावच्छिन्नात् प्रातिपदिकादेव इति परिसंख्यात्मकनियमपक्षीया व्यवस्था, ततश्चान्यप्रातिपदिकस्य पञ्चमीप्रकृतित्वेन व्यावृत्तिः सिध्यति इति केषाञ्चन मतम्। तत्तु न शोभनम्। अन्यतमत्वस्य प्रवेशे गौरवात्। अतश्च कस्यचिदेकस्य ईदृशपरिसंख्यारूपं नियामकत्वमन्येषां पूर्ववद् विधित्वमेव समुचितम्। विकल्पात्मकनियमपक्षे तु पञ्चम्या अनियमनात् समेषामेषां नियामकत्वं निर्बाधम। तत्र प्रत्येकमुद्देश्यतावच्छेदकमादाय तदवच्छिन्नात् प्रातिपदिकाच्चेत् सुब्विभक्तिस्तर्हि पञ्चम्येव' इत्येवं नियमाकारो बोध्यः। अस्मिन् पक्षे तदुद्देश्यतावच्छेदकावच्छिन्नात् प्रातिपदिकात् पञ्चमीतरविभक्तिव्यावृत्तिः सिध्यति।

अत्रायं विवेकः - विकल्पितपञ्चमीविधायकानां "विभाषा गुणेऽस्त्रियाम्,
अत्रायं विवेकः - विकल्पितपञ्चमीविधायकानां "विभाषा गुणेऽस्त्रियाम्, पृथग्विनानानाभिस्तृतीयान्यतरस्याम्, दूरान्तिकार्थेभ्यो द्वितीया च" इत्येतेषां विकल्पात्मकनियमपक्षे नियमशरीरं कीदृशमिति चेदुच्यते - 'गुणे हेतावस्त्रीलिङ्गे वर्तमानात् प्रातिपदिकात् सुब्विभक्तिश्चेत्तर्हि वैकल्पिकी पञ्चम्येव' अथवा पञ्चमीतृतीयान्यतरैव। पृथगादियोगविशिष्टात् प्रातिपदिकाच्चेत् सुब्विभक्तिस्तर्हि द्वितीयातृतीयापञ्चमीनामन्यतमैव। एवञ्च न केवलं प्रसिद्धानि सूत्राणि व्याख्यातानि अपितु स्वरप्रकरणस्थान्यपि सूत्राणि विवेचितानि। यथा - "युक्तारोह्यादयश्च"[83] 'इत्यस्मिन् सूत्रे विविधाः नियमाकाराः प्रदर्शिताः भवन्ति। "णिनि" इति नियम्यसूत्रीयमुद्देश्यतावच्छेदकं णिनिप्रत्ययान्ततदाद्युत्तरपदाव्यवहितपूर्वपूर्वपदाद्यत्वम्।तद्व्याप्यं रूपम् - आरोहिरूपोत्तरपदाव्यवहितपूर्वपूर्वपदाद्यत्वम्। इदमेव मध्यवर्तिरूपम्। एतद्रूपावच्छिन्नातिरिक्तत्वेन णिनिसूत्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचे कृते सति आरोहिरूपोत्तरपदपरकपूर्वपदस्यादिरुदात्तश्चेत्तर्हि उक्तोत्तरपदपरकयुक्तरूपस्यैव पूर्वपदस्य। तेन "मुक्तारोहौ" इत्यादौ न भवति पूर्वपदस्याद्युदात्तता। एतावति नियमे स्वीकृतेऽपि "युक्तश्लाघौ" इत्यादीनां व्यावृत्तिर्न भवति। अतोऽत्र द्विधा नियमः स्वीक्रियते। स च द्वितीयो नियमाकार इत्थं बोध्यः - युक्तरूपपूर्वपदाव्यवहितोत्तरारोहिरूपोत्तरपदघटितसमासत्वम्। तद्व्यापकं रूपम् - युक्तरूपपूर्वपदाव्यवहितोत्तरयत्किञ्चिण्णिनिप्रत्ययान्ततदाद्युत्तरपदघटितसमासत्वम्।

अस्मिन् ग्रन्थे स्त्रीप्रत्ययानामपि नियम्यनियामकभावः परिशीलितः।[84] तत्र "अजाद्यतष्टाप्, कौरव्यमाण्डूकाभ्याञ्च, संख्याऽव्ययादेर्ङीप्"[85] इत्यादीनि प्रमुखानि

83 अष्टा., ६/२/८१

84 सि.चि., द्वितीय भाग, प्रथम खण्ड, पृष्ठ-९,१०

85 अष्टा., ४/१/२६

सूत्राणि वर्तन्ते। तेष्वेकं सूत्रमत्र पश्यामः। यथा - संख्याऽव्ययादेर्ङीप्। ङीषोऽपवादः, संख्याऽव्ययादेरुधोऽन्तान्ङीष्प्रत्ययोऽनेन क्रियते। 'बहुव्रीहेरुधसो ङीष्'[86] इति सूत्रन्तु अस्योत्सर्गः व्यापकधर्मावच्छिन्नोद्देश्येताकत्वात्। तथाहि ऊधश्शब्दान्ताद् बहुव्रीहेः स्त्रीत्वविवक्षायां ङीष्प्रत्ययस्तेन क्रियते। एवञ्च संख्याव्ययादेरूधोऽन्तो यो बहुव्रीहिस्तद्गतं बहुव्रीहित्वमुद्देश्यतावच्छेदकं तदीयं व्याप्यम्। ऊधश्शब्दान्तबहुव्रीहित्वमुत्सर्गशास्त्रीयोद्देश्यतावच्छेदकं व्यापकमिति व्याप्यधर्मावच्छिन्नोद्देश्यताकेन 'संख्याव्ययादेर्ङीप्' इत्यनेन व्यापकधर्मावच्छिन्नोद्देश्यकताकस्य बहुव्रीहेरूधसः बाधः सम्पद्यते।

अस्मिन् ग्रन्थे द्वितीयखण्डे भागद्वयं वर्तते। तत्र एतावन्तो विषया प्रामुख्येणास्माभिर्विवेचिता। वस्तुतः गुरुभिः स्थापितोंऽश एव ततो निसृत्य प्रतिष्ठापितः।

द्वितीयखण्डे चतुर्थाध्यायत अष्टमाध्यायपर्यन्तं प्रतिसूत्राणां विवेचनं कृतं वर्तते। तत्र एकनवतिः सूत्राणां संक्षेपतो व्याख्यानं विद्यते। तत्र प्रामुख्येण कतिपयसूत्राण्येवात्र प्रतिष्ठाप्यन्ते। यथा सप्तमाध्याये 'अतोऽम्'[87] इति सूत्रस्य व्याप्यव्यापकभावं पश्यामः।[88]

"अतोङ्गात् क्लीबात् स्वमोरम् स्यात्"। अपवादशास्त्रमेतत् उत्सर्गसूत्रन्तु 'स्वमोर्नपुंसकात्'। क्लीबादङ्गात् स्वमोर्लुक् स्यात्। अदसीयोद्देश्यतावच्छेदकम् - क्लीबत्वनिरूपितवृत्तिमदङ्गाव्यवहितोत्तरत्वविशिष्टं 'सु अम्' इत्यनन्तरत्वम्। इदञ्च व्यापकम्।

अतोऽमित्यस्योद्देश्यतावच्छेदकम् - क्लीबे वर्तमानाददन्ताङ्गव्यवहितोत्तरत्वविशिष्टं सु-अम् इत्यन्यतरत्वम्। इदञ्च व्याप्यम्। यत्र यत्र अतोऽमित्यस्योद्देश्यतावच्छेदकम्, तत्र तत्र स्वमोरित्यस्योद्देश्यतावच्छेदकम्। अतश्चानयोर्द्वयोरुत्सर्गापवादभावः प्रतिफलत्येवेति। उक्तञ्च कौमुदीग्रन्थे श्रीमद्भट्टोजिदीक्षितेन अमि लुकोऽपवादमम्भावं बाधित्वा परत्वाज्जरस्। तत्र सन्निपातपरिभाषया न लुक्। 'अजरसम्' इति। अतिजरसमित्यादौ पूर्वविप्रतिषेधेन अतिजरमेव रूपं भवतीति नव्याः। गुरुणां तात्पर्यन्तु केवलम् उत्सर्गापवादशास्त्रयोः मध्यमवर्तिनो रूपस्य अवधारणमेव। अपवादविषये पक्षद्वयं शास्त्रे चर्चितम्। एको बाध्यसमानचिन्तापक्षः, अपरस्तु बाध्यविशेषचिन्तापक्षः। तत्र 'पूर्वे पठिता अपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्'। मध्येऽपवादन्याय इत्यादिसर्वं बाध्यविशेषचिन्तापक्षस्यैव उदाहरणं जातं वर्तते। बाध्यसामान्यचिन्तापक्षस्य एत्येधत्यूठ्सु, उर्ऋत् प्रभृतीनि शास्त्राणि

86 अष्टा., ४/१/२५

87 अष्टा., ७/१/२४

88 सि.चि., द्वितीय भाग, द्वितीय खण्ड, पृष्ठ-१३७

वर्तन्ते।[89] तत्र अन्यानि बहून्युदाहरणान्यपि सन्त्येव। प्रकृतप्रसङ्गे उर्ऋदिति सूत्रस्य व्याख्यानं पश्यामः।

उपधाया ऋवर्णस्थाने ऋत्स्याद्वा चङि परे णौ। इररारामपवादः। अपीपृथत्, अपपर्थत्। अत्र सूत्रे 'णौ चङ्युपधायाः ह्रस्वः'[90] इत्यतो णौ, चङि, उपधायाः इति पदत्रयमनुवर्तते, 'जिघ्रतेर्वा'[91] इत्यतो वापदमनुवर्तते। अतश्च उपधाया ऋवर्णस्येत्याद्यर्थः सम्पन्नः। उत्सर्गसूत्राण्यस्य त्रीणि सन्ति - 'उपधायाश्च, पुगन्तलघूपदस्य च, मृजेर्वृद्धिः'[92] इति। यत्र यत्र ऊर्ऋदित्यस्य प्राप्तिः तत्र तत्र उपधायाश्च-पुगन्तलघूपधस्य च-मृजेर्वृद्धिरित्येतेषामन्यतमस्य प्राप्तिरिति अन्यतमत्वेनैतेषां व्यापकता बोध्या। तत्र ऋकारोपधेऽचीकृतदित्यादौ उपधायाश्चेति इकारादेशः प्राप्तः। अमीमृजदित्यत्र मृजेर्वृद्धिरित्यनेन आदादेशः प्राप्तः। अन्येषाम् ऋदुपधानां 'वृतु' इत्यादिधातूनामपीपृथदपपर्थदित्यादिस्थलेषु लघुपधगुणेन अरादेशः प्राप्त इति।

नन्विह उरित्यनूद्यमानः सवर्णान् गृह्णाति, ऋदिति विधीयमानस्तु न गृह्णाति। तथा च अचीक्लृपदित्यत्र उर्ऋदित्यनेन सवर्णे सति अचीकृपदिति स्यादिति चेदुच्यते - लत्वस्यासिद्धं तथा प्रथमम् उर्ऋदित्यस्य प्रवृत्या तदनु 'कृपो रो ल' इत्यस्य प्रवृत्तावृकारैकदेशस्य लुका लृकारैकादेशविधानेनेष्टसिद्धिः सुलभा। न च 'चलीकृप्यते' इत्यादौ रीगागमादेर्नत्वार्थं 'कृपो रो ल' इत्यस्यावश्यकत्वेऽपि 'कृपूधातुः' 'क्लृपूसामर्थ्ये' इत्येव पठनीयम्। एवं हि प्रक्रियालाघवं भविष्यति, ऋकारैकदेशस्य लकारैकदेश इति व्याख्यानक्लेशोऽपि न भविष्यतीति वाच्यम्। अचीक्लृपदित्यत्र उर्ऋदित्यस्य प्रवृत्तौ अनिष्टरूपप्रसक्तेः। 'कृपो रो लः' इत्यनेन ऋकारैकदेशस्य लकारैकदेश इति स्वीकारे तूक्तव्याख्यानक्लेशस्य दुर्वारत्वात्। एषा च कैयटपद्धतिः न च क्षोदक्षमा, ऋत उदित्यत्र तपरकरणेन लृवर्णग्राहकत्वे रूपसिद्धेः स्पष्टं लाभात्। अष्टमाध्याये तु पूर्वत्रासिद्धमित्स्य प्रभावो भवत्येव। अत एव 'अधिकारोऽयम्' इति प्रतिज्ञातम्, तेन महान् विरोधः प्रतिभाति। पूर्वशास्त्रं प्रति परशास्त्रस्यासिद्धत्वात्। अत एव 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधः' इति प्रवादः संगच्छते। तथापि पूर्वत्रासिद्धमित्यस्य विषयावधारणेऽपवादातिरिक्तं परं शास्त्रमसिद्धमिति विवेचनीयम्।

एतत्सर्वं शब्देन्दुशेखरे निरूपितम्।[93] अत एव 'हो ढः'[94] 'दादेर्धातोर्घः' इत्यनयोरुत्सर्गापवादयोर्व्याप्यव्यापकभावापन्नमध्यमवर्तिनो रूपस्य किमपि स्वरूप-

89 सि.चि., द्वितीय भाग, द्वितीय खण्ड, पृष्ठ-१३९
90 अष्टा., ७/४/१
91 अष्टा., ७/४/६
92 अष्टा., ७/२/११४
93 सि.चि., द्वितीय भाग, द्वितीय खण्ड, पृष्ठ-१४०
94 अष्टा., ८/२/३१

मवधारणीयं भवति, तत्सर्वं गुरुभिः कृतम्। यथा - "हस्य ढः स्याज्झलि पदान्ते च"। 'झलो झली'त्यतो झलीत्यनुवृत्तम्, पदस्येत्यधिकारश्च। 'स्कोः संयोगाद्योरन्ते चे[95]'त्यतोऽन्ते इति चानुवृत्तम्। अतो वाक्यभेदेन व्याख्यातम् - झलि पदान्ते चेति। इदमुत्सर्गशास्त्रम्। अस्योद्देश्यतावच्छेकम् - झलव्यवहिपूर्वत्वविशिष्टं हत्वम्, पदनिरूपितपरत्वविशिष्टं हत्वञ्च। 'दादेर्धातोर्घः'[96] इति त्वपवादशास्त्रम्। उपदेशे दादेर्धातोर्हस्य घः स्याज्झलि पदान्ते चेति तस्यार्थः। धातोरित्यस्यावृत्याऽतिरिच्यमानस्यैकस्य धातोरित्यस्य फलमिदमुपदेश इति। एवं झलव्यवहितपूर्वत्वविशिष्टमुपदेशकालिकदादिधात्ववयवत्वम्, पदान्तत्वविशिष्टमुपदेशकालिकदादिधात्ववयवत्वविशिष्टं हत्वं चेत्युभयमुद्देश्यतावच्छेदकम्। इदञ्च 'हो ढ'रित्यस्योद्देश्यतावच्छेदकापेक्षया व्याप्यम्। तत्तु व्यापकमित्यदसीयोद्देश्यतावच्छेदकावच्छिन्नातिरिक्तत्वेन 'हो ढ'रित्यस्योद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचः, इत्यनयोरुत्सर्गापवादभावः सिद्ध्यति। भाव्येऽपि ननु धुगित्यादौ 'हो ढ'रित्येतत्प्रति दादेर्धातोरित्यस्यासिद्धत्वात् कथं घत्वम्? अपवादत्वादित्युक्तम्।

इत्थम् अध्ययनाध्यापनस्य प्रकृष्टपद्धतौ भवन्ति ये जिज्ञासवः तेषां कृते अयं ग्रन्थोऽत्यन्तमुपादेयः। अत्र ग्रन्थेऽक्षरमपि निष्प्रयोजनं नाकूतं गुरवः आसन् महान्तो वैयाकरणाः तेषां प्रतिक्षणं शास्त्रव्यापारे एव क्षपिते - आसूर्योदयात् रात्रिं यावच्छात्राः पठनाय आगच्छन्ति स्म।

सिद्धान्तकौमुद्याः तादृशं प्रतरां ज्ञानमद्यत्वे क्वाऽपि नोपलभ्यते। न केवलं सिद्धान्तकौमुदीग्रन्थः, अपितु अन्येऽपि विषया अत्र ग्रन्थे महता समारम्भेन विवेचिताः। यथा - द्विमुनि, व्याकरणस्य त्रिमुनि, इति इमे उदाहरणे भेदपक्षं मत्वा लोकादरेण दत्ते। परन्तु 'विद्यातद्वतोऽभेदः' इति पक्षे 'त्रिमुनिव्याकरणम्' 'एकविंशति भारद्वाजम्' इत्यादीन्यप्युदाहरणानि दत्तानि। एकैकस्य धातोः दशसु लकारेष्वपि रूपाणि पूज्यानां तथाऽभ्यसितानि आसन्, यथा नान्यत्र कस्यापि 'अनुदात्तङित आत्मनेपदम्' इत्यस्मिन् सूत्रे नियमावधारणेनैतत्सर्वं ज्ञातुं शक्यते। तथा कर्तरि शप् 'श्लिषः' इत्यादिसूत्राणामुदाहरणमपि तथैव प्रमाणम्। यद्यप्यत्र प्रबन्धे गुरुणामेकैकस्य वाक्यस्याभिप्रायस्य निरूपणं कर्तव्यमासीत् तथापि सुधियस्तेषां सारपरं वचः संस्तुत्य संस्तुत्य महतो महतोऽर्थानवगमिष्यन्ति। अवगच्छन्ति स्म च। तेनात्र प्रबन्धे तेषामेव वाक्याजातं संग्रहीतं न मदीयं किमप्यत्र। अन्ते तेषां श्रीचरणेषु नामं नाममहमेतत्कर्मणः विरतिं लभे।

95 अष्टा., ८/२/२९

96 अष्टा., ८/२/३२

## शब्दसंकेत

1. अष्टा. - अष्टाध्यायी
2. परि.शे. - परिभाषेन्दुशेखर
3. म.भा. - महाभाष्यम्
4. ल.श.शे. - लघुशब्देन्दुशेखर
5. सि.चि. - सिद्धान्तचिन्तामणि

## सन्दर्भग्रन्थसूची

1. परिभाषेन्दुशेखरः, आचार्यः श्रीपादसत्यनारायणमूर्तिः (सम्पा.), राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००४
2. श्रीमन्महर्षिपतञ्जलिविनिर्मितं पाणिनीयव्याकरणमहाभाष्यम्, श्रीमन्नागेशभट्टविरचित भाष्यप्रदीपोद्योतोद्भासितेन, 1-6 खण्डः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९८७
3. पाणिनिविरचिता अष्टाध्यायी, परिष्कर्ता श्रीगोपालदत्तशास्त्री, श्रीगोपालदत्तपाण्डेयः (सम्पा.), चौखम्बा सुरभारती प्रकाशन ग्रन्थमाला, २०१७

✿✿✿

# शाब्दबोधप्रयोजकं पाणिनीयं व्याकरणम्

विष्णुकान्तपाण्डेयः

शब्दाज्जातः शाब्दः, सः चासौ बोधः शाब्दबोधः शब्दजन्यार्थज्ञानमित्यर्थः। तत्र शाब्दबोधे शब्दजन्यार्थज्ञाने उपस्थितिः कारणमिति कार्यकारणभावः। तथा च घटादिपदात् पटादिविषयकशाब्दबोधवारणाय तत्पदजन्यतद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदजन्यतद्विषयकोपस्थितिः कारणमिति कार्यकारणभावस्वीकारे न घटपदात् पटादि विषयकः शाब्दबोधः। यतो हि घटपदात्पटविषयकोपस्थितिर्न भवति अतो न तद्विषयकः शाब्दबोधः। नन्वेवमपि घटपदादेः समवायसम्बन्धेन सम्बन्ध्याकाशविषयकोपस्थितिबलादाकाशविषयकशाब्दबोधवारणाय कारणकोटौ वृत्तिज्ञानविशेषणं प्रदेयम्। तथा सति तत्पदजन्यतद्विषयकशाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनोपस्थितिः कारणमिति कार्यकारणभावोऽङ्गीकर्तव्यः। एवमाकाशस्योपस्थितिः सम्बन्धित्वेन वर्तते वृत्तिज्ञानाधीना नास्ति। अतः घटपदादाकाशविषयकः शाब्दबोधो न जायते। शक्तिप्रसङ्गात् तस्याः स्वरूपमाह -

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥[1]

अयं भावः इन्द्रियाणां चक्षुरादीनां स्वविषये चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता तदीयचाक्षुषादिकारणता तथा शब्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थः। अर्थात् प्राचीनवैयाकरणानां मते बोधजनकत्वरूपयोग्यता एव शक्तिः। अत्रेदं शंङ्कते यत् आधुनिकदेवदत्तादौ पित्रादेः संकेतज्ञानादेवार्थबोधो भवति, न तु बोधजनकतारूपशक्तिज्ञानेन। एवं बोधजनकतारूपशक्तिस्वीकारे तु कारणाभावे कार्यसत्त्वेन व्यतिरेकव्यभिचारः स्यादिति चेन्न, इदम्पदम् एनमर्थं बोधयतु इतीच्छाग्रहे पदे पदार्थबोधकत्वस्यावगाहेन व्यभिचाराभावात्। समाधानस्येदं तात्पर्यं यत् 'इदं पदम् एनमर्थं बोधयतु' इतीच्छारूपसंकेते एतदर्थबोधकत्वं विशेषणं वर्तते। तथा च इदम् अर्थबोधकत्वं च इच्छारूपसंकेते विषयतया प्रविष्टमस्ति। एवं संकेतज्ञाने अर्थबोधकारणतायाः सत्त्वेन न व्यतिरेकव्यभिचार इति।

न च स्वातन्त्र्येणार्थबोधकता ज्ञानकारणं वाच्यम्, अन्यथा नेदं तद्बीजनकम् इति ज्ञानवतः 'अस्माच्छब्दादयमर्थो बुद्धोऽनेन' इति जानतस्तद्ग्रहापत्तेरिति वाच्यं नेदं तद्बीजनकमिति ग्रहवतो बाधेन पदे परग्रहं जानतोऽपि तद्ग्रहासंभवात्। अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेरिति।

---

[1] वै.भू., शक्तिनिर्णयः 36

नव्यवैयाकरणो नागेशभट्टो नैयायिकमतं खण्डयन् स्वमतमुपस्थापयन्नाह - इच्छा शक्तिः, सैव सङ्केतः सम्बन्ध इति नैयायिकमतं समीचीनं नास्ति। इच्छायाः सम्बन्धिराश्रयता-नियामकत्वाभावेन सम्बन्धत्वाभावात् 'सम्बन्धो हि सम्बन्धिद्वय-भिन्नत्वे सति, द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः' इत्यभियुक्तव्यव-हारात्। यथा घटवद् भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्ठो घटनिरूपितसंयोगाश्रयः भूतलमिति विशिष्टबुद्धिनियामकश्च, नात्र तथा घटशब्द इच्छावान् तदर्थो वा इच्छावानिति व्यवहारः।

तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया। तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यं, तदेव सम्बन्धः। उभयनिरूपिततादात्म्य-वानुभय इत्यर्थपदयोर्व्यवहारात्।

प्राचीनवैयाकरणानां मतं निराकुर्वन्नुच्यते बोधजनकत्वस्यापि आश्रयता-नियामकत्वाभावान्न सम्बन्धत्वम्। नापि तस्य शक्तित्वम्। प्रयोज्यप्रयोजकव्यवहारं पश्यता बालेन प्रयोज्यस्य प्रवृत्त्या तस्य ज्ञानमनुमाय ज्ञानस्योपस्थितत्वाच्छब्दमेव कारणत्वेन गृहीत्वाऽसम्बन्धस्य कारणत्वानुपपत्ति ज्ञानपूर्वकं कल्प्यमानस्य स्वयम-नुपपद्यमानत्वेन गृहीतजनकत्वरूपस्य तद्घटितस्य वा ग्रहीतुमनुचितत्वात्। अत एव वाच्यवाचकभावरूपशक्तिर्गृह्यत इति।

शक्तिग्रहस्तु व्याकरणादितो भवति। तथा शक्तिग्रहं व्याकरणोपमान-कोशाप्तवाक्याद् व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः। अयं भावः -

1. व्याकरणात् शक्तिग्रहः – अत्र व्याकरणपदेन अष्टप्रस्थानमिन्द्रादिप्रणीतं शब्दशास्त्रं गृह्यते,
2. उपमानम् - सादृश्यज्ञानात्मक प्रमाणम्,
3. कोशः - अमरकोशनिघण्ट्वादिः,
4. आप्तवाक्यम् - प्रयोगहेतुभूतयथार्थज्ञानवत्पुरुषोच्चारितवाक्यम्,
5. व्यवहारः - शब्दप्रयोगः, प्रयोज्यवृद्धमुद्दिश्य उत्तमवृद्धादिकृतो गामानये-त्यादिरूपः, चेष्टाद्यात्मकश्च,
6. वाक्यस्य शेषः - प्रकृतवाक्यातिरिक्ते वाक्ये प्रकृतवाक्यार्थबोधोपयोगी कदम्बोऽर्थवादाद्यात्मकः,

7. विवृतिः - विवरणम् पर्यायादिकम्,

8. सिद्धपदस्य सान्निध्यम् - प्रसिद्धपदस्य सन्निधिः

एतान्यष्टौ शक्तिज्ञानस्य प्रयोजकानि भवन्ति इति वृद्धा मन्यन्ते।

तानि क्रमशः प्रदर्श्यन्ते (1) व्याकरणात् शक्तिग्रहः – धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहः व्याकरणाद् भवति। अयं भावः भू सत्तायाम्, अत सातत्यगमने, डुपचष् पाके इत्यादिव्याकरणात् भ्वादिधातूनां सत्ताद्यर्थे शक्तिः। व्याकरणे रामादिप्रकृतेः अमुकार्थे शक्तिरित्यदर्शितप्रायत्वात् धातुरूपप्रकृतिरित्यर्थो बोध्यः अथवा प्रकृतिपदं पाचकादिप्रातिपदिकं बोधयति। पाचकार्थस्य पच् धातोः तदुत्तरकृत्प्रत्ययस्य कर्त्रर्थकस्य च तत्र प्रतिपादनेन व्याकरणाच्छक्तिग्रहः। तत्र व्युत्पन्नानां प्रातिपदिकानां व्याकरणाच्छक्तिग्रहः। अव्युत्पन्नानां तु कोशादेव शक्तिग्रहः इति मे मतिः। अथवा प्रकृतिपदं निपातनरूपमभिप्रेत्य प्रयुक्तम्। यथा - अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु[2] इति सूत्रे अवद्य = गर्ह्ये, पण्य = पणितव्ये, वर्या = अनिरोधे अर्थे क्यपं प्रबाध्य यत्प्रत्ययान्ता निपात्यन्ते। एवम् 'विपूयविनीयजित्या मुञ्जकल्कहलिषु[3] इति सूत्रे विपूय = मुञ्जतृणे, विनीय = कल्के पापे, जित्या = कर्षितव्येऽर्थे निपात्यन्ते।'

वस्तुतस्तु 'स्वमज्ञातिधनाख्यायाम्'[4] 'अन्तरं बहिर्योगोपसंव्यानयोः [5]' इत्यादौ नियतार्थे शक्तिमत्स्वाऽन्तरादिपदमुद्दिश्य संज्ञादिविधानाद् प्रकृतीनां स्वार्थे शक्तिग्रहो व्याकरणेऽपि भवतीति बोध्यम्। तथा च 'वर्तमाने लट्'[6]' इति सूत्रानुरोधात् वर्तमानेऽर्थे लट्प्रत्ययस्य शक्तिग्रहः। 'परोक्षे लिट्'[7] इति सूत्रे 'भूते'[8], 'अनद्यतने लङ्'[9] इति सूत्राभ्यां भूते, अनद्यतने इति पदेऽनुवर्तेते। तेन अनद्यतने परोक्षे भूते लिट् प्रत्ययस्य शक्तिग्रहः। तथा च 'अनद्यतने लुट्'[10] इति सूत्रप्रामाण्याद् अनद्यतने भाविनि अर्थे लुट् प्रत्ययस्य शक्तिः। 'लृट् शेषे च' इति सूत्रात् भविष्यत्सामान्ये लृट्प्रत्ययस्य शक्तिः। 'लिङर्थे लेट्'[11] 'लोट् च'[12] इति सूत्राभ्यां विध्यादौ प्रार्थनादौ

[2] अष्टा., 3-1-101
[3] अष्टा., 3-1-117
[4] अष्टा., 1/1/35
[5] अष्टा., 1/1/36
[6] अष्टा., 3/2/123
[7] अष्टा., 3/2/115
[8] अष्टा., 3/2/84
[9] अष्टा., 3/2/111
[10] अष्टा., 3/3/15
[11] अष्टा., 3/4/7
[12] अष्टा., 3/3/162 or 8/1/52

च लेट् प्रत्ययस्य लोट् प्रत्ययस्य च शक्तिः। तथा चोक्तम् -

वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ॥[13]

अत्र टिल्लकाराणामर्था निर्दिष्टाः।

ङिल्लकाराणामर्थं निर्दिशति -

ह्योभूते प्रेरणादौ च भूतमात्रे लङादयः
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः ॥[14]

'अनद्यतने लङ्' इति सूत्रानुरोधेन 'अनद्यतने भूते' अर्थे लङ्प्रत्ययस्य शक्तिः। 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्'[15] इति सूत्राद् प्रेरणादौ लिङ्-प्रत्ययस्य शक्तिः। प्रेरणादौ इत्यादिपदेन आशीः, हेतुहेतुमद्भावादयो गृह्यन्ते।

'भूते' इत्यधिकृत्य 'लुङ्'[16] इति सूत्राद् भूतसामान्ये लुङ् प्रत्ययस्य शक्तिः। एवं 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रात् हेतुहेतुमद्भावे भूते भाविनि कार्य-कारणभावापन्नप्रकृत्यर्थयोः भूतत्वे भविष्यत्त्वे वा लृङ्प्रत्ययस्य शक्तिः।

वृत्तिज्ञानाधीनोपस्थित्या च एवं क्रमेण शाब्दबोधो भवति।
शाब्दबोधः –

1. पचति = एककर्तृको वर्तमानकालिको विक्लित्त्यनुकूलो व्यापारः।

2. पपाच = एककर्तृकः परोक्षानद्यतनभूतकालिकः विक्लित्त्यनुकूलो व्यापारः। अथवा क्रियाया अतीन्द्रियत्वेन 'परोक्षे' इति कारकस्य विशेषणमिति पक्षे च परोक्षैककर्तृकः अनद्यतनभूतकालिको विक्लित्त्यनुकूलो व्यापारः।

3. पक्ता = एककर्तृकः अनद्यतनभविष्यकालिको विक्लित्त्यनुकूलो व्यापारः।

4. पक्ष्यति = एककर्तृकः सामान्यभविष्यत्कालिको विक्लित्यनुकूलो व्यापारः।

[13] वै.भू., लकारार्थनिर्णयः 22
[14] वै.भू., लकारार्थनिर्णयः 23
[15] अष्टा., 3/3/161
[16] अष्टा., 3/2/120

5. भवतु ते शिवप्रसादः = हितविषयकमदिच्छाविषयत्वसम्बन्धि शिवप्रसाद कर्तृकं भवनमिति बोधः ।

6. लङ् = अस्य पुत्रोऽभवत् = वर्तमानध्वंसप्रतियोग्यनद्यतनकालवृत्तिरेतत्सम्बन्धिपुत्रकर्तृकोत्त्पत्यनुकूलो व्यापार इति बोधः ।

7. लुङ् = घटोऽभूत् = विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयकः उत्पत्त्यनुकूलो व्यापारः ।

8. बह्निश्चेद् प्राज्वलिष्यद् ओदनमपक्ष्यत् = बह्यभिन्नाश्रयक भाविप्रज्वलनजन्यौदनाश्रयकविक्लित्यनुकूल व्यापार इति शाब्दबोधः ।

सुवृष्टिश्चेदभविष्यद् सुभिक्षमभविष्यद् = सुवृष्टि = अभिन्नाश्रयकभाविभवनजन्यसुभिक्षाश्रयकोत्पत्त्यनुकूलव्यापारः ।

प्राचीनवैयाकरणा कर्मप्रत्ययस्थलेऽपि उक्तरीत्या एव शाब्दबोधं स्वीकुर्वन्ति। नव्यास्तु 'ओदनः पच्यते' इत्यस्य वर्तमानकालिक व्यापारजन्य-एकौदननिष्ठा विक्लितिः इति बोधं स्वीकुर्वन्ति। तथा च 'लकाराः सकर्मकेभ्यः कर्मकर्तरि, अकर्मकेभ्यः भावे कर्तरि च' इत्यर्थकात् 'लः कर्मणि च भावे चाकर्मकेभ्यः'[17] इति सूत्राद् लकाराणां कर्मणि कर्तरि च शक्तिः। 'तान्येकवचनद्विवचनबहुवचनान्येकशः'[18] 'द्व्येकयोर्द्विवचनैकवचने'[19] 'बहुषु बहुवचनम्'[20] इति सूत्रानुरोधात् संख्यापि तिङोऽर्थः। एवं कर्तृकर्मसंख्याकालाः तिङर्थाः। तत्र कर्तृप्रत्ययसमभिव्याहारे कर्तृसंख्याकालाः भासन्ते। कर्मप्रत्ययसमभिव्याहारे कर्मसंख्याकालाश्च भासन्ते। तथा चोक्तम् -

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शप्श्नमाद्यास्तद् द्योतयन्त्याश्रयान्वयम् ॥[21]

तथा च सुब्विभक्तीनामाश्रयाद्यर्थाः सन्ति उक्तं च वैयाकरणभूषणसारे -

आश्रयोऽवधिरूद्देश्यः सम्बन्धः शक्तिरेव वा

[17] अष्टा., 3/4/69
[18] अष्टा., 1/4/102
[19] अष्टा., 1/4/22
[20] अष्टा., 1/4/21
[21] वै.भू., धात्वर्थनिर्णयः 3

यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥[22]

तत्र द्वितीया-तृतीया-सप्तमीनामाश्रयोऽर्थः। अवधिः पञ्चम्यर्थः। उद्देश्यश्च-तुर्थ्यर्थः। सम्बन्धः षष्ठ्यर्थः भवति। तथा हि – क्रियाजन्यफलाश्रयः कर्म (कर्तुरीप्सिततमस्य) 'कर्मणि द्वितीया'[23] इत्यनुरोधात् द्वितीयाया आश्रयोऽर्थः।

'स्वतन्त्रः कर्ता'[24] = धात्वर्थव्यापाराश्रयः कर्ता = 'कर्तृकरणयोस्तृतीया'[25] इत्यनुरोधात् तृतीयाया अपि आश्रयोऽर्थः। 'आधारोऽधिकरणम्'[26], 'सप्तम्यधिकरणे च'[27] इति सूत्रानुरोधात् सप्तम्या आश्रयोऽर्थः।

'ध्रुवमपायेऽपादानम्'[28], 'आपादाने पञ्चमी'[29] इति सूत्रानुरोधात् पञ्चम्या अवधौ शक्तिः।

'कर्मणा यमभिप्रैति स सम्प्रदानम्'[30] 'चतुर्थी सम्प्रदाने'[31] इति सूत्रानुरोधात् उद्देश्ये चतुर्थ्याः शक्तिः। 'षष्ठी शेषे'[32] इति सूत्रानुरोधात् षष्ठ्याः सम्बन्धे शक्तिः।

एवम् 'चैत्रस्तण्डुलं पचति' इत्यस्य शाब्दबोधः = चैत्राभिन्नैककर्तृको वर्तमानकालिकः तण्डुलनिष्ठविक्लित्त्यनुकूलो व्यापारः।

चैत्रेण तण्डुलः पच्यते = चैत्राभिन्नकर्तृवृत्तिवर्तमानकालिकव्यापारजन्य-तण्डुलाभिन्नैकत्वावच्छिन्नाश्रय-वृत्तिविक्लितिरिति बोधः।

**दर्शनान्तररीत्या शाब्दबोधः**

**मीमांसकाः**

- चैत्रभिन्नैककर्तृका वर्तमानकालिकी विक्लित्त्यनुकूला भावना। नैयायिकाः

[22] वै.भू., सुबर्थनिर्णयः 24
[23] अष्टा., 2/3/2
[24] अष्टा., 1/4/54
[25] अष्टा., 2/3/18
[26] अष्टा., 1/4/45
[27] अष्टा., 2/3/36
[28] अष्टा., 1/4/24
[29] अष्टा., 2/3/28
[30] अष्टा., 1/4/32
[31] अष्टा., 2/3/13
[32] अष्टा., 2/3/50

– चैत्रः तण्डुलं पचति। तण्डुलनिष्ठविक्लित्यनुकूलवर्तमानकालिकव्यापारानुकूलकृतिमाँश्चैत्रः ।

- चैत्रेण तण्डुलः पच्यते – चैत्राभिन्नाश्रयकवृत्तिवर्त्तमानकालिकव्यापारजन्यविक्लित्त्याश्रयस्तण्डुलः ।
- कर्मवाच्ये 'रामेण वाणेन हतो बाली' इत्यस्य रामाभिन्नकर्त्तृनिष्ठव्यापारप्रयोज्यो यो वाणनिष्ठो व्यापारस्तज्जन्यं यत् प्राणवियोगरूपफलं तदाश्रयो बाली इति बोधः ।
- कर्तृवाच्ये 'रामो बाणेन बालिनं हन्ति' इत्यस्य च बाणव्यापारजन्यो बालिनिष्ठः प्राणवियोगस्तदनुकूलो रामकर्तृको व्यापारः इति बोधः ।
- अर्थात् रामव्यापारप्रयोज्यो वाणनिष्ठव्यापारः इति पार्ष्णिको बोधो भवति = पश्चाद् बोधो भवति।
- ब्राह्मणाय गां ददाति = इत्यस्य ब्राह्मणोद्देश्यकं गो कर्मकं दानमिति बोधः ।
- वृक्षात्पर्णं पतति इत्यस्य च वृक्षावधिकं पर्णकर्तृकं पतनमिति बोधः ।

'चैत्रः स्थाल्याम् ओदनं पचति' इत्यस्य स्थाल्यधिकरणिका या ओदननिष्ठा विक्लित्तिस्तदनुकूलो मैत्रकर्तृको व्यापार इति बोधः । तथा च समासादिवृत्तिष्वपि शक्तिग्रहे वैयाकरणानां मते। तथा चोक्तम् –

समासे खलु भिन्नैव शक्तिः पंकजशब्दवत्।
बहूनां वृत्तिधर्माणां वचनैरेव साधने॥
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ।[33]

अयं भावः - नैयायिकाः मीमांसकाश्च अजहत्स्वार्थावृत्तिरूपव्यपेक्षापक्षं स्वीकुर्वन्ति। वैयाकरणास्तु जहत्स्वार्थावृत्तिरूप-एकार्थीभावपक्षं स्वीकुर्वन्ति।

यदि समासे विशिष्टा शक्तिः स्वीकृता न स्यात्तर्हि अषष्ठ्यर्थबहुव्रीहौ इष्टो बोधो न स्यात्। तथाहि 'प्राप्तोदको ग्रामः' इत्यस्य इष्टो बोधो भवति = उदककर्तृकप्राप्तिकर्म ग्रामः इति। अयमिष्टो बोधो व्यपेक्षावादिनां मते न भविष्यति। यतो हि

33 वै.भू., समासनिर्णयः 31

प्राप्तिकर्त्रभिन्नमुदकमिति बोधोत्तरं तत्सम्बन्धि ग्रामलक्षणायामपि उदककर्तृकप्राप्तिकर्म ग्राम इति इष्टार्थालाभात्।

संज्ञासूत्राणि यानि सन्ति तानि सर्वाण्यपि शक्तिग्राहकाणि सन्ति। यथा - 'वृद्धिरादैच्'[34], 'अदेङ् गुणः'[35] इत्यादीनि। आदैच्-निरूपिता शक्तिः बृद्धिपदे। अदेङ्- निरूपिता शक्तिः गुणपदे।

तथा च पाणिनीयव्याकरणेन अस्मिन्नर्थे अयं शब्दः साधुरिति प्रतिपाद्यते। निरुक्तेन च अस्य शब्दस्यायमर्थः साधुरिति प्रतिपाद्यते। तत्र भगवता पाणिनिना वाक्ये पदपरिकल्पनं पदे प्रकृतिप्रत्ययपरिकल्पनम् अर्थानुसन्धानद्वारा एव कृतम्। इदं परिकल्पनं रेखागवयन्यायेन वर्तते। अथवा यथा नित्येऽपि खे = आकाशे, अनित्यानां हस्त्यादिकल्पना तथा नित्येऽपि शब्दे पदकल्पनं प्रकृतिप्रत्यययोर्वा परिकल्पनं कृतमस्ति। अर्थात् शब्दे वस्तुतो न प्रकृतिर्न च प्रत्ययः। अत एवोक्तम् -

उपायाः शिक्ष्यमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते॥[36]
पदे न वर्णाः विद्यन्ते, वर्णेष्ववयवा न च।
वाक्यात्पादानामत्यन्तं प्रविवेको न कश्चन॥[37]

अयं भावः – अर्थबोधनेच्छया व्यवह्रियमाणः शब्दो द्विविधात्मको भवति। एकः साधुत्वभावमापन्नः साधुशब्दः साधुशब्दोऽपरश्चासाधुत्वभावमापन्नोऽसाधुशब्दः। तत्र पुण्यजनकतावच्छेदक-धर्मविशेषरूपसाधुत्वभावमापन्नः साधुशब्दः यस्य पाणिनीयव्याकरणेनान्वाख्यानं कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागाभ्यां प्रतिपाद्यते।

(1) अवद्यपण्यवर्यागर्ह्यपणितव्यानिरोधेषु, (2) वह्यं करणम् करणेऽर्थे वह्यशब्दो निपात्यते। वह्यं शकटम्। वाह्यम् = वोढव्यमन्यत्। (3) अर्यः स्वामि-वैश्ययोः = अर्यः = स्वामी वैश्यो वा आर्यो ब्राह्मणः। (4) उपसर्या काल्या प्रजेन, (5) अजर्यं संगतम्, (6) स्वामिन्नैश्वर्ये, (7) क्षय्यजय्यौ शक्यार्थे, (8) क्रय्यस्तदर्थे इत्यादीनां सूत्राणामपि अर्थे शब्दसाधुत्वं प्रतिपाद्यते। क्रय्यं हि क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं भवति क्रेयमन्यत्। क्रयणार्हमित्यर्थः। इत्थं स्पष्टं यत्

34 अष्टा., 1/1/1
35 अष्टा., 1/1/2
36 वा.प., 2.240
37 वै.भू., स्फोटनिरूपणम् 66

भगवता पाणिनिना एभिः सूत्रैः शक्तिग्रहो बोध्यते, (9) कर्तरि कृत्, (10) तयोरेव-कृत्यक्तखलर्थाः, (11) तस्यापत्यम् , तस्य समूहः, तत्र भवः, तत्र जातः, अवयवे प्राण्योषधिवृक्षेभ्यः । इत्यादीनि -

तथा च नानार्थानां कस्मिन्नर्थे शक्तिरिति सन्देहापनोदाय संयोगादयस्तन्नि-यामकाः स्वीक्रियन्ते तथा चोक्तम् –

संयोगो विप्रयोगश्च साहचार्यं विरोधिता
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥[38]

सवत्सा, अवत्सा, रामलक्ष्मणौ, रामार्जुनौ = भार्गवकार्त्तवीयौ अञ्जलिना जुहोति, अञ्जलिना सूर्यमुपतिष्ठते इत्यादीनि क्रमेणोदाहरणानि बोध्यानीति दिक् ।

### शब्दसंकेत

1. अष्टा. - अष्टाध्यायी
2. वा.प. - वाक्यपदीयम्
3. वै.भू. - वैयाकरणभूषणसारः
4. सा.द. - साहित्यदर्पणः

### सन्दर्भग्रन्थसूची


1. Vaiyakarana Bhushanasara by Kaunda Bhatta, edt. Pandit Jibananda Vidyasagara, Calcutta, 1895
2. Vakyapadiya A treatise on the philosophy of Sanskrit Grammar by Bhrtrihari with Commentary of Punyaraja, edited by the pandits of the benaras sanskrit college, Benaras Printing Press, 1887


[38] सा.द., 2.14

3. पाणिनिविरचिता अष्टाध्यायी, परिष्कर्ता श्रीगोपालदत्तशास्त्री, श्री गोपालदत्तपाण्डेयः (सम्पा.), चौखम्बा सुरभारती प्रकाशन ग्रन्थमाला, २०१७

4. महामहोपाध्याय-श्रीजयकृष्णतर्कालङ्कारिण विरचिता सारमञ्जरी, श्रीजीवानन्दविद्यासागर (व्याख्या.), कलिकातामहानगरी, १९३५

5. श्रीविश्वनाथकविराजकृतः साहित्यदर्पणः, श्रीजीवानन्दविद्यासागर (सम्पा.), कलिकातानगरी, १९००

✿✿✿

# सुबर्थविचारसारः

आचार्यरामकृष्णमाचार्युलुः

"विभक्तिश्च"[1] इति सूत्रेण पाणिनिः सुप्-तिङ्-प्रत्ययानां विभक्तिसंज्ञां बोधयति। तत्र नामवाचकशब्दानां (Nouns) रामः, रामं, रामेण, रामस्य, रामेभ्यः इत्यादीनामन्ते श्रूयमाणाः प्रत्ययाः 'सुप्'प्रत्यया इत्युच्यन्ते इति पूर्वमेव ज्ञातम्। एतेषां प्रत्ययानां योजनेन नामपदानि वाक्याङ्गतया प्रयोगार्हाणि पदानि इत्युच्यन्ते। एवमेव समापकक्रियाबोधकानां क्रियापदानाम् अन्ते श्रूयमाणाः प्रत्ययाः 'तिङ्'प्रत्ययाः इत्युच्यन्ते इत्यपि ज्ञातमेव। तैः प्रत्ययैः युक्तानि अपि वाक्याङ्गतया प्रयोक्तुमर्हाणि पदानि भवन्ति। तथा च वाक्यावयवरूपेण प्रयोक्तुं द्विविधानामेव पदानामर्हता भवति। एतदेव सूचयति पाणिनिः "सुप्तिङन्तं पदम्"[2] इति सूत्रेण, सुबन्तं तिङन्तं च पदसंज्ञं भवतीति।

नामपदानां या सुब्विभक्तिः सा 'नामिकी' इत्यप्युच्यते। तथा तिङन्तस्य आख्याताम् इति नामान्तरम्। आख्यातानां या तिङ्-विभक्तिः सा 'आख्यातिकी' इत्युच्यते। सुब्विभक्तेः 'नामिकी' शब्देन, तिङ्विभक्तेः 'आख्यातिकी' शब्देन च व्यवहारः न्यायशास्त्रग्रन्थेषु प्राचीनेषु उपलभ्यते।

तिङ्विभक्तेः सामान्यतया प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः इति त्रिधा विभजनं भवति। पुनस्सा एकैका एकवचनं, द्विवचनं, बहुवचनम् इति त्रिधा भवतीति आहत्य नवविधा। सापि परस्मैपदात्मनेपदरूपेण भिन्ना अष्टादशधा भवति। "तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आतां-झ-थास्-आथां-ध्वम्-इट्-वहि-महिङ्"[3] इति सूत्रेण विहिताः अष्टादश तिङ्विभक्तिप्रत्ययाः, तत्रादौ नव परस्मैपदप्रत्ययाः अन्ये नव आत्मनेपदप्रत्ययाः।

सुब्विभक्तिः प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी चेति सप्तधा भवति। सापि पुनरैकैका एकवचन–द्विवचन-बहुवचनभेदेन त्रिधा भवतीति आहत्य सुब्विभक्तिप्रत्ययाः एकविंशतिः। यथा "सु-औ-जस्-अम्-औट्-शस्-टा-भ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि-भ्याम्-भ्यस्-ङस्-ओस्-आम्-ङि-ओस्-सुप्"[4] इति सूत्रेण विहिताः। सम्बोधनमपि प्रथमाविभक्तिभेद एव। प्रथमाविभक्तेः सम्बोधने प्रथमाविभक्तेश्च केवलम् एकवचने एव कुत्रचित् भेदः भवति। अन्यथा सर्वं समानमेव।

1 अष्टा., 1.4.104
2 अष्टा., 1.4.14
3 अष्टा., 3.4.78
4 अष्टा., 4.1.2

प्रकरणे चास्मिन् सुब्विभक्तेः विषये एव किञ्चिद्विचार्यते। सुब्विभक्तिः तद्बोध्यमर्थमनुलक्ष्य त्रिधा भवति -

1. कारकार्थिका,
2. शिष्टसम्बन्धार्थिका
3. विशिष्टार्था चेति

तत्र कारकार्थिका -

1. श्रुतक्रियासम्बद्धा
2. अश्रुत (गम्यमान) क्रियासम्बद्धा चेति द्विधा।

तत्र श्रुतक्रियासम्बद्धा षोढा भवति -

1. कर्तृविभक्तिः
2. कर्मविभक्तिः
3. करणविभक्तिः
4. सम्प्रदानविभक्तिः
5. अपादानविभक्तिः
6. अधिकरणविभक्तिश्चेति।

कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणम् इति षट् कारकाणि। एतेषु षट्सु अन्यतमं यस्याः विभक्तेः अर्थः सा कारकविभक्तिरित्यप्युच्यते। अश्रुत (गम्यमान) क्रियासम्बद्धा च पुनः द्विधा भवति -

1. गम्यमानक्रियासम्बद्धा
2. लुप्ताव्ययकृदन्तबोध्यक्रियासम्बद्धा चेति।

गम्यमानक्रियासम्बद्धा च कर्तृ-कर्म-करण-सम्प्रदान-अपादान-अधिकरण-विभक्तिभेदेन षोढा। लुप्ताव्ययकृद्बोध्यक्रियासम्बद्धा तु द्विधा-तुमुन्नन्तबोध्या, ल्यबन्तबोध्या चेति।

**कारकविभक्तिः**

कर्त्रादिषट्कान्यतममर्थं याऽभिधत्ते सा विभक्तिः कारकविभक्तिरित्युच्यते खलु। अत्र किं नाम कारकमिति जिज्ञासा भवति। कारकम्[5] करोति निर्वर्तयति, जनयति, उत्पादयति वा क्रियां यत् द्रव्यं तत्कारकम्। एतदेव 'क्रियाजनकत्वं कारकत्वम्' इति कारकलक्षणमुच्यते। क्रियाजनकस्य कर्तुः क्रियायामेव अन्वयो भवति। तथा च क्रियाजनकं सत् यत् क्रियान्वयि तत् कारकमिति तस्य लक्षणं सिद्ध्यति। यदा द्रव्याणां स्वस्वविशिष्टक्रियामाश्रित्य क्रियाफलजनकत्वेन क्रियासम्बन्धः, तदा सामान्यतः कारकमिति व्यवहारः तथा तेषां क्रियया सह वर्तमानान् विविधान् सम्बन्धानाश्रित्य तेषां द्रव्याणाम् (पदार्थानां) कर्तृ-कर्मादि व्यवहारः। उदाहरणार्थं पचनक्रियां स्वीकुर्मः। पचनक्रियासम्पादनाय ये पदार्थाः अवश्यमपेक्षिताः, यत्र च कस्यचिदेकस्य अभावे अन्येषु पदार्थेषु सत्स्वपि क्रिया न जायते तादृशाः पदार्थाः सर्वेऽपि तस्यां क्रियायां कारकशब्देन, कर्तृकर्मादिविशेषशब्देन च व्यवह्रियन्ते। पचनक्रियायै हि कश्चन पुरुषः अपेक्ष्यते, यत्र च विक्लित्ति (वैशा मार्दवं च)-रूपं फलं जायते। तण्डुलानां निक्षेपणाय पात्रमपेक्षितम्। पाकार्थम् अग्निसंयोगः अपेक्षित इति तत्साधनभूता चुल्ली अपेक्ष्यते। ज्वालायै च काष्ठानि अपेक्ष्यन्ते। आलोडनाय दर्वी अपेक्ष्यते। जलादिकमपि अपेक्ष्यते। तत्र केचित् पदार्थाः पचनक्रियाङ्गभूतसेचन-आलोडनादिक्रियासु सम्बद्धाः चेत्, केचन पदार्थाः साक्षात् प्रधानक्रियासम्बद्धाः भवन्ति। अत्र चुल्ली, पात्रं, काष्ठानि, कश्चन पाचकः, तण्डुलाः, गृहं, समयोऽपि (यदि निर्देष्टव्यः) प्रधानक्रियासम्बद्धश्चेत्, जलं, दर्वी इत्यादयः सेचनालोडनादि-अवान्तरक्रियासम्बद्धाः भवन्ति। अतश्च एते सर्वेऽपि पदार्थाः तत्तत्क्रियानिरूपितकारकत्वधर्मवन्तः भवन्ति।

अथेदानीं प्रधानक्रिया सम्बद्धवस्तूनां विषये किञ्चिद्विचारयामः। प्रधानक्रियासम्बद्धं वस्तु क्रियाजनकत्वमुपलक्ष्य कारकमिति व्यवह्रियते इति ज्ञातम्। एतच्च कारकं 'कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणम्' इति षड्विधम्।

[5] डुकृञ् करणे इत्यस्मात् धातोः कर्त्रर्थे ण्वुल् (अक) प्रत्यये निष्पन्नोऽयं कारकशब्दः। तत्र कृञ्धातुः उत्पत्तिरूपं फलं, तदनुकूलक्रियां च बोधयति। तत्र उत्पत्तिरूपं फलं क्रियायां विशेषणम्। फलक्रिययोः सम्बन्धः जन्यजनकभावः। तथा च 'उत्पत्तिजनकक्रियाकर्ता' इति कृञ्धातोः अर्थः सिद्धः। ण्वुल्-प्रत्ययस्य कर्ता अर्थः। तथा च फलोत्पत्त्यनुकूलक्रियाजनकः कारकशब्दार्थः। तन्निष्ठः धर्मः कारकत्वम्, तच्च फलोत्पत्त्यनुकूलक्रियाजनकत्वम्।

## कर्ता

"स्वतन्त्रः कर्ता"[6]। स्वकीये व्यापारे (स्वक्रियायां) यः परतन्त्रो न भवति, सः कर्ता। यथा - पचनक्रियायां पाचकः। अयं पचनक्रियायां स्वतन्त्रः। अस्य प्रेरकः क्रियायां संयोजको वा अन्यः नापेक्षितः। तण्डुलादिकारकाणां तु स्वातन्त्र्यं नास्ति। यतः तण्डुलाः स्वयमेव गत्वा स्थाल्यां न तिष्ठन्ति खलु। किन्तु पाचकेन नीताः स्थाल्यां स्थापिताः भवन्ति। अतः ते तण्डुलाः परतन्त्राः अर्थात् पाचकाधीनाः भवन्ति। एवमेव स्थाली, काष्ठानि इत्यादीनि कारकाणि अन्यसाहाय्येनैव पचनक्रियायामन्वयमुपयान्ति। अतः तानि परतन्त्राणि। तथा च सर्वेषु कारकेषु यः स्वतन्त्रः सः कर्ता। परतन्त्राणि कर्मादीनि। स्वातन्त्र्यं च अन्यानधीनप्रवृत्तिमत्त्वम्।

नन्वेवं 'रथः गच्छति' इत्यस्मिन् वाक्ये रथः कर्ता न भवेत्। रथः न चेतनः। स्वातन्त्र्यं चेतनधर्मः। अतः कथं तस्य कर्तृत्वमिति चेत्-तत्र कर्तृत्वम् आरोप्यते। ततश्च कर्तृत्वं द्विविधम् - मुख्यम् आरोपितम् चेति। "स्वतन्त्रः कर्ता" इति मुख्यकर्तृत्वलक्षणम्। यथा च कमपि वीरं पुरुषमुद्दिश्य 'अयं सिंह' इति उच्यते, तत्र मनुष्ये सिंहत्वं मुख्यं नास्ति चेदपि सिंहत्वं तस्मिन् पुरुषे आरोप्यते। प्रयोजनं च सिंहगतशौर्यादिगुणसदृशगुणवानयं सिंहसदृश इति बोधः। तथैवैतादृशेषु प्रयोगेषु सर्वेषु।

अथेदानीं कश्चन प्रश्नः उदेति। कारकम् इत्युक्तेऽपि क्रियाजनकं सत् क्रियायाः आश्रयः, कर्ता इत्युक्तेऽपि स एव। तर्हि सर्वेषां कारकाणां कर्तृपदेन व्यवहारः स्यात्। कर्ता, कारकम् इति उभयं पर्यायः स्यात् किल इति। सत्यम्। शङ्केयं समीचीना। कारकम्, कर्ता इत्यनयोः फलजनकक्रियाश्रयत्वमस्तीति उभयोः पर्यायता प्राप्ता, सर्वेषां कारकाणां कर्तृत्वमपि प्राप्तम्। वस्तुतः अस्त्येव सर्वेषु कारकेषु कर्तृत्वम्। तर्हि एक एव कर्ता, नान्यानि कारकाणि इति कथं निश्चयः ?

एतत्सर्वं सम्यग्ज्ञातव्यं चेत् पुनः अस्माभिः काचित् क्रिया सुनिश्चितं परिशीलनीया। पचनक्रियामेव स्वीकुर्मः। पचनक्रियायां पाचकः, स्थाली (पात्रं) काष्ठानि, तण्डुलाः इति वस्तूनि अन्वितानि एतानि कारकाणि। एतानि सर्वाणि कारकाणि फलोत्पादकानि। कथं? स्वस्वक्रियाद्वारा। तत्कथम्? परिशीलयामः पचनक्रियायां पाचकस्य क्रिया-अधिश्रयणम्, उदकासेचनं, तण्डुलावपनम्, एधोऽपकर्षणम्, फूत्कारः आलोडनम् इत्यादिः अधःश्रयणपर्यन्तः व्यापारः।

- स्थाल्याः क्रिया - विक्लित्तिपर्यन्तं जलसहिततण्डुलानां धारणम्
- काष्ठानां क्रिया - विक्लित्तिपर्यन्तं ज्वलनम्

[6] अष्टा., 1.4.54

- तण्डुलानां क्रिया - विक्लित्तेः आश्रयीभवनम्

प्रत्येकं कारकस्य स्वस्वक्रियाः परस्परं भिन्नाः। न हि पाचकः स्थाल्याः क्रियां कर्तुं शक्नोति, न वा काष्ठानां क्रियां स्थाली, न वा स्थाल्याः क्रियां तण्डुलाः। यदि च एकोऽपि व्यापारः न जातः तर्हि अन्येषु व्यापारेषु सत्स्वपि फलं नोत्पद्यते। एतानि च सर्वाणि कारकाणि स्वस्वव्यापारेषु स्वतन्त्राण्येव। अतः एतानि कर्तृशब्देनापि व्यवहर्तुं योग्यान्येव। एतदेव भर्तृहरिः वाक्यपदीये ब्रूते -

निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके।
व्यापारभेदापेक्षायां करणादित्वसम्भवः॥[7]

एवं पूर्वोक्तेषु कारकेषु चतुर्ष्वपि स्वस्वक्रियायां स्वातन्त्र्यमाश्रित्य कर्तृत्वे सत्यपि चत्वारि एकदैव कर्तृशब्देन न व्यवह्रियन्ते। किन्तु एकमेव। तर्हि तत् किम्? उच्यते। एतेषु चतुर्षु यः स्वतन्त्रः अन्यानधीनप्रवृत्तिमान् सः स्वतन्त्रः, स एव कर्ता भवति। यथा अत्र पाचकः। अस्य प्रवृत्तिः अन्याधीना नास्ति। अन्येषां तु स्वक्रियाव्याप्तिरपि अन्याधीना भवति। तथा च पाचके सन्निहिते सति स्थाली, काष्ठानि, तण्डुलाश्च अस्वतन्त्राणि। अतः इदानीमेतानि कर्तृपदेन न व्यवह्रियन्ते। किन्तु अधिकरण-कर्मादिरूपेण। एतदेव वदति भर्तृहरिः पूर्वोक्ते श्लोके उत्तरार्धे।

अथेदानीम् अन्यः प्रश्नः – "देवदत्तः (पाचकः) स्थाल्यां काष्ठैः तण्डुलान् पचति" इति वाक्ये पचधातोः अर्थः कः? धातोः फलं, व्यापारः (क्रिया) च अर्थौ। अत्र फलं विक्लित्तिः। अथ अत्र पचधात्वर्थः व्यापारः कः? किं सः देवदत्तस्य व्यापारः अधिश्रयणादिरूपः, उत स्थाल्याः व्यापारः तण्डुलधारणरूपः, उत काष्ठानां व्यापारः ज्वलनरूपः, उत तण्डुलानां व्यापारः विक्लित्तेः आश्रयत्वरूपः, उत सर्वेऽपि व्यापाराः।

अस्य समाधानमुक्तवान् महाभाष्यकारः पतञ्जलिः "कारके"[8] इति सूत्रे इत्थं सिद्धः करणाधिकरणयोः कर्तृभावः। कुतः?। प्रतिकारकं क्रियाभेदात् पचादीनाम्। पचादीनां हि प्रतिकारकं क्रिया भिद्यते। कौऽसौ प्रतिकारकं क्रियाभेदः पचादीनाम्? अधिश्रयणोदकासेचनतण्डुलावपनैधोऽपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः। अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणादिक्रियाः कुर्वन्नेव "देवदत्तः पचती'त्युच्यते। तत्र तदा पचिर्वर्तते। एष प्रधानर्तुः पाकः। एतत्प्रधानकर्तृत्वम्।

7 वा.प., 3.18
8 अष्टा., 1.4.23

द्रोणं पचति, आढकं पचतीति सम्भवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते। तत्र तदा पचिर्वर्तते। एषोऽधिकरणस्य पाकः। एधांसि पक्ष्यन्ति - आविक्लित्तेः ज्वलिष्यन्तीति ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्तीति च उच्यते। तत्र तदा पचिर्वर्तते। एष करणस्य पाकः। एतत्करणस्य कर्तृत्वम्।

इदानीमेतद्भाष्यं परिशीलयामः। अत्र सन्दर्भः पचनक्रियायाः। स च सन्दर्भः त्रिधा अत्र प्रदर्शितः।

1. 'देवदत्तः पचती'त्यत्र अधिश्रयण-उदकासेचन-तण्डुलावपन-एधोपकर्षणादिक्रियाः देवदत्तनिष्ठाः पचधातुना अभिधीयन्ते।

2. द्रोणं पचति, आढकं पचति (द्रोणपरिमाणं पात्रं द्रोणम्, आढकपरिमाणं पात्रम् आढकम्) पात्रं पचतीत्यर्थः। अत्र पात्रस्य पचनक्रियायां स्वव्यापारः पचिक्रियायाः आरम्भक्षणमारभ्य अन्तिमक्षणपर्यन्तम् अर्थात् विक्लित्तिरूपफलोत्पत्तिपर्यन्तं तण्डुलानां धारणम्। अत्र द्वितीये प्रयोगे पचधात्वर्थः न देवदत्तस्य अधिश्रयणादिव्यापारः, किन्तु विक्लित्तिपर्यन्तं तण्डुलधारणरूपः पाकपात्रस्य द्रोणादेः व्यापारः।

3. एधांसि (काष्ठानि) पक्ष्यन्तीत्यत्र पचधात्वर्थः काष्ठगतः विक्लित्तिरूपफलोत्पत्तिपर्यन्तं ज्वलनम्। तच्च काष्ठगतः व्यापारः। स एवेदानीं पचधात्वर्थः, न वा देवदत्तस्य व्यापारः, न वा पात्रस्य (स्थाल्याः) व्यापारः।

वास्तविकदृष्ट्या विचार्यमाणे देवदत्तः द्रोणे काष्ठैः तण्डुलान् पचति इति हि प्रयोगः लोकसिद्धः सामान्यप्रयोगः। अत्र देवदत्तः कर्ता, द्रोणः अधिकरणम्, काष्ठानि करणानि, तण्डुलाश्च कर्माणि इति सर्वलोकसिद्धः व्यवहारः। अत्र च पचधातुः कर्तुः देवदत्तस्य व्यापारम् अधिश्रयणादिरूपम् बोधयति। तथा च सर्वेषु कारकेषु देवदत्त-द्रोण-काष्ठ-तण्डुलेषु यः प्रधानः देवदत्तः, तस्य कर्तृसंज्ञकस्य व्यापारः सामान्यतया पचधातुना अभिधीयते। एतदेवोच्यते एष प्रधानकर्तुः पाकः, तत्र तदा पचिर्वर्तते' इति। तत्र तदा पचिर्वर्तते इत्यस्य तादृशव्यापार एव तदा (तस्मिन् प्रयोगे) पचधातुना बोध्यते इत्यर्थः। अथास्मिन्नेव सामान्यव्यवहारे द्रोणः अधिकरणम्, काष्ठानि करणानि, तण्डुलाश्च कर्मभूताः।

अथ आढकं पचति इति द्वितीयं परिशीलयामः। अत्र आढकशब्दात् न अधिकरणबोधिका सप्तमी विभक्तिः श्रूयते। किन्तु कर्तृबोधिका प्रथमा श्रूयते। अतः पूर्वसन्दर्भे सामान्यलोकव्यवहारे यदधिकरणं, तद् इदानीमत्र अधिकरणरूपेण न गृहीतम् (नोक्तम्, न विवक्षितम्), किन्तु कर्तृरूपेण गृहीतम्। एतत् कथम् ?

अत्र समाधानं भवति यत् अधिकरणस्यापि विक्लित्तिपर्यन्तं तण्डुलानां धारणरूपः यः स्वव्यापारः, तदाश्रयत्वेन कर्तृत्वमपि वक्तुं शक्यते इति। तथा च यदा पचधातोः अर्थः न अधिश्रयणादिलोकसिद्धः देवदत्तादिप्रधानकर्तृगतः व्यापारः, अपितु द्रोणादिपात्ररूपाधिकरणगतः व्यापारः तदा अधिकरणमपि कर्ता भवितुमर्हति इति सिद्धम्। एतदेव तत्रोक्तम् - "एष अधिकरणस्य पाकः। एतदधिकरणस्य कर्तृत्वम्। तत्र तदा पचिर्वर्तते" इति। तत्र तदा पचिर्वर्तते इत्यस्य अत्र अधिकरणस्य व्यापार एव पचधातुना बोध्यते इत्यर्थः।

एवमेव एधांसि पक्ष्यन्तीत्यत्र सामान्यलोकव्यवहारे यानि करणानि, तानि इदानीं प्रथमाविभक्त्या कर्तृरूपेण उक्तानि (विवक्षितानि)। तथा च अत्र पचधात्वर्थः न देवदत्तस्य अधिश्रयणादिरूपः व्यापारः न वा अधिकरणस्य तण्डुलधारणरूपः व्यापारः, अपि तु काष्ठगतः विक्लित्तिरूपफलोत्पत्तिपर्यन्तम् अपेक्षितः ज्वलनरूपः व्यापारः। तदा करणस्य कर्तृत्वम्।

एवमेव "तण्डुलाः पच्यन्ते स्वयमेव" इति प्रयोगे तण्डुलवाचके तण्डुलपदे, कर्मविभक्तिः द्वितीया नास्ति। किन्तु कर्तृविभक्तिः प्रथमा अस्ति। अतः अत्रापि सामान्यलोकव्यवहारे कर्मभूताः तण्डुलाः अत्र कर्तृरूपेण विवक्षिताः। तत्कथम्? तण्डुलानामपि काचित् स्वीया क्रिया अस्ति। सा का? विक्लित्तिरूपस्य फलस्य पचनक्रियया उत्पाद्यमानस्य आश्रयरूपेण अवस्थानम्। यदि तण्डुला एव न सन्ति, तर्हि विक्लित्तिः कुत्र उत्पद्येत ? एवञ्च अस्मिन् वाक्ये तण्डुलाः कर्तृभूताः कर्तृप्रत्ययेनोक्ताः कर्तृरूपेण विवक्षिताः। ततश्च अत्र पचधात्वर्थः न ज्वलनादिः, अपि तु कर्मगतः व्यापारः क्रियाफलस्य विक्लित्तेः आश्रयरूपेण अवस्थानम्।

पूर्वोक्तं भाष्यं किमर्थमस्माभिरत्र स्वीकृतम्? प्रश्नः अयमासीत् - "देवदत्तः काष्ठैः स्थाल्याम् तण्डुलं पचति" इत्यत्र पचधात्वर्थः कः ? किम् एकदैव सर्वकारकव्यापाराः पचधातुना उच्यन्ते, उत कस्यचित् एकस्य कारकस्य व्यापार एव वा? इति।

इदानीमस्माभिः समाधानं लब्धम्। एकस्मिन् प्रयोगे एकस्यैव यः कर्तृभूतः तस्यैव व्यापारः धातुना बोध्यते। यथा देवदत्तः पचति इत्यत्र देवदत्तगतः व्यापारः, स्थाली पचति इत्यत्र स्थालीगतः व्यापारः, काष्ठानि पचन्तीत्यत्र काष्ठगतः व्यापारः, तण्डुलाः पच्यन्ते स्वयमेवेत्यत्र तण्डुलगतः व्यापारः।

तथा च किं सिद्धम्। पचधातोः अनेके अर्थाः। अधिश्रयणादिव्यापारः, तण्डुलधारणम्, आविक्लित्तेः ज्वलनम्, विक्लित्तेः आश्रयीभवनमित्यादि। तेषु अर्थेषु यदा यः अर्थः धातोः अर्थः स्वीकृतः, तदा तद्व्यापारवत्कारकं कर्ता भवति। यथा - यदा अधिश्रयणादिरूपः व्यापारः पचधात्वर्थः तदा(तदाश्रयः) तद्वान् देवदत्तः

कर्ता। यदा ज्वलनव्यापारः पचधात्वर्थः तदा काष्ठानि कर्तारः। इत्येवम्।

तथा चेदानीं कर्तृलक्षणमन्यथापि सिद्धम् - यदा यत्कारकस्य व्यापारः धात्वर्थो भवति, तदा तत्कारकं कर्ता, अथवा धात्वर्थरूपेण स्वीकृतस्य व्यापारस्य यः आश्रयः (यः तादृशव्यापारवान्) सः कर्ता इति। तथा च 'प्रकृतधात्वर्थव्यापारवत्त्वं कर्तृत्वम्' इति कर्तृलक्षणम्। इदं च लक्षणं चेतनाचेतनसाधारणं कर्तृत्वम्। अन्यानधीनप्रवृत्तिमत्त्वादिरूपं लक्षणं तु चेतने एव किल सङ्गच्छते। अतः तानि लक्षणानि अव्याप्तिरूपदोषदुष्टानि। अतः "प्रकृतधात्वर्थव्यापारवत्त्वं, (प्रकृतधात्वर्थव्यापाराश्रयत्वं) सामान्यकर्तृत्वमिति सिद्धम् प्रकृतधात्वर्थव्यापाराश्रयः कर्ता इति। एतदेवोक्तं भर्तृहरिणा - "धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" इति। "यदा यदीयो व्यापारः धात्वर्थत्वेन विवक्षितः तदा सः कर्ता" इति भूषणसारे च।

अनेन च सन्दर्भेण अस्माभिरेतदपि ज्ञातम् - यत् कर्ता नानाप्रकारः भवति यथा मुख्यकर्ता, अधिकरणकर्ता, करणकर्ता, कर्मकर्ता इत्यादि। वस्तुतः मुख्यं कर्तृत्वं चेतनस्यैव तर्हि अन्येषां कर्तृत्वं न सहजम्। किन्तु तत्र आरोपितम्। तदेव वैवक्षिकम् विवक्षाधीनम्। किमर्थं तर्हि एवं प्रयोगः इति चेत्, अभिप्रायविशेषप्रतिपादनार्थम्। तथाहि - स्थाल्यां कर्तृत्वारोपः पचनक्रियायां कर्तुः सौकर्यातिशयबोधनार्थम्। यथा इदानींतनकाले 'कुक्कर' आख्यपात्रम्। तेन पात्रेण यदि पच्यते तर्हि पाचकस्य श्रम एव नास्ति। न किञ्चिद् द्रष्टव्यम्। अधिश्रयणम् अधःश्रयणमेव तस्य कार्यम्। अतः श्रमस्य न्यूनतया सौकर्याधिक्यमत्र बोध्यते।

एवं काष्ठानि पक्ष्यन्तीत्यत्र काष्ठानि तथा शुष्काणि, येन फूत्कारादिक्लेशः न भविष्यतीति सूच्यते। तथैव तण्डुलाः पच्यन्ते स्वयमेवे "त्यत्र तण्डुलाः तथा प्राचीनाः सन्ति, येषां पाके आलोडननिरीक्षण-यवागूनिष्कासनादिक्लेशः नास्तीति सूच्यते। एतादृशाभिप्रायविशेषविवक्षायामेव करणादीनां कर्तृत्वम्। इयमेव विवक्षा शब्देनोच्यते। "विवक्षातः कारकाणि भवन्ति" इति प्रवादोऽपि एतन्मूलक एव।

अथैतादृशं लोकव्यवहारमाश्रित्य कर्तुः प्रकाराः कतिधा भवितुमर्हन्तीति विचारयामः।

**कर्तृप्रकाराः**

1. **मुख्यकर्ता** - लोकव्यवहारे क्रियायाः कर्तृरूपेण स्वीक्रियमाणः। यथा पचनक्रियायां पाचकः अयं च मुख्यकर्ता द्विविधः - चेतनः, अचेतनः।

    (a) चेतनः कर्ता – देवदत्तः पचति।

    (b) अचेतनः कर्ता - शकटः गच्छति, मोबैल् वदति, कम्प्यूटर् गायति।

2. **करणकर्ता** – काष्ठानि पक्ष्यन्ति - सामान्यव्यवहारे करणानि काष्ठानि, इदानीं कर्तृरूपेण विवक्षितानि।

3. **अधिकरणकर्ता** - स्थाली पचति - स्थाली (कुक्कर् पात्रं) सामान्यव्यवहारे अधिकरणम्, इदानीं कर्तृरूपेण विवक्षा।

4. **कर्मकर्ता** - तण्डुलाः पच्यन्ते स्वयमेव - सामान्यव्यवहारे तण्डुलाः कर्मभूताः इदानीं कर्तृरूपेण विवक्षिताः। सम्प्रदानस्य कर्तृत्वविवक्षा तु नास्ति। तथा अपादानस्यापि नास्तिप्राया एव।

5. **अनुभवी कर्ता** - वृक्षः अस्ति/जायते/वर्धते/विपरिणमते / अपक्षीयते/विनश्यति। जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति इति एते षट् भावविकाराः इति उच्यन्ते। उत्पत्तिः, सत्ता, वृद्धिः, विपरिणामः,अपक्षयः, विनाशः इति एते सर्वस्यापि वस्तुविशेषस्य सहजाः। सर्वं चेतनाचेतनरूपं पदार्थजातम् एतान् विकारान् अनुभवति न तु तदर्थं प्रयत्नं करोति। अतः एतादृशानां क्रियाणां कर्ता "अनुभवी कर्ता" इति स्वीक्रियते। भावविकारार्थकाः धातवः अकर्मकाः भवन्ति।

6. **हेतुः/प्रयोजकः/प्रेरकः कर्ता** - देवदत्तः विष्णुमित्रेण पाचयति - विष्णुमित्रः पचति, तं विष्णुमित्रं देवदत्तः पाकं कर्तुं प्रेरयति इत्यर्थः। अत्र प्रेरकः देवदत्तः हेतुः, प्रयोजकः, प्रेरकः इति शब्दैः उच्यते। वस्तुतः यः क्रियां करोति, यथा अत्र विष्णुमित्रः, सः कर्तेति, प्रयोज्य इति च उच्यते। अत्र देवदत्त - विष्णुमित्रयोः मध्ये प्रयोज्यप्रयोजकभावसम्बन्धः अस्ति।

7. **मध्यस्थः कर्ता** - देवदत्तः चैत्रेण (चैत्रद्वारा) विष्णुमित्रेण पाचयति - अत्र विष्णुमित्रः पचति - तं चैत्रः प्रेरयति - चैत्रं देवदत्तः प्रेरयति - देवदत्तेन प्रेरितः चैत्रः विष्णुमित्रं पाकार्थं (पाकं कर्तुं) प्रेरयतीत्यर्थः। अत्र देवदत्त - विष्णुमित्रयोः मध्ये वर्तमानः चैत्रः देवदत्तेन प्रेरित इति प्रयोज्यः अपि भवति, विष्णुमित्रं प्रेरयतीति प्रयोजकः अपि भवति। अतः सः मध्यस्थः इत्युच्यते। यः प्रयोज्यः सन् प्रयोजकः भवति सः मध्यस्थः इत्यर्थः। अस्मिन् सन्दर्भे त्रयः कर्तारः सन्ति। तत्र

    - **शुद्धप्रयोजकः** - (केवलं प्रयोजक एव) देवदत्तः
    - **मध्यस्थः** - (प्रयोज्यः सन् प्रयोजकः) चैत्रः
    - **शुद्धप्रयोज्यः** - (केवलं प्रयोज्य एव) विष्णुमित्रः।

एते त्रयः कर्तृभेदाः प्रेरणार्थक (णिजन्त) धातुस्थले भवन्ति। णिजन्तधातवः पाचयति, कारयति, गमयति, भोजयति, स्नापयति इत्यादयः। णिजन्तधातुस्थले शुद्धप्रयोजकः, शुद्धप्रयोज्य इति कर्तृपदम् अवश्यं भवेत्। मध्यस्थः भवितुमर्हति। भवेदिति नियमस्तु नास्ति।

अथ मध्यस्थाः कर्तारः अनेके अपि भवितुमर्हन्ति। यथा – देवदत्तः गोपालेन चैत्रेण विष्णुमित्रेण पाचयति - अत्र देवदत्तः - शुद्धप्रयोजकः, गोपालः - मध्यस्थः 1, चैत्रः - मध्यस्थः 2, विष्णुमित्रः - शुद्धप्रयोज्यः। मध्यस्थकर्तारं बोधयितुं कर्तरि प्रयोगे वा कर्मणि प्रयोगे वा तृतीया विभक्तिरेव भवति। न अन्या विभक्तिः। शुद्धं प्रयोजकं कर्तारं बोधयितुं कर्तरि प्रयोगे प्रथमा विभक्तिः, कर्मणि प्रयोगे तृतीयाविभक्तिः च भवतः। प्रेरणक्रियाबोधकधातूनां (णिजन्तानां) भावे प्रयोगः न भवति। शुद्धप्रयोज्यं बोधयितुं कर्तरि प्रयोगे केषाञ्चित् धातूनां प्रयोगे तृतीया, केषाञ्चित् धातूनां प्रयोगे द्वितीया च भवतः। कर्मणि प्रयोगेऽपि येषां धातूनां कर्तरि प्रयोगे द्वितीया, तत्र प्रथमा भवति। येषां धातूनां कर्तरि प्रयोगे तृतीया, कर्मणि प्रयोगेऽपि तृतीयैव भवति। कर्मकारकप्रकरणे प्रयोज्यविषये द्वितीया (कर्तरिप्रयोगे) विषयं विचारयिष्यामः।

8. **अभिप्रेरकः कर्ता** - स्वविषयकाभिलाषोत्पादकः 1 यथा - देवदत्ताय रोचते मोदकः। अत्र मोदकः देवदत्ते स्वविषयकाभिलाषामुत्पादयति। एतादृशाः कर्तृभेदाः अस्माभिरपेक्षानुगुणं चिन्तनीयाः। एतेषामपेक्षा भाषान्तरानुवादे अवश्यमपेक्षितं भवति। यतः अस्यैव उदाहरणस्य आङ्ग्लेय्यामनुवादः करणीयः तर्हि अत्र देवदत्तमोदकयोः कारकशक्तिविपर्ययः भवति। देवदत्तः कर्ता भवति। मोदकश्चेच्छासम्बन्धी भवति। यथा – Devadatta is fond of Modaka. एतादृशविपर्ययाय नियमनिर्धारणाय एतादृशकर्तृभेदाः अवश्यमुपयुक्ताः भवन्ति।

## कर्म

"कर्तुरीप्सिततमं कर्म"[9] इति कर्म लक्षणम्। कर्ता स्वक्रियाजन्यफलस्य आधाररूपेण यमिच्छति अतिशयेन, तत् कर्म भवति। तथाहि - सकर्मकधातूनां सर्वेषां फलं व्यापारः (क्रिया) इति उभयमर्थः। अत्र फलं नाम न प्रयोजनम्। किन्तु कर्तुः क्रियया अन्यत्र जायमानः कश्चन विशेषः। यथा - पचति। अत्र पचनक्रिया नाम अधिश्रयणमारभ्य अधःश्रयणपर्यन्तः क्रियासमूहः। अनेन क्रियासमूहेन कर्तुः

[9] अष्टा., 1.4.49

अन्यत्र यः विशेषः भवति, यथा च तण्डुलेषु विशदता, मृदुता च ये च विक्लित्तिपदेन उच्येते, सा विक्लित्तिरेव पचनक्रियायाः फलं भवति। तथा च पाचकः स्वक्रियाद्वारा जायमानस्य फलस्य आधाररूपेण यतः अत्र तण्डुलान् इच्छति अतः तण्डुलाः 'कर्म' शब्देन अभिधीयन्ते। एवं च 'देवदत्तः तण्डुलान् पचति' इत्यत्र तण्डुलाः देवदत्तक्रियया अधिश्रयणादिरूपया जन्यस्य विक्लित्तिरूपफलस्य आश्रयाः (आधाराः) भवन्तीति कर्मरूपेण भवन्ति। एवं 'हरिं भजति देवदत्तः' इत्यत्रापि भजधातोरर्थः प्रीतिरूपं फलम्, तदुत्पादनानुकूलः पूजास्तोत्रपाठादिरूपः व्यापारः च। तथा चात्र देवदत्तः स्वक्रियाद्वारा पूजापाठादिक्रियाद्वारा जायमानप्रीतेः आधार (आश्रय) रूपेण हरिमिच्छति इति अत्र हरिः कर्म भवति।

इदं च कर्म ईप्सिततमम्, अनीप्सितं चेति प्रथमं द्विविधम्। तत्रेप्सिततमं पुनः त्रिविधम् - निर्वर्त्यम्, विकार्यं, प्राप्यमिति।

1. **निर्वर्त्यकर्म** – यदसज्जायते सदा जन्मना यत् प्रकाशते, तन्निर्वर्त्यमिति उच्यते। यथा - घटं करोति। एतावत्पर्यन्तं यः घटः नास्ति, तस्य जन्म उत्पत्तिः अत्र विवक्षिता। तथा च कुलालः स्वक्रियाद्वारा उत्पत्तेः आश्रयरूपेण जायमानं घटमिच्छतीति घटः निर्वर्त्यकर्म भवति।

2. **विकार्यकर्म** – यस्य च धातोः कर्मद्वयं भवति, तयोश्च एकस्य कर्मणः विकाररूपं द्वितीयं कर्म भवति, तयोर्मध्ये प्रथमम्, यस्य विकार एव द्वितीयकर्मरूपेण भवति, तत् कर्म विकार्यकर्म भवति। यथा - देवदत्तः तण्डुलान् ओदनं पचति। अत्र ओदनमेतावता न सिद्धमिदानीं साध्यत इति तत् निर्वर्त्यकर्म भवति। ओदनस्य च तण्डुलविकाररूपत्वेन, अत्र तण्डुलाः विकार्यकर्मरूपेण भवन्ति। इदं च विकार्यकर्म पुनः द्विविधम्- 'विकार्यं तु द्वेधा कर्म व्यवस्थितम्। तत्रैकं प्रकृत्युच्छेदेन (नाशेन) सम्भूतम् यथा - भस्मरूपनिर्वर्त्यकर्मवन्ति काष्ठानि।' उदाहरणम् – देवदत्तः काष्ठं भस्म करोति। देवदत्तः तण्डुलान् ओदनं पचति। द्वितीयं च प्रकृतिभूतं वस्तु यत्र जायते कश्चन विकारः अथवा गुणान्तरम् अर्थात् आकारविशेषः। यथा - स्वर्णकारः सुवर्णं कुण्डलं करोति। अत्र सुवर्णस्य नाशेन कुण्डलस्य उत्पत्तिः नास्ति, अपितु सुवर्णस्यैव आकृतिविशेषः, यस्तावत् इदानीं स्वर्णकारेण स्वक्रियया साध्यते। तथा च अत्र सुवर्णं विकार्यकर्म भवति। अत्र निर्वर्त्यकर्मणि, विकार्यकर्मणि च क्रियया कश्चित् विशेषः जायते यश्चास्माभिः अक्षिसात्क्रियते।

3. **प्राप्यकर्म** - अथ कर्तुः क्रियाविशेषेण जायमानं फलं संयोगादिरूपं क्रियायाः

पूर्वं वा परं वा वस्तुनि न लक्षयितुं शक्यमिति तदाश्रयं प्राप्यकर्म इत्युच्यते। यथा - चित्रं पश्यति - अत्र कस्यचिद्दर्शनक्रियया, तद्विषयभूते चित्रे न कश्चन विकारः, न वा कोऽपि गुणविशेषः जायते यस्तावत् अक्षिसात्कर्तुं शक्यः। अतः चित्रं पश्यति चैत्रः, ग्रामं गच्छति मैत्रः इत्यत्र चित्रं ग्रामश्च प्राप्यकर्मणी। न हि अस्माकं दर्शनेन चित्रे कोऽपि विकारः जायते, न वा गमनेन ग्रामे यमुपलक्ष्य कर्मत्वं वक्तव्यम्। अतः तादृशं कर्म प्राप्यमिति उच्यते। 'क्रियाकृतविशेषानुपलभ्यमानत्वं प्राप्यत्वम्' इति शास्त्रीये-लक्षणम्। अनीप्सितं कर्म चतुर्विधम् – उदासीनम्, द्वेष्यम्, अकथितम्, अन्यपूर्वकमिति।

4. **उदासीनम्** - यश्च वस्तुविशेषः कर्तृक्रियाजन्यफलाश्रयः भवति, परन्तु सः कर्तुरिच्छाविषयो न भवति, अनिच्छाया अपि विषयो न भवति तादृशः उदासीनकर्मेत्युच्यते। यथा - ग्रामं गच्छन् तृणं स्पृशति। अत्र ग्रामः कर्तुः स्वक्रियाजन्यसंयोगाश्रयत्वेन ईप्सितः, न तु तृणः तथा स्वक्रियाजन्यत्वाचप्रत्यक्षविषयत्वेन ईप्सितः, अथापि ग्रामगमने तृणस्पर्शस्य अनिवार्यतया अनिच्छयापि तृणस्पर्शः, तत्र च तृणं कर्म भवति। एवञ्चात्र तृणे ईप्सितत्वमपि नास्ति, द्वेषोऽपि नास्ति, अतः उदासीनमिति उच्यते।

5. **द्वेष्यम्** - यस्तु वस्तुविशेषः इच्छाविषयो न भवति, वस्तुतः अनीप्सितोऽपि भवति, अथापि ईप्सिततमक्रियासम्बन्धेन ईप्सिततमकर्मवत् द्वेष्योऽपि कर्म भवति। यथा - ओदनं भुञ्जानो विषं भुङ्क्ते। अत्र ईप्सिततमवक्रिया भोजनक्रिया' तया क्रियया ओदनस्य यादृशः सम्बन्धः, तादृश एव तत्संपृक्तस्य विषस्यापीति ईप्सिततमस्य ओदनस्य यथा कर्मत्वं, तथा द्वेष्यस्य विषस्यापि कर्मत्वं भवति। अत्र कर्मत्वं च तत्क्रियाजन्यफलाश्रयत्वम्। भोजनक्रियायाः फलं स्वाद्यमानस्य वस्तुविशेषस्य गलबिलाधःसंयोगः। तादृशफलस्य आश्रयत्वं यथा ओदने, तथा विषे चेति उभयोः कर्मसंज्ञा भवति, एकस्य ईप्सिततमत्वेन, अपरस्य द्वेष्यत्वेन (अनीप्सितत्वेन)। उदासीनद्वेष्यकर्मसंज्ञाविधायकं सूत्रम् 'तथायुक्तं चानीप्सितम्' (अष्टा., 1.4.50) इति।

6. **अकथितम्** - वस्तुतः यत् सम्प्रदानमपादानमधिकरणं वा सम्प्रदानादिरूपेण न स्वीकृतं, किन्तु कारकत्वेन क्रियाजनकत्वमात्रेण विवक्षितं तदा तत्कारकमपि कर्म भवति। एतच्च अकथितकर्मकारकम् इत्युच्यते। 'अकथितं च' (अष्टा., 1.4.51) इति सूत्रेण इदं कर्म बोध्यते। अत्र उदाहरणानि –

   - गां दोग्धि पयः गोपालः – अत्र गोपालः कर्ता। सः गोः दोहनं

करोति। दोहनं नाम गोः शरीरात् पयसः (क्षीरस्य) विभागानुकूलः व्यापारः। विभागे अवधिभूता गौः। अतः गौः वस्तुतः अपादानम्। ततश्च यदा गौः अपादानमिति स्वीक्रियते तदा 'गोः (5) पयः दोग्धि' इत्येव प्रयोगः। अथ यदा गौः अपादानम् इति न स्वीकृता, किन्तु दोहनक्रियासम्बन्धि किञ्चित् कारकमिति विवक्षिता तदा गोः कर्म-संज्ञा भवति। ततश्च द्वितीया विभक्तौ 'गोपालः गां पयः दोग्धि' इति प्रयोगः। तथा च दुहधातुः अस्मिन् सन्दर्भे द्विकर्मकः भवति।

- बलिं याचते वसुधां वामनः – अत्र वामनः कर्ता। सः बलिचक्रव-र्तिसमीपं गत्वा बलेः वसुधां (भूमि) मा देहीति प्रार्थयति। अत्र च याचनापूर्वकं बलेः वसुधां विभज्य स्वायत्तीकरणं यदा विवक्षितं तदा बलिः अपादानं भवति। तथा च अपादानरूपेण विवक्षायां 'बलेः (5) वसुधां याचते' इति प्रयोगः। अपादनरूपेण अविवक्षायां यत्किञ्चि-त्कारकमिति विवक्षायां बलेः कर्मसंज्ञा। ततश्च 'बलिं वसुधां याचते' इति प्रयोगः। इदानीं याचधातुः द्विकर्मकः भवति।
- गर्गान् शतं दण्डयति राजा – अत्र दण्डनं नाम तेभ्यः धनस्य स्वीकारः। ततश्च 'गर्गेभ्यः दण्डरूपेण शतं रूप्यकाणि गृह्णाति' इत्यर्थः। अत्रापि गर्गाः अपादानरूपेण यदि विवक्षिताः तर्हि पञ्चमी – 'गर्गेभ्यः शतं दण्डयतीति। तथा अविवक्षायां कर्मसंज्ञा - द्वितीया' गर्गान् शतं दण्डयति' इति। इदानीमयमपि दण्डधातुः द्विकर्मकः।
- बालः वृक्षम् अवचिनोति फलानि – बालः वृक्षात् फलानि पृथक् करोति इत्यर्थः। अत्रापि वृक्षः अपादानम्। तस्य अपादानरूपेण विवक्षायां 'वृक्षात् फलानि अवचिनोति' इति प्रयोगः। तस्य वृक्षस्य अपादानरूपेण अविवक्षायां कर्मसंज्ञा-द्वितीया-'वृक्षं फलानि अव-चिनोति' इति। इदानीं चिञ्धातुः द्विकर्मकः।
- सुधां क्षीरनिधिं मथ्नाति देवासुरगणः – अत्र मन्थनम् क्षीरनिधेः सुधायाः (अमृतस्य) बहिरानयनम्। अत्रापि क्षीरनिधिः अपादानम्। तस्य तथा विवक्षायां 'सुधां क्षीरनिधेः मथ्नाति' इति प्रयोगः। क्षीरनिधेः अपादानरूपेण अविवक्षायां कर्मसंज्ञा - द्वितीया - इदानीम् अयमपि 'मन्थ्' धातुः द्विकर्मकः।
- चोरः देवदत्तं शतं मुष्णाति – चोरः देवदत्तात् शतं रूप्यकाणि चोरय-तीत्यर्थः। अत्रापि देवदत्तः अपादानम्। तस्य तथा विवक्षायां 'देवद-त्तात् शतं मुष्णाति' इति प्रयोगः। अविवक्षायाम् कर्मसंज्ञा-द्वितीया।

इदानीम् अयमपि 'मुष्' धातुः द्विकर्मकः।

- शतं जयति देवदत्तं चैत्रः – स्पर्धायां देवदत्तं जित्वा देवदत्तात् शतं रूप्यकाणि गृह्णातीत्यर्थः। अत्र देवदत्तः अपादानम्। तस्य तत्त्वेन विवक्षायां 'देवदत्तात् शतं जयति' इति प्रयोगः। तस्य तथा अविवक्षायां कर्मसंज्ञा-द्वितीया। इदानीमयमपि 'जि'-धातुः द्विकर्मकः।
- गोपालः व्रजम् अवरुणद्धि गाम् – गोपालः गोः व्रजे बन्धनपूर्वकम् अवरोधं कल्पयति इत्यर्थः। अत्रः व्रजः अधिकरणम्। तस्य तत्त्वेन विवक्षायां 'व्रजे अवरुणद्धि गाम्' इति प्रयोगः। तस्य तथा अविवक्षायां कर्मसंज्ञा-द्वितीया। इदानीमयमपि 'रुध्' धातुः द्विकर्मकः।
- गुरुः माणवकं धर्मं ब्रूते
- गुरुः माणवकं धर्मं शास्ति – अत्र गुरुः माणवकाय (शिष्याय) धर्ममुपदिशति इत्यर्थः। अत्र च माणवकः सम्प्रदानम्। तस्य तत्त्वेन विवक्षायां माणवकाय धर्मं ब्रूते / शास्ति' इति प्रयोगः। तस्य तथा अविवक्षायां कर्मसंज्ञा-द्वितीया। इदानीम् एतौ ब्रू-शास् – धातू द्विकर्मकौ।

एवमेतेषु उदाहरणेषु प्रथमतः सप्तसु अपादानस्य तत्त्वेन अविवक्षा, अष्टमे अधिकरणस्य तत्त्वेन अविवक्षा, नवम-दशमयोः सम्प्रदानस्य तत्त्वेन अविवक्षा च द्रष्टुं शक्यते।

7. **अन्यपूर्वकं कर्म 'आधारकर्म'** – यदा शीङ् – स्था - अासधातूनाम् अधि – इत्युपसर्गः योजितः 'अधिशेते, अधितिष्ठति, अधि + आसते' तदा प्रयोगे, एतेषां त्रयाणाम् अकर्मकत्वेन आधारः अधिकरणं भवति। यथा हरिः वैकुण्ठे शेते / तिष्ठते / आस्ते। परन्तु यथा 'अधि-' इति उपसर्गः योजितः तदा आधारः कर्म भवति। 'वैकुण्ठम् अधिशेते / अधितिष्ठति / अध्यास्ते' इति॥ अकथितकर्मणः अस्य च अयं भेदः। तत्र आधारस्य आधाररूपेण विवक्षायाम् अधिकरणसंज्ञा सप्तमी च। तथा अविवक्षायामेव कर्मसंज्ञा द्वितीया च। अत्र तु आधाररूपेण विवक्षायामपि कर्मसंज्ञैव न तु अधिकरणसंज्ञा। तथा च द्वितीयैव, न तु सप्तमी कदापि। सूत्रम् 'अधिशीङ्स्थासां कर्म' (अष्टा., 1.4.46)

8. **प्रयोज्यकर्म** - पूर्वं कर्तृभेदेषु प्रयोज्यकर्ता अपि अस्ति। तस्यैव प्रयोज्यकर्तुः कर्मसंज्ञा भवति केषाञ्चित् धातूनां प्रयोगे। तद्बोधकं सूत्रं 'गतिबुद्धि प्रत्यवसानार्थशब्दकर्माकर्मकाणाम् अणि कर्ता स णौ' (अष्टा., 1.4.52)

इति। ये धातवः गत्यर्थकाः (गमनार्थकाः) ज्ञानार्थकाः, भक्षणार्थकाः, येषां कर्म शब्दः तादृशाः, अकर्मकाश्च' : तेषां णिजन्तानां (प्रेरणप्रत्ययान्तानां) प्रयोगे शुद्धप्रयोज्यः कर्म भवति। अर्थात् तस्य कर्मप्रत्ययाः द्वितीयादयः भवन्ति। अन्येषां धातूनां तु णिजन्तानां शुद्धप्रयोज्यः कर्तैव भवति इति कर्तृप्रत्ययाः तृतीयादयः भवन्ति। कर्तृभेदेषु शुद्धप्रयोज्यस्य उदाहरणानि ज्ञातानि। अथ प्रयोज्यकर्मणः उदाहरणानि –

- 'रामः वनं गच्छति' - इयं शुद्धधात्ववस्था - अत्र कर्ता रामः। सः 'दशरथः रामं वनं गमयति' - इति णिजन्तगम्धातुप्रयोगे प्रयोज्यः सन् कर्म भवति। अतः द्वितीया।
- रामः धर्मं वेत्ति / जानाति इति शुद्धधात्ववस्थायां रामः कर्ता। सः 'गुरुः रामं धर्मं वेदयति / ज्ञापयति इति णिजन्तप्रयोगे प्रयोज्यः सन् कर्म भवति, अतः द्वितीया।
- बालः क्षीरं पिबति - इति शुद्धधात्ववस्थायां बालः कर्ता। सः 'माता बालं क्षीरं पाययति - इति णिजन्तप्रयोगे प्रयोज्यः सन् कर्म भवति, अतः द्वितीया।
- बालः कथां शृणोति - इति शुद्धधात्ववस्थायां बालः कर्ता। अत्र शब्दमयी कथा कर्म। अतः अयं धातुः शब्दकर्मकः। अत्र कर्ता बालः 'माता बालं कथां श्रावयति' इति णिजन्तप्रयोगे प्रयोज्यः सन् कर्म भवति। अतः द्वितीया। 'बालः स्नाति' - अयं स्नाधातुः अकर्मकः। अत्र कर्ता बालः 'माता बालं स्नापयति' - इति णिजन्तप्रयोगे प्रयोज्यः सन् कर्म भवति, अतः द्वितीया।

9. **कालकर्म** – मासम् आस्ते, पक्षं वर्धते - अकर्मकः धातुः भवति चेदपि कालः आधारोऽपि कर्म भवति। कालस्य आधाररूपेण विवक्षायां सप्तमी अपि। मासे आस्ते, पक्षे वर्धते इति।

10. **देशकर्म** – कुरून् स्वपिति - कुरुदेशेषु स्वापं करोति इत्यर्थः। अत्रापि धातुः अकर्मकश्चेदपि देशः कर्म भवति। देशे अधिकरणत्वविवक्षापि भवितुमर्हति। तदा सप्तमी अपि। यथा - कुरुषु स्वपिति - सूचना - देशवाचकपदं बहुवचने एव प्रयोक्तव्यं भवति।

11. **भावकर्म** – यत्र काचित् भावकृदन्तबोध्या क्रिया, तत्क्रियासमयं बोधयति, तदा तिङतः धातुः अकर्मकश्चेदपि भावकृदन्तं कर्म भवति। यथा -

गोदोहम् आस्ते। गोदोहनक्रियाकाले आस्ते इत्यर्थः। अत्रापि अधिकरणत्वेन विवक्षायां सप्तमी अपि। गोदोहे आस्ते। भावकर्म कालकर्मण एव कश्चन भेदः इत्यपि वक्तुं शक्यते।

12. **मार्गपरिमाणकर्म** – क्रोशः, गव्यूतिः (क्रोशयुगम्) इत्यादिमार्गपरिमाणं कर्मसंज्ञकं भवति अकर्मकधातुभिर्योगेऽपि। यथा - क्रोशम् आस्ते - मार्गपरिमाणकालदेशभावानां कर्मत्वबोधकं वार्तिकम् – 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' (वा.)

13. **सम्प्रदानकर्म** – यजधातोः दानार्थकस्य प्रयोगे सम्प्रदानस्य कर्मसंज्ञा, कर्मणः करणसंज्ञा च - यथा - पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः। इदं च संस्कृते एव विशिष्टेऽस्मिन् प्रयोगे एव।

14. **गतिकर्म** – गत्यर्थसकर्मकधातुयोगे यत्कर्म स्थानादिरूपं गृहादिरूपं च यदधिकरणरूपमपि भवितुमर्हति, तत् गति कर्म इति स्वीक्रियते। यथा - ग्रामं गच्छति - तिरुपतिं गच्छति इत्यादि। यद्यपि व्याकरणशास्त्रे इदं कर्म ईप्सिततममेव भवति अथापि भाषान्तरे अस्य कुत्रचित् कर्मरूपेण, कुत्रचित् अधिकरणरूपेण स्वीकारः दृश्यते। कुत्रचिच्च अत्र द्वितीया न भवति, किन्तु चतुर्थी एकैव। यथा तेलुगु भाषायां गृहाय गच्छति' इत्येव। संस्कृते उभयम् द्वितीया, चतुर्थी च। कुत्रचिच्च अधिकरणविवक्षैव। अतः अयं पृथक् विभागः अपेक्षितः 'एन्.एल्.पि' कृते। एवमपेक्षानुगुणं विभागाः स्वीकरणीयाः। अत्र च मार्गदर्शकः भोजराजः यः खलु एकैकं कारकम् अष्टादशधा विभज्य प्रदर्शितवान्। यद्यपि ते एव विभागाः सर्वे अत्र न स्वीकृताः, अथापि मार्गदर्शनं तु तस्यैव।

## करणम्

"साधकतमं करणम्"[10] क्रियासिद्धौ प्रकृष्टम् उपकारकं (साधकं) करणम् भवति। क्रियायाः सिद्धिश्च फलस्योत्पत्त्या भवति। अतः यस्य कारकस्य व्यापारस्य समनन्तरं फलस्य निष्पत्तिः भवति तत् करणं भवति। यथा - रामः बाणेन वालिनं हन्ति। अत्र हननस्य फलं प्राणवियोगः। स च प्राणवियोगः बाणस्य व्यापारस्य शरीरवेधनरूपस्य व्यापारस्य समनन्तरमेव भवतीति बाणः हननक्रियायां करणं भवति। कदाचित् फलोत्पत्त्यभावेऽपि कर्तुः तदिच्छया तस्य विवक्षणात् करणसंज्ञा भवत्येव। एवम् असिना छिनत्ति, चषकेण पिबतीत्यादि।

10 अष्टा., 1.4.42

अत्र करणे अनेके प्रभेदाः न सन्ति। परन्तु यजधातोः दानार्थकस्य प्रयोगे कर्म करणं भवति। यथा - पशुना रुद्रं यजते - पशुं रुद्राय ददातीत्यर्थः। अत्र पशोः कर्मणः करणसंज्ञा इति तृतीया भवति, अत्र प्रमाणभूतं वार्तिकम् - "यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा"। इदं कर्मकरणमिति वक्तुं शक्यते। अयं च प्रयोगः संस्कृते एव। भाषान्तरे सन्दर्भेऽस्मिन् एतादृशः प्रयोगः मृग्य एव। एवं क्रीडार्थकस्य 'दिव्' धातोः प्रयोगे यत् क्रीडासाधनम् अक्ष-कन्दुकादिकम् एकदैव कर्मकरणोभयसंज्ञकं भवति। तथा च कर्मसंज्ञां, करणसंज्ञां च आश्रित्य एकदैव कार्याणि भवन्ति। यथा - मनसा दीव्यति इति विग्रहे मनः करणमिति कृत्वा तृतीया, मनः कर्म इति कृत्वा 'दिव' धातोः "कर्मणि अण्"[11] इति अण् प्रत्ययः उभयमपि एकदैव भवतीति 'मनसादेवः' इति प्रयोगः सिद्ध्यति। अयमपि कश्चन विशिष्ट एव प्रयोगः।

**सम्प्रदानम्**

इदं प्रथमतया मुख्यसम्प्रदानम्, गौणसम्प्रदानमिति द्विविधम्।

1. **मुख्यसम्प्रदानम्** - सम्यक् प्रदीयते यस्मै तत् सम्प्रदानमिति व्युत्पत्तिः। अनया व्युत्पत्त्या यद्वस्तु यस्मै स्वत्त्वनिवृत्तिपूर्वकं समर्प्यते सः सम्प्रदानं भवति। इदं मुख्यसम्प्रदानमिति वक्तुं शक्यते। यथा - देवदत्तः विप्राय गां ददाति - अत्र देवदत्तः स्वस्वत्त्ववतीं गां, स्वस्वत्त्वनिवृत्तिपूर्वकं विप्राय समर्पयति इति विप्रः अत्र मुख्यसम्प्रदानं भवति।

2. **गौणसम्प्रदानम्** - 'रजकाय वस्त्रं ददाति' इत्यत्र रजकः गौणसम्प्रदानम्, यतः वस्त्राणि पुनः स्वीकरणाय रजकाय दीयन्ते, अतः अत्र स्वत्वनिवृत्तिः नास्ति। केवलं कर्मणः किञ्चित्कालं कर्मसम्बन्धः विवक्षितः। एवमेव 'गुरु: शिष्याय चपेटां ददाति' इत्यत्र शिष्यः। अत्र चपेटा नाम कपोले हस्तेन ताडनम्। अत्र स्वस्वत्त्वनिवृत्तिरपि नास्ति, तत्स्वीकर्तुः तेन प्रयोजनमपि नास्ति, अथापि कर्मभूतचपेटासम्बन्धः तस्मिन् अस्तीति शिष्यः सम्प्रदानं भवति। एतदुभयं मुख्यं गौणं च सम्प्रदानं सकर्मकधातूनां प्रयोगे भवति। अत्र सूत्रम् - "कर्मणा यमभिप्रैति स सम्प्रदानम्"[12]

3. **क्रियोद्देश्यं सम्प्रदानम्** - कर्ता स्वक्रियया यस्य सम्बन्धमिच्छति सोऽपि सम्प्रदानम्। इदं च अकर्मकधातुस्थले। यथा - भार्या पत्ये शेते। अत्र शीङ्

[11] अष्टा., 3.2.1
[12] अष्टा., 1.4.32

धातुः अकर्मकः । कर्त्री भार्या स्वशयनक्रियया पत्युः सम्बन्धमिच्छतीति अत्र पतिः सम्प्रदानं भवति । एवं सैनिकः युद्धाय सन्नह्यति - अत्रापि सन्नाहक्रियया सैनिकः युद्धसम्बन्धमिच्छतीति युद्धं सम्प्रदानम। अत्र प्रमाणम् - "क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्" इति वार्तिकम्।

4. **कोपोद्देश्यं सम्प्रदानम्** - कुध-द्रुह-ईर्ष्या-असूयार्थकधातूनां प्रयोगे कर्तुः कोपस्य उद्देश्यभूतः सम्प्रदानं भवति। यथा - चैत्रः देवदत्ताय क्रुध्यति / असूयति / ईर्ष्यति / दोग्धि - अत्र कर्तुः चैत्रस्य कोपस्य उद्देश्यभूतः देवदत्तः। अतः सः सम्प्रदानं भवति। अत्र प्रमाणं - "क्रुध-द्रुह-ईर्ष्या-असूयार्थानां यं प्रति कोपः"[13]

5. **ईप्सितं सम्प्रदानम्** - स्पृहा = कस्यचिद्वस्तुविषयिणी उत्कटेच्छा। तद-र्थकधातूनां प्रयोगे कर्तुः उत्कटेच्छाविषयः सम्प्रदानं भवति। यथा - नारी पुष्पेभ्यः स्पृहयति। अत्र कर्तृभूतनार्याः उत्कटेच्छाविषयाः पुष्पाणीति पुष्पाणां सम्प्रदानसंज्ञा भवति।

6. **उत्तमर्णः सम्प्रदानम्** - ऋणसन्दर्भे ऋणदातुः सम्प्रदानसंज्ञा भवति। ऋणव्यवहारे ऋणदाता उत्तमर्ण इति, ऋणग्रहीता अधमर्ण इति च उच्यते। तत्र अधमर्णः उत्तमर्णाय प्रत्यर्पणीयम ऋणं धारयतीत्यर्थे उत्तमर्णः सम्प्रदानं भवति। यथा - चैत्र : देवदत्ताय शतं धारयति - देवदत्ताय देयं ऋणरूपं शतं रूप्यकं चैत्रः धारयतीत्यर्थः। धारयतेः (धृञ् धातोः णिजन्तस्य) प्रयोगे एव उत्तमर्णस्य सम्प्रदानसंज्ञा। प्रमाणभूतं सूत्रम् - "धारेरुत्तमर्णः"[14]

7. **करणसम्प्रदानम्** - परिक्रयणसन्दर्भे करणभूतं धनं सम्प्रदानसंज्ञामपि लभते। परिक्रयणं नाम नियमितकालं यावत् कस्यचित् स्वसेवकत्वेन स्वीकरणम्। तत्र च वेतनरूपं धनं वस्तुतः करणं भवति। यथा - देवद-त्तः विष्णुमित्रं शतेन परिक्रीणाति। देवदत्तः विष्णुमित्रनामकं शतेन रूप्यकैः स्वसेवायां स्वीकरोतीत्यर्थः। अत्रैव करणभूतानि शतरूप्यकाणि सम्प्रदान-संज्ञामपि लभन्ते। तथा च सम्प्रदानसंज्ञायां चतुर्थी भवति - यथा - देवदत्तः विष्णुमित्रं शताय परिक्रीणाति। सूत्रं "परिक्रयणे सम्प्रदानमन्यतरस्याम्"[15]

13 अष्टा., 1.4.37

14 अष्टा., 1.4.35

15 अष्टा., 1.4.44

8. **विप्रश्नविषयः सम्प्रदानम्** - अत्र ज्योतिषिकः कर्ता। स च पृष्टः सन् यत्सम्बन्धिशुभाशुभं विचारयति, तस्य अपि सम्प्रदानसंज्ञा भवति, राध - ईक्षधात्वोः प्रयोगे। यथा - गर्गः (ज्यौतिषिक :) कृष्णाय राध्यति/ ईक्षते। ज्यौतिषिकः कृष्णसम्बन्धिशुभाशुभफलं विचारयति इत्यर्थः। अत्र कृष्णः सम्प्रदानम्। "राधीक्ष्योर्यस्य विप्रश्नः"[16]

एतेषु सम्प्रदानविभागेषु आद्याः त्रयः सर्वासु भाषासु उपलभ्येरन्। अन्ये विभागाः विरलाः।

## अपादानम्

1. **अवधिः अपादानम्** - यत्र वस्तुद्वयस्य विभागः, तत्र कर्तृभिन्नं कारकम् अपादानं भवति। "ध्रुवमपाये अपादानम्"[17] इति सूत्रम्। अपायः = विभागः, तस्मिन् अवधिभूतं विभागाश्रयं कर्तृभिन्नम् अपादानं भवतीति सूत्रार्थः। यथा - वृक्षात् बालः पतति। अत्र वृक्षबालयोः विभागे बालः कर्ता, तद्भिन्नः विभागाश्रयः वृक्षः, अतस्तदपादानमित्यर्थः। अपादीयते = विभज्यते अस्मादिति अपादानशब्दस्य व्युत्पत्तिः। विभागस्य अवधिः इत्यर्थः। विभागजनकक्रियानाश्रयत्वे सति विभागाश्रयः अपादानम। विभागजनकक्रियाश्रयस्तु कर्ता। तद्भिन्नः विभागाश्रयश्च अपादानमिति पूर्वोक्तस्य लक्षणस्य अर्थः। इदमेव हि मुख्यम् अपादानम्। अन्यान्यपि अपादानानि सन्ति, तानि गौणानीति वक्तुं शक्यते।

2. **भयहेतुः अपादानम्** - "भीत्रार्थानां भयहेतुः"[18] भयार्थकानां रक्षणार्थानां च धातूनां प्रयोगे भयस्य कारणम् अपादानं भवति। यथा - चोरात् बिभेति मैत्रः, चोरात् त्रायते विष्णुमित्रं देवदत्तः। अत्र उभयत्र चोर : भयहेतुरिति सः अपादानम्।

3. **कालमाने आरम्भबिन्दुः** - "फाल्गुन्याः चैत्री पौर्णमासी मासे" अत्र कालस्य माने आरम्भबिन्दुः फाल्गुनी पौर्णमासी। अतः सा अपादानं भवति। अत्र वार्तिकं - "यतश्चाध्वकालनिमानं तत्र पञ्चमी"[19]।

---

16 अष्टा., 1.4.39
17 अष्टा., 1.4.24
18 अष्टा., 1.4.25
19 वा.१४७७

4. **मार्गस्य माने आरम्भबिन्दुः** - 'तिरुपतितः चन्द्रगिरिः क्रोशचतुष्टये' - अत्र तिरुपतिचन्द्रगिर्योः मध्ये स्थितः मार्गः मीयते। अत्र आरम्भबिन्दुः तिरुपतिः। अतः तदपादानम्। अत्र वार्तिकम् - "यतश्चाध्वकालनिमानं तत्र पञ्चमी" (वा.१४७७)।

5. **वारणे अवधिः** - वारणर्थकधातूनां प्रयोगे वारयतीत्यादिक्रियापदप्रयोगे यस्मात् वारयितुमिष्टः सः अपि अपादानं भवति। सूत्रम् - "वारणार्थानामीप्सितः"[20]। यथा - कूपात् अन्धं वारयति - अत्र कूपस्य दिशि गच्छन्तम् अन्धं कूपसंयोगात् निवारयति इत्यर्थः। अतः कूपः अपादानम्। अन्धस्तु कर्मैव ईप्सिततमत्वात्।

6. **पराजयस्य विषयः** - पराजये यद् विषयभूतम्, यन्निवर्तयितुं सामर्थ्याभावात् ततः निवृत्तिः, तद् अपादानम्। यथा - 'अध्ययनात् पराजयते' - अत्र अध्ययनं कर्तुमसमर्थः ततः निवर्तते इत्यर्थः। अत्र च मानसिकः विभागः अध्ययनस्य तत्कर्तुमसमर्थस्य कर्तुः च। सूत्रम् - "पराजेः असोढः"[21] परा इत्युपसर्गपूर्वकः जिधातुः आत्मनेपदे प्रयोक्तव्यः पराजयेऽर्थे। अस्मिंश्च अयमकर्मकः। तादृशपराजेः प्रयोगे कर्तुः यद्विषयकमसामर्थ्यं तस्य अपादानसंज्ञा, पञ्चमी च।

7. **कर्तुः यत्कर्तृक-आत्मदर्शनाभावः इष्टः सः** - कर्ता यः आत्मानं न पश्येदिति धिया आत्मानं गोपयति सः अपि अपादानम्। अत्रापि मानसिकः विभागः, तत्र तादृशः व्यक्तिविशेषः अवधिभूतः (विषयभूतः) इति सः अपादानं भवति। यथा - मातुः निलीयते कृष्णः - मातृकर्तृकम् आत्मनो दर्शनमनिच्छन् कृष्णः आत्मानम् अन्यत्र लतादिषु गोपयतीत्यर्थः। अत्र सूत्रम् "अन्तर्धौ येनादर्शनमिच्छति"[22]।

8. **विभक्तम्** - केनचित् विशेषेण समानयोः द्वयोः मध्ये तत्रैव केनचिदतिशयेन एकस्मात् अपरस्य भेदकथनम् विभक्तम्। तद्विषयः कर्तृभिन्नः तादृशातिशयाभाववान् अपि अपादानम् भवति। इदमपि मानसिकम्। केनचित् धर्मेण समानयोः मध्ये तुलनायामिदम्। यथा - माथुराः पाटलीपुत्रकेभ्यः आढ्यतराः। अत्र माथुराः देशः, पाटलीपुत्रकाः अपि देशः। अनयोः

20 अष्टा., 1.4.27
21 अष्टा., 1.4.26
22 अष्टा., 1.4.28

द्वयोरपि आढ्यत्वं समानम्। आढ्यत्वेन गुणेन द्वावपि समानौ। तत्रापि इदानीम् माथुरेषु पाटलिपुत्रकापेक्षया किञ्चिद् आधिक्यम् आढ्यत्वे बोध्यते इति इदं विभक्तमित्युच्यते। अस्यापि अपादानविभागे अन्तर्भावः भाष्य-कारेण कृतः। सूत्रं तु पञ्चमी विभक्तेः"[23] इति। अत्र न्यूनता यत्र प्रदर्श्यते तदपादानं भवति।

9. **आख्याता-उपयोगे** आख्यातुः अपादानसंज्ञा भवति। सूत्रं च "आख्याता उपयोगे"[24]। उपयोगः = नियमपूर्वकविद्याभ्यासः, तत्र यः आख्याता = अध्यापकः, सः अपादानं भवति , यस्मिन् सन्दर्भे शिष्यः कर्ता भवति। यथा - रामः वशिष्ठात् सर्वाः विद्याः जग्राह। अत्र वशिष्ठ : रामस्य आख्याता गुरु :। अतः वशिष्ठस्य अपादानसंज्ञा पञ्चमी च।

10. **जुगुप्सितम्** - "धर्मात् जुगुप्सते " - सूत्रं "जुगुप्साविरामप्रमादार्थानामुपसं-ख्यानम्"[25]।

11. **प्रकृतिः** - सूत्रं "जनिकर्तुः प्रकृतिः"[26]। जायमानस्य वस्तुनः प्रकृतिभूतं वस्तु अपादानं भवति। यथा - मृदः घटो जायते; अत्र घटः विकृतिः, तस्य प्रकृतिभूतं वस्तु मृत्। तस्य अपादानसंज्ञा, पञ्चमी च। एवं ब्रह्मणः प्रजाः प्रजायन्ते। गोमयात् वृश्चिको जायते।

12. **प्रभवः** - प्रभवः = प्रथमप्रकाशस्थानम् - भूलोके कस्यापि उद्गमस्थान-मित्यर्थः। यथा - नासिकक्षेत्रात् गोदावरी प्रभवति; नासिकक्षेत्रे गोदावरी प्रथमतया आविर्भूता इत्यर्थः। अत्र उद्गमस्थानं नासिकक्षेत्रम् अपादानं भवति, अतः पञ्चमी। हिमवतः गङ्गा प्रभवति।

13. **यस्मात् प्रमादः** - "धर्मात् प्रमाद्यति" - "जुगुप्सा विराम" इति एते च उक्ताः अपादानप्रभेदाः भारतीयभाषासु प्रायः सर्वत्र सन्ति।

### अधिकरणम्

कर्तृ-कर्मद्वारा क्रियायाः आधार: अधिकरणम्। "आधारोऽधिकरणम्"[27] इति सूत्रम्। यथा - देवदत्तः गृहे स्थाल्याम् ओदनं पचति - अत्र गृहं कर्तुः देवद-

[23] अष्टा., 2.3.42
[24] अष्टा., 1.4.29
[25] वा. १०७२
[26] अष्टा., 1.4.30
[27] अष्टा., 1.4.45

त्तस्य आधारः, स्थाली ओदनस्य कर्मणः आधारः। तथा च उभयोः अधिकरणसंज्ञा, अतः सप्तमी। इदं च दैशिकं, कालिकं, वैषयिकं चेति त्रिविधम्।

1. दैशिकम् - देशः = स्थानं गृहादिकं पञ्चभूतसम्बन्धि यत्र आधारः, सः आधारः दैशिकमधिकरणम्। यथा - गृहे वसति, मार्गे गच्छति, नद्यां स्नाति, आकाशे डयते, आतपे तिष्ठति, अन्धकारे गच्छति, तिलेषु तैलम्।

2. कालिकम् - कालः मासादिकम् यत्र आधार : सः आधार : कालिकमधिकरणम्। यथा - दिने पठति, रात्रौ निद्राति।

3. वैषयिकम् - दैशिक-कालिकभिन्नम् अधिकरणं वैषयिकमधिकरणम्। यथा - मोक्ष इच्छा अस्ति। इच्छा-द्वेष-यत्नाद्यर्थकेषु धातुषु प्रयोगे इच्छाद्वेषयत्नानाम् यः आधारः, सः आधारः वैषयिकमधिकरणमित्युच्यते। यद्यपि औपश्लेषिकम्, वैषयिकम्, अभिव्यापकमिति अन्यथापि अधिकरणस्य त्रैविध्यं शास्त्रग्रन्थेषु उपपाद्यते, तथापि सहजभाषाविश्लेषणे एतद्विभागापेक्षया पूर्वोक्तविभाग एव नितराम् उपयुक्तो भवति।

4. पर्यन्ताधिकरणम् - पर्यन्तं, यावत् इति शब्दाभ्यां बोध्यमानं देशाधिकरणं कालाधिकरणं च। यथा - मे मासस्य पञ्चमदिनाङ्कतः त्रिंशदिनाङ्कपर्यन्तं त्रिंशदिनाङ्क यावत् विरामाः। तिरुपतितः बेङ्गलूरुपर्यन्तं / बेङ्गलूरु यावत् विस्तृतमार्गं निर्मान्ति। अनयोः उदाहरणयोः प्रथमं कालरूपपर्यन्ताधिकरणस्य, द्वितीयं देशरूपपर्यन्ताधिकरणस्य चोदाहरणे।

एतावत्पर्यन्तं श्रुतक्रियासम्बन्धकारकविवेचनं कृतम्। अत्र च श्रुतक्रिया तिङन्तरूपा त्रिधा भवति। कर्तृतिङन्ता, कर्मतिङन्ता, भावतिङन्ता चेति। कर्तृतिङन्तयुक्तं वाक्यं कर्तरिप्रयोगः इति, कर्मतिङन्तयुक्तं वाक्यं कर्मणिप्रयोगः इति, भावतिङन्तयुक्तं वाक्यं भावे प्रयोग इति च उच्यते। कर्तरि प्रयोगः सर्वेषां धातूनां भवति। कर्मणि प्रयोगस्तु सकर्मकधातूनामेव। भावे प्रयोगः अकर्मकधातूनामेव। यथा - पचति, गच्छति, पठति, शेते इत्यादि कर्तृतिङन्तम्। पच्यते, गम्यते, पठ्यते इति कर्मतिङन्तम्। सुप्यते, स्नायते इत्यादि भावतिङन्तम्।

कर्तृतिङन्तप्रयोगे कर्तुः प्रथमा, कर्मणः द्वितीया, करणस्य तृतीया, सम्प्रदानस्य चतुर्थी, अपादानस्य पञ्चमी, अधिकरणस्य सप्तमी च भवन्ति।

कर्मतिङन्तप्रयोगे कर्तुः तृतीया, कर्मणः प्रथमा, करणस्य तृतीया, सम्प्रदानस्य चतुर्थी, अपादानस्य पञ्चमी, अधिकरणस्य सप्तमी च भवन्ति।

भावे प्रयोगे कर्तुः तृतीया, (कर्म न भवति), करणस्य तृतीया, अधिकरणे सप्तमी च भवन्ति। भावे प्रयोगे सर्वाणि कारकाणि प्रायः न भवन्ति।

एते च सामान्यनियमाः। केचन विशेषनियमाः अपि सन्ति, ते यथासन्दर्भं ज्ञेयाः।

अथ श्रुतक्रियाकृदन्तरूपापि भवितुमर्हति, यथा- पचनम्, कृतिः, क्रिया इत्यादि। तादृशकृदन्तबोध्यक्रियास्थले कारकबोधकविभक्तिविषये किचिद्विशिष्य ज्ञातव्यं भवति।

**कृदन्तबोध्यक्रियासम्बन्धा कारकविभक्तिः**

कृदन्तबोध्यक्रियासम्बन्धे कर्तृ-कर्मकारकयोः बोधनार्थं कुत्रचित् षष्ठी-विभक्तिः, कुत्रचिच्च तिङन्तबोध्यक्रियासम्बन्धे इव कर्तरि प्रयोगे कर्तुः प्रथमा, कर्मणः द्वितीया, तथा कर्मणिप्रयोगे कर्मणः प्रथमा, कर्तुः तृतीया च भवन्ति। तथा च कृदन्तानां द्विधा विभागः भवति।

तत्र प्रथमगणे शतृ, शानच्, चानश्, कानच्, उ, उक, क्त्वा (ल्यप्), तुमुन्, णमुल्, क्त, क्तवतु, खल्, युच्, तृन् इति प्रत्ययान्ताः भवन्ति।" न लोकाव्ययनिष्ठाखलर्थतृनाम्" (अष्टा., 2.3.69) प्रथमगणीयकृदन्तक्रियासम्बन्धे कर्तुः, कर्मणश्च तिङन्तबोध्यक्रियासम्बन्धे इव प्रथमा द्वितीया-तृतीयाविभक्तयः एव भवन्ति। यथा –

- शतृ - ग्रामं गच्छन् देवदत्तः तृणं स्पृशति।
- शानच् - वेदम् अधीयानः देवदत्तः।
- चानश् - कवचं बिभ्राणः सैनिकः।
- उ - विष्णुं दिदृशुः भक्तः।
- उकारान्तः प्रत्ययः - इष्णुच् - आत्मानम् अलङ्करिष्णुः (इत्यादि)।
- उकञ् - रावणं घातुकः रामः।
- क्त्वा - छात्रः गृहे ओदनं भुक्त्वा शालां गच्छति।
- तुमुन् - रामः शाकान् क्रेतुम् आपणं गच्छति।

- णमुल - बालः क्षीरं पायं पायं भोजनं करोति।
- क्त - देवदत्तेन पाठ : पाठितः (क्तः कर्मणि)
  देवदत्तः ग्रामं गतः (क्तः कर्तरि)
  देवदत्तः शयितः (क्तः भावे)
- क्तवतु - रामः वनं गतवान् (क्तवतु कर्तरि)
  सीता अपि वनं गतवती (क्तवतु कर्तरि)
- खल् - ईषत्कर : कट : भवता (खल् कर्मणि)
- युच् - ईषत्पानः सोमः भवता (युच् कर्मणि)
- तृन् - कर्ता कटान् (निपुणः इत्यर्थः)

प्रथमगणोक्तप्रत्ययान् त्यक्त्वा अन्ये कृत्प्रत्ययाः द्वितीयविभागे भवन्ति। तादृशकृदन्तानां योगे तु कर्तरि, कर्मणि च षष्ठी भवति। सूत्रं "कर्तृकर्मणोः कृति" (अष्टा., 2.3.65) अस्य सूत्रस्य निषेधः प्रथमगणोक्तप्रत्ययविषये। यथा - "न लोकाव्ययनिष्ठाखलर्थतृनाम्" (अष्टा., 2.3.69) इति। यथा -

- देवदत्तस्य पाकः ( कर्तरि षष्ठी )
- ओदनस्य पाकः ( कर्मणि षष्ठी )
- देवदत्तस्य गमनम् ( कर्तरि षष्ठी )
- ग्रामस्य गमनम् ( कर्मणि षष्ठी )
- ब्रह्मणः सृष्टि : ( कर्तरि षष्ठी )
- जगतः सृष्टिः ( कर्मणि षष्ठी )

यदा वाक्ये कर्तृवाचकं कर्मवाचकं वा पदमेकमेव भवति तदा कर्तुः, कर्मणश्च षष्ठी।

यदा तु वाक्ये कर्तृवाचकपदं कर्मवाचकपदं च भवति तदा कर्मणः एव षष्ठी, कर्तुस्तु तृतीया। "उभयप्राप्तौ कर्मणि" (अष्टा., 2.3.66)। यथा - देवदत्तेन ग्रामस्य गमनम्। देवदत्तेन ओदनस्य पाकः। ब्रह्मणा जगतः सृष्टि :। इत्यादि।

कृत्प्रत्ययेष्वेव कृत्यप्रत्यया इति केचन प्रत्ययाः सन्ति - तव्य (तव्यत्, तव्य), अनीय, य (यत्, ण्यत्, क्यप्) इति। एते च सकर्मकधातोः प्रयुक्ताः कर्म बोधयन्ति, अकर्मकधातोः प्रयुक्ताः भावं बोधयन्ति। ततश्च एतेषां कर्मणि प्रयोगः, भावे प्रयोगश्च भवतः। एतत्कृत्यप्रत्ययानां प्रयोगे कर्तृवाचकात् षष्ठी अपि भवति, तृतीया अपि "कृत्यानां कर्तरि वा"[28]। यथा - देवदत्तेन करणीयम्, देवदत्तस्य करणीयम्। मया करणीयम्, मम करणीयम् इत्यादि। अन्येषां कारकाणां विषये तु तिङन्तबोध्यक्रियासम्बन्धे इव ताः एव विभक्तयः भवन्ति। अर्थात् करणे - तृतीया, सम्प्रदाने - चतुर्थी, अपादाने - पञ्चमी, अधिकरणे - सप्तमी च। एवं श्रुतक्रियासम्बन्धा कारकविभक्तिः व्याख्याता।

**अश्रुतक्रियासम्बन्धा कारकविभक्तिः**

अश्रुतक्रियासम्बन्द्धा कारकविभक्तिः द्विधा भवति। यथा –

1. गम्यमानक्रियासम्बद्धा - यत्र वाक्ये क्रियापदं न श्रूयते, किन्तु सन्दर्भवशात् सा क्रिया अध्याह्रियते, अध्याहृतक्रियामाश्रित्य कारकविशेषः भवति , सा विभक्तिः अश्रुतक्रियासम्बन्धा कारकविभक्तिः भवति। एषा च प्रायः प्रश्नोत्तरेषु सम्यक् ज्ञातुं शक्यते। यथा - "देवदत्तः यानेन स्वमित्रं द्रष्टुं ग्रामं गच्छति" इति सन्दर्भः। तत्र प्रश्नाः - उत्तराणि चेत्थं भवन्ति –

    - कः गच्छति ? देवदत्तः
    - कं गच्छति ? ग्रामम्
    - केन गच्छति ? यानेन
    - कं द्रष्टुं ? मित्रम्

    अत्र समाधानवाक्येषु क्रियापदं न श्रूयते, परन्तु प्रथमतः त्रये गच्छतीति, अन्ते द्रष्टुमिति क्रियापदम् ऊह्यते। अयमेव अध्याहारः इत्युच्यते। तादृशक्रियामाश्रित्य देवदत्तः कर्ता, ग्रामः कर्म, यानम् करणम, मित्रं च कर्म भवन्ति। एवं कृदन्तप्रयोगेऽपि। यथा - देवदत्तेन कृतः ओदनस्य पाकः।

    - कस्य पाकः ? ओदनस्य
    - केन पाक :? देवदत्तेन इति।

[28] अष्टा., 2.3.71

2. लुप्तकृदन्तक्रियासम्बद्धा - इयं पुनः द्विधा।

(a) ल्यबन्तबोध्यक्रिया - अथ अश्रुतक्रियासम्बन्धे एव कदाचित् कर्माधिकरणयोग्या द्वितीयादिविभक्तिः न भवति, अपि तु कुत्रचित् पञ्चमी, कुत्रचिच्च चतुर्थी भवतः। यथा - प्रासादात् प्रेक्षते। अत्र प्रासादमारुह्य प्रेक्षते इत्यर्थः। अत्र "आरुह्य" इति ल्यबन्तं प्रयोक्तव्यं, न प्रयुक्तमिति, तत्सूचयितुं तक्रियाकर्मबोधयितुं पञ्चमी भवति "प्रासादात्" इति। इयमेव ल्यब्लोपे पञ्चमीत्युच्यते। "ल्यब्लोपे कर्मण्यधिकरणे च"(वा)। अत्र पञ्चमी कर्म बोधयति। अत्र च अध्याहृतल्यबन्तक्रिया सकर्मकक्रिया भवति। यथात्र आरोहणक्रिया सकर्मकक्रिया भवति। अथ अध्याहृतल्यबन्तक्रिया अकर्मकक्रिया भवति, तर्हि अपि पञ्चमी भवति, परन्तु तस्याः पञ्चम्याः कर्म नार्थः, अपि तु अधिकरणमित्यर्थः। यथा - आसनात् प्रेक्षते - आसने उपविश्य प्रेक्षते। अत्र "उपविश्य" इति ल्यबन्तेन बोध्या उपवेशनक्रिया अकर्मकक्रिया। अतः अत्र पञ्चमी अधिकरणं बोधयति। अत्र प्रमाणं - "ल्यब्लोपे कर्मण्यधिकरणे च" इति।

(b) तुमुन्नन्तबोध्यक्रिया - एवं प्रयोक्तव्यस्य तुमुन्नन्तस्य अप्रयोगे, तद्बोध्यक्रियाकर्मणः चतुर्थी भवति। यथा - नृसिंहाय नमस्कुर्मः। अत्र नृसिंहम् अनुकूलयितुं नमस्कुर्मः इत्यर्थः। यदि नृसिंह एव साक्षात् नमस्कारविषयः स्यात् तर्हि "नृसिंहं नमस्कुर्मः" इत्येव प्रयोक्तव्यम्। अतः अत्र नृसिंहाय इति चतुर्थी विभक्तिः अत्र कस्यचित् तुमुन्नन्तस्य लोपं सूचयति। तथा च "अनुकूलयितुम्" इति तुमुन्नन्तबोध्यानुकूलनक्रिया कर्मबोधकात् नृसिंहात् चतुर्थी भवति। इयं चतुर्थी अप्रयुक्ततुमुन्नन्तक्रियायाः कर्म बोधयति। अत्र प्रमाणम् - "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[29] इति। अत्र क्रियार्थोपपदशब्देन तुमुन्नन्तमुच्यते। स्थानिनः इत्यस्य अप्रयोगे इत्यर्थः। एवमेतावता कारकाणां विवेचनम्, तत्सम्बन्धिकारकविभक्तीनां विवेचनं च कृतम्।

**सम्बन्धविभक्तिः**

क्रियायाः द्रव्यस्य च सम्बन्धः कारकसम्बन्ध इति तयोः द्वयोः सम्बन्धमाश्रित्य कारकविभक्तिः पूर्वं व्याख्याता। इदानीं द्वयोः पदार्थयोः (द्रव्ययोः) सम्बन्धः यदा विभक्त्या बोध्यते तदा सा विभक्तिः सम्बन्धविभक्तिः भवति। यथा - राज्ञः

29 अष्टा., 2.3.14

पुरुषः। अत्र राजा, पुरुषश्च द्वे द्रव्ये। तयोः परस्परं सम्बन्धं बोधयति षष्ठीं विभक्तिः। राजा प्रभुः, पुरुषः सेवकः इति। अतः अत्र षष्ठीसम्बन्धविभक्तिर्भवति। इयं सम्बन्धविभक्तिः उपपदविभक्तिः, शेषविभक्तिः इति द्विधा भवति।

1. उपपदविभक्तिः - उप = समीपे वर्तमानं पदम् उपपदम्। एतच्च अव्ययादिरूपं भवति। इदमपि अव्ययादिरूपं पदार्थयोः द्वयोः सम्बन्धं बोधयति। तादृशानाम् उपपदानां सम्बन्धेन सम्बन्धबोधनेऽपि षष्ठीं विना द्वितीयाद्याः विभक्तयः भवन्ति, याः उपपदविभक्तयः भवन्ति। एताश्च निश्चितस्य पदस्य प्रयोगे एव भवन्ति, न तु तदर्थबोधकान्यशब्दप्रयोगे। तत्र –

   (a) **उपपदद्वितीया**

      - उभयतः, सर्वतः, अभितः, परितः, समया, निकषा, हा, धिक्, उपर्युपरि, अध्यधि, अधोधः, अन्तरा, अन्तरेण - एतेषां प्रयोगे सम्बन्धिनः द्वितीया भवति।
        – उभयतः कृष्णं गोपाः - उभयतः = पार्श्वद्वये - कृष्णस्य पार्श्वद्वये गोपाः सन्ति।
        – सर्वतः कृष्णं गोपाः - सर्वतः = सर्वदिक्षु - कृष्णस्य समन्तात् गोपाः सन्ति।
        – परितः कृष्णं गोपाः - परितः = परिवार्य - कृष्णं परिवार्य गोपाः सन्ति इत्यर्थः।
        – अभितः कृष्णं गोपाः - अभितः = सर्वतः - कृष्णं परिवार्य गोपाः सन्ति इत्यर्थः।
        – समया ग्रामं नदी - समया = समीपं - ग्रामस्य समीपे नदी।
        – निकषा ग्रमं नदी - निकषा = समीपं - ग्रामस्य समीपे नदी।
        – हा कृष्णाभक्तम् - 'हा' = शोकसूचकमव्ययम् - कृष्णस्य अभक्तस्य विषये शोकः।
        – धिक् कृष्णाभक्तम् - धिक् = निन्दा - कृष्णाभक्तस्य निन्दा।
        – आसन्दमुपर्युपरि पुस्तकानि - उपर्युपरि - अव्यवधानेन उपरितले इत्यर्थः।

- आसन्दमध्यधि पुस्तकानि - अध्यधि - आसन्दस्य उपरि पुस्तकानीत्यर्थः।
- आसन्दमधोधः कन्दुकम् - अधोधः - अव्यवधानेन अधः प्रदेशे इत्यर्थः। आसन्दस्य अधः कन्दुकम्।
- त्वां मां च अन्तरा बालः - अन्तरा = मध्ये - तव मम च मध्ये बालः।
- धनम् अन्तरेण सुखं नास्ति - अन्तरेण = विना - धनस्य अभावे सुखं नास्ति।

अत्र सर्वत्र उभयतः इत्यादि पदानां प्रयोगे द्वितीया, तदर्थकशब्दप्रयोगे षष्ठी इति एषा द्वितीयाविभक्तिः सम्बन्धं बोधयति।

- एवं कर्मप्रवचनीयसंज्ञकेन शब्देन योगे अपि द्वितीया भवति। प्र, परा, अप इत्यादिप्रादयः अर्थविशेषे कर्मप्रवचनीयशब्देन उच्यन्ते। तेषां सम्बन्धेऽपि द्वितीया भवति। ते च - "अनु, उप, प्रति, परि, अभि, अधि, अति, अपि"।
  - हेत्वर्थकस्य 'अनु' इत्यस्य सम्बन्धे द्वितीया - जपम् अनु प्रावर्षत् - जपहेतुकं वर्षणमित्यर्थः। अत्र तृतीया न भवति।
  - सहार्थकस्य अनु' इत्यस्य सम्बन्धे द्वितीया - नदीम् अनु अवसिता सेना - नद्या सह सम्बद्धा इत्यर्थः।
  - हीनार्थकस्य 'अनु' इत्यस्य सम्बन्धे द्वितीया - अनु हरिं सुराः - सुराः हरेः हीनाः इत्यर्थः।
  - लक्षणार्थकस्य 'अनु' इत्यस्य सम्बन्धे द्वितीया - वृक्षात् अनु विद्युत् विद्योतते - अत्र विद्युतः स्थानस्य लक्षणं (परिचायक) वृक्षः। वृक्षस्य दिशि इत्यर्थः॥
  - कस्यचित् स्वरूपमनुसृत्य अन्य सम्बन्धप्रत्यायकस्य 'अनु' इत्यस्य सम्बन्धे द्वितीया - विष्णुम अनु भक्ताः' - ऊर्ध्वपुण्ड्रादिचिह्नः भक्तस्य विष्णुसम्बन्धपरिचायनम् - विष्णोः भक्तः इत्यर्थः।
  - भागः इत्यर्थकस्य 'अनु' इत्यस्य सम्बन्धे द्वितीया - लक्ष्मीः हरिम् अनु - लक्ष्मीः हरेः भागः इत्यर्थः।
  - वीप्सार्थकस्य 'अनु' इत्यस्य सम्बन्धे द्वितीया - वीप्सा नाम प्रतिद्रव्यं क्रियायाः आवृत्तिः। वृक्षं वृक्षम् अनु सिञ्चति -

एकैकं वृक्षं सिञ्चति इत्यर्थः।

- उप - हीनार्थस्य 'उप' इत्यस्य सम्बन्धे द्वितीया - उप हरिं सुराः - हरेः हीनाः सुराः इत्यर्थः।
- प्रति/परि - (१) लक्षणार्थयोः अनयोः सम्बन्धे द्वितीया - वृक्षं प्रति विद्योतते विद्युत्, वृक्षं परि विद्योतते विद्युत् - वृक्षस्य दिशि इत्यर्थः पूर्ववत्।
- स्वरूपमनुसृत्य अन्यसम्बन्धपरिचायकयोः अनयोः सम्बन्धे द्वितीया – विष्णुं प्रति भक्तः, विष्णुं परि भक्तः - विष्णुमनु भक्तः इत्येवार्थः।
- भागार्थे - लक्ष्मीः हरिं प्रति, लक्ष्मीः हरिं परि - लक्ष्मीः हरेः भागः इत्यर्थः।
- वीप्सार्थे - वृक्षं वृक्षं प्रति सिञ्चति, वृक्षं वृक्षं परि सिञ्चति।
- अभि - लक्षणे, स्वरूपमनुसृत्य परिचायने, वीप्सायां च यः अभिशब्दः तद्योगेऽपि द्वितीया –
- लक्षणे - वृक्षम् अभि विद्योतते विद्युत्
- परिचायने - भक्तः विष्णुम् अभि
- वीप्सायां - वृक्षं वृक्षम् अभि सिञ्चति
- अति - अतिक्रमणार्थे - अति देवान् कृष्णः - कृष्णः देवान् अतिक्रम्य वर्तते इत्यर्थः - देवेभ्योऽधिक इत्यर्थः। पूजार्थेऽपि - अति देवान् कृष्णः - देवेभ्योऽपि पूज्यः इत्यर्थः।
- अपि - सम्भावना - सामर्थ्यस्य परिचायने यः अपि शब्दः तस्य सम्बन्धे द्वितीया - अपि विष्णुं स्तुयात् चैत्रः - विष्णुं स्तोतुं समर्थ इत्यर्थः।
- निन्दा - धिक् देवदत्तम् अपि अकार्यम् कुर्यात् - अकार्यकर्तुः देवदत्तस्य निन्दा - निन्द्यपदार्थवाचकात् द्वितीया।
- विना - अभावार्थकविनाशब्दयोगेऽपि द्वितीया - धनं विना जीवनं नास्ति।
- पृथक्/नाना - एवं पृथक्, नाना शब्दयोः योगे - धनं पृथक्/नाना जीवनं नास्ति।

(b) **उपपदतृतीया**

सह - सहार्थकेन सह शब्देन योगे अप्रधानार्थात् तृतीया – पुत्रेण सह

पिता आगच्छति। यस्य क्रियासम्बन्धः अस्ति सः प्रधानः। अत्र पिता कर्ता, अतः सः प्रधानः, अप्रधानः पुत्रः। अतः तद्वाचकात् तृतीया। विना/पृथक्/नाना - अभावार्थकैः एतैः सम्बन्धे तृतीया – धनेन विना जीवनं नास्ति। धनेन पृथक् जीवनं नास्ति। धनेन नाना जीवनं नास्ति।

एवं तुल्यार्थैः योगेऽपि तृतीया - कृष्णेन समः/ तुल्यः/ सदृशः बलरामः – प्रसित, उत्सुकशब्दयोगेऽपि तृतीया - हरिणा प्रसितः / उत्सुकः (उत्कण्ठितः इत्यर्थः)।

(c) **उपपदचतुर्थी**

नमः, स्वस्ति, स्वाहा, स्वधा, अलं (समर्थार्थे), वषट् एतैः शब्दैः चतुर्थी भवति – कृष्णाय नमः - कृष्णोद्देश्यकनमस्कारः इत्यर्थः, गोभ्यः स्वस्ति - गवां कृते शुभम् भवतु इत्यादि, इन्द्राय स्वाहा - स्वाहा शब्दः देवतोद्देश्यकद्रव्यत्यागे, पितृभ्यः स्वधा - स्वधा शब्दः श्राद्धादिषु च प्रयुज्यते, इन्द्राय वषट् - वषट् शब्दः स्तुत्यर्थकः, दैत्येभ्यः हरिः अलम् - दैत्यान् नाशयितुं हरिः समर्थ इत्यर्थः। समर्थार्थकशब्दप्रयोगेऽपि चतुर्थी भवति, यथा - दैत्येभ्यः हरिः शक्तः, समर्थः, प्रभुः इत्यादि – आशीरर्थकशब्दयोगेऽपि चतुर्थी - देवदत्ताय मद्रं/भद्रं/कुशलं/निरामयं/सुखं/शं भूयात्।

(d) **उपपदपञ्चमी**

अन्य-आरात्-ऋते-विना एतैः योगे दिग्वाचकशब्दैः प्रभृत्यर्थकैश्च योगे पञ्चमी भवति - अन्य - बलरामः कृष्णात् अन्यः। अन्यार्थकशब्दयोगेऽपि पञ्चमी – बलरामः कृष्णात् भिन्नः/इतरः/विलक्षणः इत्यादि। आरात् - आरात् वनात् - वनस्य दूरे / समीपे वा - आरात् इत्यस्य दूरं समीपं वार्थः। ऋते / विना - अभावार्थकयोः अनयोः सम्बन्धे पञ्चमी – कृष्णात् ऋते/विना न मुक्तिः। दिग्वाचकाः - ग्रामात् पूर्वः पर्वतः - ग्रामस्य पूर्वस्यां दिशि इत्यर्थः, चैत्रात् पूर्वः फाल्गुनः। प्रभृत्यर्थकाः - प्रभृति, आरभ्य इत्यादयः - एतैः योगेऽपि पञ्चमी – भवात् प्रभृति/आरभ्य सेव्यः हरिः। जन्मतः आरभ्य हरिः सेव्य इत्यर्थः। बहिः - बहिः शब्दयोगेऽपि पञ्चमी – ग्रामात् बहिः उद्यानम्। एवं अप, परि, आ(ङ), प्रति - एतैः कर्मप्रवचनीयैः योगे पञ्चमी भवति। अप / परि - अनयोः वर्जनार्थे कर्मप्रवचनीयसंज्ञा भवति - तद्योगे पञ्चमी – अप हरेः संसारः - परि हरेः संसारः - हरिं त्यक्त्वा संसारः - हरिप्राप्तिपर्यन्तमित्यर्थः। आ(ङ्) - मर्यादा -

अभिविध्यर्थयोः आ(ङ्) कर्मप्रवचनीयसंज्ञः भवति – आमुक्तेः संसार : - अत्र आ(ङ्) मर्यादार्थकः । मुक्तिपर्यन्तं संसारः - मुक्तिस्तु संसारे नान्तर्भवति। आबालेभ्यः हरिभक्तिः - अत्र आ(ङ) अभिविध्यर्थकः - बालानपि अन्तर्भाव्य सर्वेषु हरिभक्तिरस्तीत्यर्थः । प्रति - प्रतिनिधिः, प्रतिदानमित्यर्थयोः प्रतिः कर्मप्रवचनीयसंज्ञः भवति, तद्योगे पञ्चमी। १. प्रद्युम्नः कृष्णात् प्रति - प्रद्युम्नः कृष्णस्य प्रतिनिधिः इत्यर्थः – २. यवेभ्यः प्रतियच्छति माषान् - यवान् स्वीकृत्य तत्प्रतिदानरूपेण माषान् प्रयच्छतीत्यर्थः । एवं दूरान्तिका(समीप)र्थकैः शब्दैः योगे पञ्चमी भवति। ग्रामात् दूरम्, ग्रामात् समीपम् – अधिकशब्दयोगेऽपि पञ्चमी - परार्धात् अधिकाः हरेः गुणाः –

(e) **उपपदषष्ठी**

- दूरान्तिकार्थकयोगे षष्ठी अपि भवति – ग्रामस्य दूरात् / दूरं / दूरेण इत्यादि – ग्रामस्य अन्तिकात्/ अन्तिकं/ अन्तिकेन इत्यादि –
- आशीरर्थकशब्दयोगेऽपि षष्ठी - देवदत्तस्य मद्रं/ भद्रं/ कुशलं/ सुखं/ शं भूयात्। स्वामी - ईश्वरः - अधिपतिः - दायादः - साक्षी - प्रतिभूः - प्रसूतः एतैः शब्दैः योगेऽपि षष्ठी भवति – गवां स्वामी , प्रजानाम् ईश्वर : इत्यादि – आयुक्तः, कुशलः इत्यनयोः योगेऽपि षष्ठी – हरिपूजनस्य आयुक्तः, हरिपूजनस्य कुशलः ।

(f) **उपपदसप्तमी**

स्वामी - ईश्वरः - अधिपतिः - दायादः -साक्षी - प्रतिभूः - प्रसूतः - आयुक्तः - कुशलः एतैर्योगे सप्तमी अपि - गोषु स्वामी इत्यादि, हरिपूजने आयुक्तः/कुशलः । (नियुक्त इत्यर्थः) साधुनिपुणशब्दयोः योगेऽपि सप्तमी आदरार्थे – मातरि साधुः निपुणो वा - मातरं प्रति आदरवानित्यर्थः। प्रत्यादियोगे तु द्वितीयैव - मातरं प्रति साधुः। प्रसित - उत्सुकशब्दयोगेऽपि सप्तमी - हरौ प्रसितः, हरौ उत्सुकः (उत्कण्ठित इत्यर्थः) स्वस्वामिभावसम्बन्धद्योतकाधिशब्दयोगेऽपि सप्तमी - अधि भुवि रामः, अधि रामे भूः - अत्र भूरामयोः स्वस्वामिभावसम्बन्धः प्रतीयते। अधिकार्थक - उप शब्दयोगे सप्तमी – उपपरार्धे हरे : गुणाः - हरे : गुणाः परार्धात् अधिकाः इत्यर्थः ।

इत्थं बहूनि उपपदानि तत्सम्बद्धाः विभक्तयश्च अत्र निरूपिताः। अत्र केषाञ्चित् उपपदानां प्रयोगे द्वित्रा अपि विभक्तयः भवन्ति। ते अत्र स्पष्टतायै पुनः प्रदर्श्यन्ते –

- पृथक्, विना, नाना - द्वितीया, तृतीया, पञ्चमी
- प्रसितः, उत्सुकः - तृतीया, सप्तमी
- आयुक्तः, कुशलः - षष्ठी, सप्तमी
- दूरान्तिकार्थाः - पञ्चमी, षष्ठी

एवमुपपदविभक्तिः निरूपिता।

2. **शेषविभक्तिः**
उपपदविभक्तिं विहाय द्वयोः पदार्थयोः सम्बन्धं बोधयितुं षष्ठीविभक्तिः भवति। इयमेव शेषविभक्तिः भवति। यथा - राज्ञः पुरुषः, देवदत्तस्य गुरुः, रामस्य पिता इत्याद्युदाहरणानि।

**अथ विशिष्टार्थे विभक्तिः** -

1. हेतुः
हेत्वर्थे हेतुवाचकात् सामान्यतः तृतीया भवति - यथा – दण्डेन घटः - घटं प्रति दण्डः हेतुः इत्यर्थः। अध्ययनेन वसति - अध्ययनं वासस्य हेतुः इत्यर्थः। अत्र वासस्य अध्ययनं फलमपि हेतुः भवति। ऋणम् - यदि ऋणं हेतुभूतं तदा पञ्चमी भवति। यथा - शतात् बद्धः - शतरूप्यकऋणहेतोः कारागारे बद्धः इत्यर्थः। गुणः - यत्र गुणः (स्त्रीवाचकं विना) क्रियायां हेतुभूतः तत्रापि पञ्चमी, तृतीया च भवतः। जाड्यात् बद्धः - जड्येन बद्धः। यदि गुणः स्त्रीलिङ्गशब्देन उच्यते तर्हि तृतीयैव – यथा - बुद्ध्या मुक्तः – हेतुवाचकेन सह हेतुशब्दः अपि प्रयुज्यते तर्हि षष्ठी तृतीया चतुर्थी च अन्नस्य निमित्तस्य, अन्नस्य निमित्तायेत्यादि – यदि च सर्वनाम्नां प्रयोगः तदा सर्वा अपि विभक्तयः प्रायः भवन्ति – कः हेतुः, किं निमित्तं, केन निमित्तेन, कस्मै निमित्ताय इत्यादि - निमित्तं कर्मसम्बन्धि चेत् - सप्तमी – चर्मणि द्वीपिनं हन्ति - चर्मणः हेतोः तदवयविनः गजस्य हननमित्यर्थः। अङ्गविकारे हेतुः अक्ष्णा काणः, पादेन खञ्जः अक्षिसम्बन्धकाणत्ववान् , पादसम्बन्धिखञ्जत्ववानित्यर्थः।चिह्नरूपं विशिष्य परिचायकम् – जटाभिः तापसः - जटारूपेण चिह्नेन तापसत्वेन ज्ञायमान इत्यर्थः।

2. तादर्थ्यम्

सः अर्थः प्रयोजनं यस्य सः तदर्थः। तदर्थस्य भावः तादर्थ्यम्। प्रयोजन-सम्बन्धः। इदं तादर्थ्यमपि द्विविधम्। द्वयोः क्रिययोः मध्ये प्रयोजनसम्बन्धः (क्रियासम्बन्धः)। द्वयोः द्रव्ययोः मध्ये प्रयोजनसम्बन्धः (द्रव्यसम्बन्धः)। उभयत्र तादर्थ्यचतुर्थी विभक्तिः भवति।

- **क्रिययोः (क्रियासम्बन्धः)** यथा - अध्ययनाय वसति = वासस्य प्रयोजनम् अध्ययनम् - अत्र प्रयोजनरूपक्रियावाचकात् चतुर्थी-विभक्तिः। भावकृदन्तमेवात्र प्रयोजनक्रियावाचकं भवति। अयं च तुमुन् प्रत्ययार्थः। एवं यागाय याति - यष्टुं यातीत्यर्थः।
- **द्रव्ययोः (द्रव्यसम्बन्धः)** यथा - पिता स्वपुत्राय कन्दुकं क्रीणाति - अत्र कन्दुकं पुत्रार्थमिति कन्दुकरूपं द्रव्यं यस्मै, तस्मात् अर्थात् प्रयोजनस्य उद्देश्यभूतात् चतुर्थी भवति। पूर्वविभागे प्रयोजनवाच-कात् चतुर्थी, द्वितीयविभागे प्रयोजनोद्देश्यात् चतुर्थी इति विवेकः।
- **अत्यन्तसंयोगः** कालवाचकस्य मार्गपरिमाणवाचकस्य च क्रियया, द्रव्येण वा यत्र अत्यन्तसंयोगः विवक्षितः (फलप्राप्त्यविवक्षा) तदा कालमार्गपरिमाणवाचकात् द्वितीया भवति। यथा - मासम् अधीते - सम्पूर्णमासम् अधीते इत्यर्थः। क्रोशं कुटिला नदी - क्रोशपर्यन्तं नदी कुटिलैवेत्यर्थः। एवं क्रोशम् अधीते इत्यादि। तत्रैव कालमार्ग-योः क्रियायाः अत्यन्तसंयोगेन फलप्राप्तिरपि विवक्षिता तर्हि तृतीया भवति। यथा - मासेन अनुवाकोऽधीतः। मासं यावत् अध्यय-नेन अनुवाकः कण्ठस्थीकृतः इत्यर्थः। एवं क्रोशेन अनुवाकोऽधीतः इति। फलप्राप्तिः न विवक्षिता चेत् द्वितीयैव।
- **विभक्तम् (अपादानम्)** समानयोः द्वयोः मध्ये एकस्मिन् अतिश-यविवक्षया अन्यस्मात् भेदकथनम्, मानसिकः सम्बद्धयोः द्वयोः विभागः विभक्तम् इत्युच्यते। अतः अयम् अपादानभेदः अपि भवि-तुमर्हति। अस्मिन् सन्दर्भे यस्मात् अतिशयः, तस्मात् पञ्चमी भवति। यथा - माथुराः इति कश्चन देशः। पाटलिपुत्रकाः इति अन्यः देशः। एतावुभावपि आढ्यौ। ततश्च आढ्यतया समानौ। इदानीं तयोरे-कस्मिन् आढ्यातिशयविवक्षा यदि क्रियते, तर्हि यस्य अतिशयः न विवक्षितः तत्र पञ्चमी भवति। माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः। अत्र माथुरेषु अतिशयः विवक्षितः, अतः द्वितीयदेशवाचकात् पञ्चमी भवति। आङ्ग्लभाषायामस्यैव Degree of Comparision इति

व्यवहारः ।

- **निर्धारणम्** यत्र च एकस्मात् समुदायात् जातिं, गुणं, क्रियां वा निमित्तीकृत्य कस्यचिदेकस्य अतिशयितत्वेन पृथक्करणं भवति, तत् निर्धारणमित्युच्यते। अत्र समुदायवाचकात् यस्मात् पृथक्करणं तद्वाचकात् षष्ठी, सप्तमी च भवतः। एते एव निर्धारणविभक्ती इत्युच्येते। यथा - नृणां नृषु वा ज्ञानी श्रेष्ठः - अत्र नरसमुदायात् ज्ञानेन गुणेन कस्यचिदतिशयः बोध्यते, सामान्यनृभ्यः भेदः प्रदर्श्यते। इदमेव पृथक्करणं, पार्थक्येन कस्यचित् प्रदर्शनं निर्धारणं भवति।

3. **अशिष्टव्यवहारः**

अशिष्टव्यवहारे यत्सम्प्रदानं तत्र दानक्रियायाम् अशिष्टतां बोधयितुं चतुर्थीस्थाने तृतीया भवति। अनया तृतीयया दानस्य अशिष्टता बोध्यते। सम्प्रदानविभागेऽपि अयमन्तर्भावयितुं शक्यः अशिष्टसम्प्रदानमिति। यथा - दास्या संयच्छते कामुकः । अत्र दास्यै यद्धनदानं तदशिष्टव्यवहारार्थमिति सूचयितुं दासीशब्दात तृतीया, यमधातोः आत्मनेपदं च भवति। यदि च दास्यै सेवायाः कृते यदि वेतनं ददाति, तदा तु व्यवहारः शिष्ट एवेति, तस्मिन् सन्दर्भे 'दास्यै संयच्छति वेतनं यजमानः' इति चतुर्थी एव भवति।

4. **प्रातिपदिकार्थः**

दूरसमीपवाचकेभ्यः शब्देभ्यः दूरं समीपम् इति केवलप्रातिपदिकार्थे द्वितीया, तृतीया, पञ्चमी च भवन्ति। ग्रामस्य दूरम् / दूरेण / दूरात्। ग्रामस्य अन्तिकम्। अन्तिकेन / अन्तिकात। प्रकृत्यादिगणपठितेभ्यः शब्देभ्यः प्रातिपदिकार्थे तृतीया भवति। यथा - प्रकृत्या चारुः - 'प्रकृतिरेव चारु' इत्यर्थः। अत्र प्रकृत्यादिप्रातिपदिकार्थः चारुशब्दार्थ एकदेशचारुत्वे अभेदेन विशेषणम् भवति। प्रकृत्यभिन्नचारुत्ववान् इत्यर्थः। नाम्ना गोविन्दः, गोत्रेण गार्ग्यः, सुखेन याति इत्यादि।

5. **भावलक्षणम्**

यत्र ज्ञातकाला क्रिया अज्ञातकालायाः क्रियायाः सूचिका भवति, अर्थात् ज्ञातकालक्रियाकालेन अज्ञातकालक्रियायाः कालः लक्ष्यते तत्र भावलक्षणमिति व्यवहारः। यथा - गोदोहनं - प्रातः सायं च निर्धारिते समये एव भवति, तस्याः क्रियायाः कालः निश्चितः भवति, सर्वैः ज्ञातापि भवति। तादृशक्रियया, कस्यचिद्व्यक्तिविशेषस्य गमनादिक्रियायाः कालः यदा

बोध्यते, तदा ज्ञातकालक्रियावाचकात् सप्तमी भवति। इयमेव सप्तमी भावलक्षणसप्तमी इति सतिसप्तमी इति च उच्यते। अत्र च ज्ञातकालक्रिया क्तान्तेन शतृशानजन्तेन च बोध्यत इति तस्मात् सप्तमी भवति, तद्विशेष्यादपि सप्तमी भवति। यथा - देवदत्तः कदा गतः ? इति प्रश्ने उत्तरम् –

- गोषु दुह्यमानासु गतः - (गोदोहनकालसमानकालिकं देवदत्तकर्तृत्वं भूतकालिकं गमनम्) इति।
- गोषु दुग्धासु गतः - (गोदोहनकालोत्तरकालिकं देवदत्तकर्तृकं भूतकालिकं गमनम्) इति।
- गोषु धोक्ष्यमाणासु गतः - (गोदोहनकालाव्यवहितपूर्वकालिकं देवदत्तकर्तृकं भूतकालिकं गमनम्) इति।

त्रिधापि भवितुमर्हति। एवमनादरे द्योत्ये भावलक्षणे षष्ठी अपि भवति। यथा - रुदति रुदतो वा पुत्रे प्राव्राजीत् - कश्चन रुदन्तं पुत्रमपि अनादृत्य सन्यासं स्वीकृतवानित्यर्थः। अत्रापि रोदनकालः ज्ञातः अज्ञातकालप्रव्रजनक्रियायाः कालं सूचयति, अनादरेण सह इति भावलक्षणं भवति, अनादरश्च सन्दर्भः। अतोऽत्र षष्ठीसप्तम्यौ भवतः।

6. **क्रियाविशेषणम्**
   क्रियाविशेषणं बोधयितुं द्वितीयाविभक्तिः भवति। क्रियाविशेषणानां कर्मत्वमिति अभियुक्तोक्तिः। तस्य नपुंसके, एकवचने एव प्रयोगः। स्तोकं पचति, मृदु पचति, मन्दं गच्छति इत्यादि। इत्थं सुब्विभक्त्यर्थः प्रायः सर्वोऽपि विवेचितः। विस्तरस्तु सिद्धान्तकौमुद्यादिग्रन्थेभ्यः अवगन्तव्यः।

### शब्दसंकेत

1. अष्टा. - अष्टाध्यायी
2. वा.प. - वाक्यपदीयम्

### सन्दर्भग्रन्थसूची

1. Vakyapadiya A treatise on the philosophy of Sanskrit Grammar by Bhrtrihari with Commentary of Punyaraja, edited by the pandits of the benaras sanskrit college, Benaras Printing Press, 1887

2. पाणिनिविरचिता अष्टाध्यायी, परिष्कर्ता श्रीगोपालदत्तशास्त्री, श्रीगोपालदत्तपाण्डेयः (सम्पा.), चौखम्बा सुरभारती प्रकाशन ग्रन्थमाला, २०१७

3. बृहदारण्यकोपनिषत्, महादेव चिमणजी आप्टे (सम्पा.), आनन्दाश्रमुद्रणालय, १८९१

4. वाक्यपदीयम्, भर्तृहरि, रघुनाथशर्मप्रणीत-अम्बाकर्त्रीव्याख्यासहितम्, वाराणसेयसंस्कृतविश्वविद्यालय, वाराणसी, १९६३

5. श्रीमन्महर्षिपतञ्जलिविनिर्मितं पाणिनीयव्याकरणमहाभाष्यम्, श्रीमन्नागेशभट्टविरचित भाष्यप्रदीपोद्योतोद्भासितेन, 1-6 खण्डः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९८७

✿✿✿

# ‘ङिच्च’ इति सूत्रविमर्शः

विष्णुकान्तपाण्डेयः

परापरज्ञानां विदितवेदितव्यानामधिगतयाथातथ्यानां सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसंकायाध्यक्षचराणां व्याकरणविभागाध्यक्ष-चराणां लब्धसम्मानिताध्यापकपदानां लब्धप्रतिष्ठानां साक्षात् पाणिनि-स्वरूपाणां मत्प्रियाचार्याणां श्रीमदाचार्यरामप्रसादत्रिपाठि गुरूणां सिद्धान्तचिन्तामणि-नामाभिधेयो ग्रन्थो वर्तते। ततो ‘ङिच्च[1]’ इति सूत्रमाधारीकृत्य कश्चन विचारो मया प्रस्तूयते।

वैयाकरणसिद्धान्तकौमुद्यां परिभाषाप्रकरणे सूत्रमिदमागतम्। ङ्कार इत् यस्य स ङित्। ‘अलोऽन्त्यस्य[2]’ इत्यनुवर्तते। ङिदादेशोऽन्त्यस्यालः स्थाने[3] स्यादिति सूत्रार्थः। अवङ्, आनङ्, अनङ् इत्यादिरादेश उदाहरणम्। अवङ् = गवाग्रम् – अत्र, ‘गो + अग्रम्’ इत्यवस्थायां ‘ङिच्च’ इति सूत्रसहकारेण ‘अवङ् स्फोटायनस्य[4]’ इति सूत्रेण विहितोऽवङादेशोऽन्त्यस्य ओकारस्य स्थाने भवति।

आनङ् = होतापोतारौ, होतृ + पोतारौ - इत्यवस्थायां ‘ङिच्च’ इति प्रकृत-सूत्रसहकारेण ‘आनङ् ऋतो द्वन्द्वे[5]’ इति सूत्रेण विहित ‘आनङ्’ इत्यादेशोऽन्त्यस्य ऋकारस्य स्थाने भवति।

अनङ् = सखा - सखि + स् इत्यवस्थायां ‘ङिच्च’ इति प्रकृतसूत्रसहकारेण ‘अनङ् सौ[6]’ इति सूत्रेण विहितोऽनङादेशोऽन्त्यस्य इकारस्य स्थाने भवति।

ननु ‘अलोऽन्त्यस्य[7]' इति सूत्रेणापि आदेशः अन्त्यस्यालः स्थाने भवति। तेनैव सिद्धे ङिच्चेति सूत्रं किमर्थमिति जिज्ञासायामाह मूले ‘सर्वस्य’ इत्यस्यापवादः। ‘अनेकाल्शित्सर्वस्य’ इति सूत्रस्य विधिरयमपवादः। अपोद्यते = बाध्यते अनेनेति अपवादः। बाहुलकात्करणे घञ्। अपवादस्य स्वरूपं हि येन नाप्राप्ते यो विधि-रारभ्यते स तस्यापवादः[8]। ‘अप्राप्त’ इति भावोक्तः। येनेति कर्तरि तृतीया। ‘नाप्राप्ते’ इत्यत्र द्वौ नञौ प्रकृतेर्दाढर्यबोधनाय। एवं यत्कर्तृकावश्यकप्राप्तौ सत्यां

---

1 अष्टा., १/५१/५३
2 अष्टा., १/१/५२
3 सिद्धान्तचिन्तामणिग्रन्थे प्रकृतसूत्रे
4 अष्टा., ६/१/१२१
5 अष्टा., ६/३/२५
6 अष्टा., ७/१/९३
7 अष्टा., १/१/५२
8 परिभाषेन्दुशेखरे परिभाषा सं.

यो विधिरारभ्यते, स आरभ्यमाणविधिस्तस्य अवश्यप्राप्तस्य विधेरपवादो बाधक इति परिभाषार्थः। सर्वे अवङादयो ङिदादेशा अनेकाल एव वर्तन्ते। विशेषविहितत्वेन निरवकाशत्वेन च 'ङिच्च' इति सूत्रेण सर्वादेशत्वं बाध्यते। विशेषशास्त्रस्य प्राबल्यं भट्टवार्तिकेऽपि उक्तम्। तथा हि –

अवश्यमेव सामान्यं विशेषं प्रति गच्छति।[9]
गतमात्रं च तत्तेन विशेषे स्थाप्यते ध्रुवम्॥

तथा च यदि ङिच्चेति शास्त्रम् अनेकाल्विशेषेषु ङित्सु न प्रवर्तेत, तर्हि तदनर्थकमेव स्यात्। अनेकाल्शित्सर्वस्य इत्यस्य तु ङित्सु अप्रवृत्तौ सत्यामपि आनर्थक्यं नास्ति, 'अस्तेर्भूः[10]' इत्यादिष्वनेकाल्षु अङित्सु तस्य सावकाशत्वात्। इत्थं विशेषशास्त्रं प्रबलमिति सिद्धान्तः।

तातङो ङित्त्वेऽपि तन्ङित्करणस्य सावकाशत्वाद् गुणवृद्धिप्रतिषेधार्थत्वात् सर्वादेशस्तातङ् भवति। जीवताद्भवान्। जीवतात् त्वम्। अत्र जीव + तु , जीव + हि इत्यवस्थायां 'तुह्योस्तातङाशिष्यन्तरस्याम्[11]'। इति सूत्रेण विहितस्तातङादेशः सम्पूर्णस्य 'तु' इत्यस्य 'हि' इत्यस्य च स्थाने भवति। उक्तं हि प्रकृतसूत्रभाष्ये - 'तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेश[12]' इति।

इदानीं सिद्धान्तचिन्तामणिग्रन्थदृशा प्रकृतसूत्रविषयकः कश्चन विचार प्रस्तूयते। सिद्धान्तचिन्तामणिग्रन्थे नियम्यनियामकभाव उत्सर्गापवादभावश्च विचारितोऽस्ति। यद्यपि नियमो वर्तते यत् नियामकशास्त्रातिरिक्तत्वेन नियम्यशास्त्रे संकोचः कर्तव्यस्तथाप्यनियमो यतो हि नियामकशास्त्रस्य त्रीणि रूपाणि, नियम्यशास्त्रस्य च त्रीणि रूपाणि उपस्थितानि भवन्ति।

**नियामकशास्त्रस्य त्रीणि रूपाणि** -

1. नियामकशास्त्रीयोद्देश्यतावच्छेदकम्।[13]
2. नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकम्।
3. नियामकशास्त्रीयोद्देश्यतावच्छेदकव्याप्यम्।

---

9 भट्टवार्तिक

10 अष्टा., २/४/५२

11 अष्टा., ७/१/३५

12 ङिच्च इति सूत्रे महाभाष्ये भगवता पतञ्जलिनोक्तम्

13 लघुशब्देन्दुशेखरे कृत्तद्धितसमासाश्च इति सूत्रस्य व्याख्यावसरे वरवर्णिनीत्यादिटीकासु उक्त रूपाणि वर्णितानि

**नियम्यशास्त्रस्य त्रीणि रूपाणि** -

1. नियम्यशास्त्रीयोद्देश्यतावच्छेदकम्।
2. नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकम्।
3. नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यम्।

नियामकशास्त्रस्य कं रूपमादाय नियम्यशास्त्रस्य कस्मिन् रूपे संकोचः कर्तव्य इत्येवं नियमोऽत्र वर्तते।

**अत्रायं सिद्धान्तः** - नियामकशास्त्रीयोद्देश्यतावच्छेदव्यापकं नियम्यशास्त्रीयोद्देश्यतावच्छेकव्याप्यं यद् रूपं तद् रूपावच्छिन्नातिरिक्तत्वेन नियम्यशास्त्रे संकोचः कर्तव्य इति नियामकशास्त्रस्य विधिमुखेन प्रवृत्तिरित्येकः पक्षः।

नियम्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं नियामकशास्त्रीयोद्देश्यतावच्छेदकव्यापकं यद् रूपं तद् रूपावच्छिन्ने नियामकशास्त्रातिरिक्तत्वेन संकोचः कर्तव्य इति नियामकशास्त्रस्य निषेधमुखेन प्रवृत्तिरिति द्वितीयः पक्षः।

विधिमुखेन प्रवृत्तौ लाघवमिति कृत्वा गुरूभिः सिद्धान्तचिन्तामणिग्रन्थे विधिमुखेनैव प्रवृत्तिः कारिता। नियम्यनियामकसूत्रयोर्मध्यगामिस्वरूपं निष्कासितम्।

**'ङिच्च' इति सूत्रस्य मध्यगामिस्वरूपविमर्शः** - अत्र नियम्यशास्त्रम् अलोऽन्त्यस्येति सूत्रं, नियामकशास्त्रम् - 'ङिच्च' इति सूत्रम्। अत्र नियमाकारः कीदृशः सम्भवतीति जिज्ञासायामुच्यते नियमसूत्रं ङिच्चेति, तदीयोद्देश्यतावच्छेदकम् ङिदादेशत्वम्[14]। यतो हि ङिदादेशोऽन्त्यस्यालः स्थाने भवतु इति ङिदादेशमुद्दिश्य अन्त्यस्यालः स्थानित्वं विधीयते। तद् व्यापकं रूपम् अनेकालादेशत्वम् यत्र यत्र ङिदादेशत्वं तत्र तत्र अनेकालादेशत्वमिति साहचर्यनियमो व्याप्तिः।

**नियम्यसूत्रम्** – अलोऽन्त्यस्येति सूत्रम्। तदीयोद्देश्यतावच्छेदकम् – सामान्यत आदेशत्वम्, तद्व्याप्यं रूपम् अनेकालादेशत्वम्। एवं चानेकालादेशत्वावच्छिन्नातिरिक्तत्वेनादेशत्वत्वाल्त्वावच्छिन्ने संकोचे कृते सति अनेकालादेशः षष्ठ्यन्तपदबोध्यसमुदायघटकान्त्यालः स्थाने चेत्तर्हि ङिदात्मकोऽनेकालादेशः एव। तेन ङिद्भिन्ना अनेकालादेशा अन्त्यस्यालः स्थाने न भवन्ति अपितु सर्वस्य समुदायस्य स्थाने भवन्ति। यथा - अस्तेभूरित्यादि।

---

14 आचार्यरामप्रसादत्रिपाठिविरचितासिद्धान्तचिन्तामणिग्रन्थे

**शब्दसंकेतः**

1. अष्टा. - अष्टाध्यायी

**सन्दर्भग्रन्थसूची**

1. नागेशभट्टकृतः परिभाषेन्दुशेखरः, महामहोपाध्यायजयदेवमिश्रविरचितविजयाटीकापरिष्कृता, श्रीदुःखमोचनशर्मा (सम्पा.) दरभङ्गा, १९४२

2. पाणिनिविरचिता अष्टाध्यायी, परिष्कर्ता श्रीगोपालदत्तशास्त्री, श्रीगोपालदत्तपाण्डेयः (सम्पा.), चौखम्बा सुरभारती प्रकाशन ग्रन्थमाला, २०१७

3. लघुशब्देन्दुशेखरः, वैकुण्ठीहिन्दीटीकासमलङ्कृत, पं. वैकुण्ठनाथशास्त्री (व्याख्या.), चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९४

4. श्रीमद्भट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी, श्रीवासुदेवदीक्षितप्रणीतया बालमनोरमाख्यया व्याख्याया श्रीज्ञानेन्द्रसरस्वतीविरचितया तत्त्वबोधिन्याख्यया व्याख्यया च सनाथिता, म,म. गिरिधरशर्मा, म.म. परमेश्वरानन्दशर्मा (सम्पा.), चौखम्बा संस्कृत भवन, (द्वादशं संस्करणं), २०१४

5. श्रीमन्महर्षिपतञ्जलिविनिर्मितं पाणिनीयव्याकरणमहाभाष्यम्, श्रीमन्नागेशभट्टविरचित भाष्यप्रदीपोद्योतोद्भासितेन, 1-6 खण्डः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९८७

✿✿✿

# 'अभिधानचिन्तामणि' की कतिपय विशेषताएँ व्युत्पत्तिरत्नाकर टीका के आलोक में

दीपक कुमार, अपराजिता मिश्रा एवं ललित कुमार त्रिपाठी

## संस्कृत साहित्य में कोश-परम्परा

संस्कृत वाङ्मय में कोश लेखन की परम्परा अति प्राचीन है। वैदिक ऋषियों ने वैदिक साहित्य के साथ ही कोशों की रचना भी की थी। इन प्रारम्भिक कोशों के उपलब्ध उद्धरणों से यह स्पष्ट होता है कि व्याकरण तथा कोश का विषय समान था तथा दोनों ही शब्दशास्त्र के अंग के रूप में विकसित हुए। यास्क द्वारा लिखित 'निघण्टु' शब्द कोश की प्राचीन भारतीय परम्परा का प्रमाण है। निघण्टु में 1800 वैदिक शब्दों का संकलन है। निघण्टु के शब्दों की महर्षि यास्क कृत व्याख्या 'निरुक्त' के रूप में प्रकट हुई। यास्क कृत निरुक्त विश्व साहित्य का प्रथम शब्दार्थ कोश कहा जाता है। निघण्टु से आरम्भ कर अठारवीं शताब्दी तक संस्कृत में कोशों की रचना परम्परा देखी जा सकती है। कोशों की संख्या शतक को स्पर्श करती है। इनमें कुछ प्रमुख कोश निम्नवत हैं – अमरकृत- अमरकोश, शाश्वत कृत अनेकार्थसमुच्चय, हलायुध कृत अभिधानरत्नमाला, यादव प्रकाश कृत वैजयंतीकोश, हेमचन्द्र द्वारा रचित चार कोशग्रन्थ देशीनाममाला, अभिधानचिन्तामणि, लिंगानुशासन तथा अनेकार्थसंग्रह, महेश्वरकृत विश्वप्रकाश तथा शब्दभेद प्रकाश, अजयपाल कृत नानार्थसंग्रह, धनञ्जय कृत नाममाला, पुरुषोत्तमदेवकृत त्रिकांडकोष, एकाक्षरकोष तथा हारावली, मेदिनिनी कृत नानार्थशब्दकोश, वाचस्पतिकृत शब्दार्णवः, अभयपालकृत नानार्थरत्नमाला, भोजकृत नाममाला, कल्याणमल्ल कृत शब्दरत्नप्रदीप, महीपकृत शब्दरत्नाकर, भास्कर कृत नानार्थरत्नमाला, अप्पयदीक्षित कृत नामसंग्रहमाला, केशव रचित कल्पद्रुमकोश, विश्वनाथ कृत कोशकल्पतरु, क्षेमेन्द्र कृत लोकप्रकाश इत्यादि। इस प्रकार से अस्सी से भी अधिक कोश ग्रन्थ प्रकाशित तथा अप्रकाशित रूप में ज्ञात होते हैं।

## संस्कृत कोशों के टीका ग्रन्थ -

भारतीय ज्ञान परम्परा में मूल ग्रन्थों के भाष्य, टीका, टिप्पणी या व्याख्या की परम्परा निरन्तर रही है। मूल गन्थ के तथा ग्रन्थकार के आशय को सुस्पष्ट करने में इन ग्रन्थों का महत्त्वपूर्ण स्थान रहा है। शास्त्र परम्परा के विस्तार और विकास में भी इन टीकाओं की भूमिका रही है। टीका ग्रन्थों में नवीन व्याख्याएं, खण्डन-मण्डन तथा नव्य मार्ग की स्थापना भी प्रदर्शित की गई है। कोश ग्रन्थों पर भी अनेक टीका ग्रन्थ लिखे गए जो अत्यन्त महत्त्व के हैं। इनमें कोश ग्रन्थों

की स्वतन्त्र टीकाएँ तथा कोशग्रन्थकारों की स्वोपज्ञ टीकाएँ भी सम्मिलित हैं। इन टीकाओं ने नवीन शब्द, अर्थ तथा नूतन व्याख्याएँ हैं।

टीकाग्रन्थों की दृष्टि से अमरकोश की टीकाओं की प्रथम गणना की जाती है। इसके सर्वाधिक तथा प्राचीन टीका ग्रन्थ मिलते हैं। टीका ग्रन्थों के द्वारा पूर्ववर्ती कोशों तथा कोशकारों के विषय में भी सूचना मिलती है। हेमचन्द्र ने अपनी स्वोपज्ञ टीका में अमर, उत्पल, क्षीरस्वामी, चान्द्र, धनपाल, हलायुध, व्याडि, भोज, माघ, भाष्यकार, भागुरि, द्रमिल, भट्टतौत, भट्टि आदि अनेक टीका-कारों, कोशकारों तथा ग्रन्थकारों का उल्लेख किया है। इन टीकाओं में कोशगत शब्दों की व्युत्पत्तियाँ भी दी गई हैं। जैसे अमरकोश की रामाश्रमी टीका में प्रत्येक शब्द की व्याकरणसम्मत व्युत्पत्ति की गई है। आचार्य हेमचन्द्र ने अपने ग्रन्थ 'अभिधानचिन्तामणि' पर स्वयं 'यशोविजय' टीका लिखी, अभिधानचिन्तामणि की व्युत्पत्तिरत्नाकर देवसागरगणि कृत टीका है। अभिधानचिन्तामणि की 8 टीकाएँ प्राप्त होती हैं तथा अमरकोश की 40 से अधिक टीकाएँ प्राप्त होती हैं। इसी प्रकार अन्यकोश ग्रन्थों की भी टीकाएँ प्राप्त होती हैं। अतः इन टीकाओं को कोश वाङ्मय का पूरक एवं अनिवार्य अंग कहा जा सकता है।

### संस्कृत कोशों के प्रकार -

संस्कृत वाङ्मय के विशाल कोश साहित्य का विश्लेषण करने पर इन्हें रचना पद्धति की दृष्टि से तीन भागों में विभाजित किया जाता है -

1. समानार्थ कोश - इनमें पर्यायवाची शब्दों का संकलन होता है।
2. अनेकार्थ कोश - प्रत्येक शब्द के भिन्न भिन्न अर्थों का प्रतिपादन इन कोशों में होता है।
3. उभयार्थककोश - कुछ ऐसे कोश भी हैं जिनमें शब्द के पर्याय के साथ ही उसके भिन्न भिन्न अर्थों का भी निर्देश होता है।

इसके साथ ही कोशों में संकलित शब्दों की प्रकृति के अनुसार भी कोशों के तीन भेद किए जा सकते है - वैदिक शब्द कोश, लौकिक शब्दाख्यान कोश तथा उभयात्मक कोश वैदिक संहिताओं से संकलित शब्दों का सुव्यवस्थित संग्रह निघण्टु कोशों में मिलता है। इनमें प्रायः दुर्बोध्य और विवेच्य शब्द ही संगृहीत थे। उपलब्ध निघण्टु को भी यास्क कृत माना जाता है इस पर यास्क कृत निर्वचन निरुक्त है। वैदिक निघण्टु कोशों में नाम, आख्यात, उपसर्ग तथा निपात इन चार प्रकार के शब्दों का संग्रह होता था।

लौकिक संस्कृत शब्दकोश परम्परा में साहित्य एवं व्यवहारोपयोगी शब्दों का संकलन होता था। प्रारम्भ में इन कोशों में दो प्रकार की विधा का प्रयोग मिलता है। कुछ कोशों में शब्दों के स्वीकृत लिंग का उल्लेख होता था, कुछ में पर्याय तथा अनेकार्थ का निर्देश होता था। यह दोनों ही नामतन्त्र और लिंगतन्त्र पद्धतियाँ 'अमरकोश' की रचना के साथ संयुक्त रूप से प्रयुक्त होने लगीं। अमरकोश के पश्चाद्वर्ती कोशकारों में कुछ ने तो अमरकोश की पद्धति का अनुसरण करते हुए शब्दों के पर्यायवाची, नानार्थ तथा लिंग का निर्देश करने की प्रक्रिया का अनुगमन किया परन्तु कुछ कोश पर्यायवाची कोश ही रहे। अभिधानचिन्तामणि तथा कल्पद्रुम मात्र पर्यायवाची शब्दों के कोश ही हैं, तो कुछ कोश पर्यायवाची न देकर शब्दों के नानार्थों का ही उल्लेख करते हैं यथा- विश्वप्रकाश, नानार्थार्णवसंक्षेप तथा मेदिनी आदि। संस्कृत कोश प्रायः पद्यात्मक शैली में लिखे गए। इस प्रकार वैदिक शब्द संग्रह से आरम्भ होकर पर्यायवाची शब्द इसके बाद नानार्थक या अनेकार्थक शब्द तथा इसके साथ ही लिंगनिर्देश की यात्रा कोश साहित्य ने की। नानार्थ कोश में शब्दों को अन्त्यव्यंजनाक्षर क्रमयोजना के आधार पर निर्मित किया गया परन्तु कुछ कोशों में आदिवर्ण के आधार पर वर्णमालानुसारी शब्द क्रम योजना अपनायी गयी।

**अभिधानचिन्तामणि कोश -**

बारहवीं शती में गुजरात के लब्धप्रतिष्ठ विद्वान् आचार्य हेमचन्द्र सूरिकृत 'अभिधानचिन्तामणि' कोश परम्परा का महत्त्वपूर्ण ग्रन्थ है। आचार्य हेमचन्द्र कृत चार कोशग्रन्थ उपलब्ध हैं - अभिधानचिन्तामणि, अनेकार्थसंग्रह, निघण्टु और देशीनाममाला। अभिधानचिन्तामणि पर्यायवाची शब्दों का संकलन प्रस्तुत करता है। इसमें पद्यात्मक शैली में छः काण्डों में समानार्थक शब्द निर्दिष्ट हैं। इसमें 1541 श्लोक हैं, काण्डों के अनुसार निर्दिष्ट विषय निम्नवत् हैं -

**प्रथम देवाधिदेव काण्ड -**

देवाधिदेव नामक प्रथम काण्ड में 86 पद्य हैं। हेमचन्द्र ने आरम्भ में ही प्रतिज्ञा की है कि वह इस कोश में रूढ, यौगिक और मिश्र शब्दों के पर्यायवाची शब्दों का निर्देश कर रहे हैं -

व्युत्पत्तिरहिताः शब्दा रूढा आखण्डलादयः।<br>
योगोऽन्वयः स तु गुणक्रियासम्बन्धसम्भवः॥<br>
गुणतो नीलकण्ठाद्याः क्रियातः स्रष्टृसन्निभाः।

स्वस्वामित्वादिसम्बन्धस्तत्राहुर्नाम तद्वताम् ॥[1]

प्रकृति प्रत्यय विभाग से रहित शब्द ही व्युत्पत्ति रहित कहलाते हैं। हेमचन्द्र ने रूढ शब्दों का संग्रह किया है तथा उसका उदाहरण दिया है यथा - आखण्डल आदि। हेमचन्द्र द्वारा यौगिक शब्दों का संग्रह करने की भी घोषणा की गई। गुण, क्रिया तथा अन्य सम्बन्धों के कारण शब्दों के अर्थावबोध में परस्पर अन्वय या योग से यौगिक शब्दों का निर्देश होता है। जैसे नीलकण्ठ, शितिकण्ठ, स्रष्टा, धाता, भूपाल, शैव आदि। हेमचन्द्र ने विभिन्न सम्बन्धों के आधार पर निष्पन्न शब्दों को भी कोश में स्थान दिया है।

**प्रथम काण्ड -**

इसमें 24 जैन तीर्थङ्कर के नामों के साथ उनसे सम्बद्ध अन्य शब्द भी संगृहीत हैं।

**द्वितीय देवकाण्ड -**

इस काण्ड में 250 पद्यों में देवताओं के नाम, उनके नगर, पुर तथा उनसे सम्बद्ध वस्तुओं का संकलन है।

**तृतीय मर्त्यकाण्ड -**

इस काण्ड में मानव तथा मानव व्यवहार में उपयोगी पदार्थों के वाचक शब्दों का संग्रह है। इसमें 597 श्लोक हैं तथा यह सभी काण्डों से अधिक विस्तृत है।

**चतुर्थ तिर्यककाण्ड -**

इस काण्ड में पशु, पक्षी, विविध जन्तु खनिज, वनस्पति आदि के नाम हैं। इसमें 423 पद्य हैं।

**पञ्चम नारककाण्ड -**

इसमें सात श्लोकों में नरकवासी मनुष्यों का वर्णन है। यह सबसे छोटा काण्ड है।

**षष्ठ सामान्यकाण्ड -**

इस काण्ड में 178 पद्यों में अनेक सामान्य पदार्थों के नामों का संकलन है।

यह कोश अनेक दृष्टियों से महत्वपूर्ण है। शब्दों के पर्याय संकलन के साथ

---

1 अभि.चि.,1/23

ही इस कोश का इतिहास, तथा भाषा विज्ञान के अध्ययन की दृष्टि से भी महत्व है। इस कोश में न केवल प्रभूत संख्या में शब्दों का संकलन किया गया है अपितु समाज में प्रयुक्त हो रहे नवनिर्मित शब्दों के संग्रह का प्रयास भी इसमें दिखाई पड़ता है। कोश वाङ्मय की दृष्टि से भाषा में नए बन रहे शब्दों को कोश में स्थान देना आवश्यक होता है। इससे प्राचीन शब्दों का रक्षण तथा नूतन का पोषण होता है। हेमचन्द्र ने गुप्तकाल में प्रयुक्त नवनिर्मित संज्ञाओं को भी संकलित किया यथा- भुक्ति (प्रान्त), युक्त (जिले का सर्वोच्च अधिकारी), विषयपति (जिलाधीश), शौल्किक (चुङ्गी विभाग का अध्यक्ष), गौल्मिक, बलाधिकृत (सेनाध्यक्ष) आदि।

इतिहास की दृष्टि से हेमचन्द्र ने इस ग्रन्थ तथा इसकी 'स्वोपज्ञवृत्ति' में अपने पूर्व के 56 ग्रन्थकारों तथा 31 ग्रन्थों को उद्धृत किया है। इन्होंने अनेक कोशकारों के मतों का खण्डन-मण्डन भी शब्द पर्याय के प्रसंग में किया है जिससे इन ग्रन्थकारों के मतों के विषय में भी प्रामाणिक सूचनाएँ प्राप्त होती हैं। जैसे - बोलने में असमर्थ (गूँगे) व्यक्ति के लिए इन्होंने 'मूक' और 'अवाक्' दो पर्यायवाची दिए हैं तथा 'शेषश्च' से जड़ तथा कड पर्यायवाची भी माने हैं। इस प्रसंग में अन्य कोशकारों के मत का उल्लेख करते हैं। यथा 'कलमूकस्त्ववाक्श्रुतिः' इति हलायुधः। अनेडोऽपि अवर्करोऽपि मूकः अनेडमूकः, अन्धो ह्यनेडमूकः स्यात् इति हलायुधः 'अनेडमूकस्तु जडः'। इति वैजयन्ती, 'शठो ह्यनेडमूकः' स्यात् इति भागुरिः।[2]

इस प्रकार यह सूचना मिलती है कि हलायुध ने 'अनेडमूक' अन्धे के लिए प्रयोग किया है जबकि वैजयन्ती कोश 'जड' को तथा भागुरि 'शठ' को अनेडमूक कहते हैं। हेमचन्द्र ने 'अनेडमूक' गूँगे-बहरे व्यक्ति के लिए प्रयुक्त किया है। इन्होंने एडमूक, अनेडमूक तथा अवाकश्रुति ये तीनों पर्याय गूँगे-बहरे के लिए प्रयुक्त किया है। इसी प्रकार अनेक स्थलों पर यह अन्य कोशकारों का उल्लेख करते हैं। विलुप्त कोशग्रन्थों में भागुरिकृत कोश का तथा व्याडि कृत कोश का नाम आता है। अमरकोश की टीका 'सर्वस्व' के साथ ही हेमचन्द्र ने भी भागुरि के उद्धरण अपने ग्रन्थ में दिए हैं। इसी प्रकार व्याडिकृत कोश के उद्धरण भी अभिधानचिन्तामणि में प्राप्त होते हैं।

आचार्य हेमचन्द्र ने विभिन्न पर्यायवाची शब्दों के योग से अनेक नए शब्द भी बनाए हैं। इसके साथ ही इन्होंने प्राकृत अपभ्रंश एवं अन्य देशी भाषाओं के शब्दों का ग्रहण भी कोश में किया है, उदाहरण स्वरूप चोटी[3], समौकन्दुकगेन्दुकौ[4],

---

2 अभि.चि.,काण्ड -3, श्लोक -12 की स्वोपज्ञयवृत्ति

3 अभि.चि., 3/339

4 अभि.चि.,3/353

पोलिका[5], मोदको लड्डुकश्च[6], तरवारि[7], चालनी तितउ[8], पेटा स्यात्मञ्जूषा[9] आदि। नवीन शब्दों का उल्लेख करते समय इन्होंने यह ध्यान रखा है कि वह शब्द कविसम्प्रदाय द्वारा प्रयुक्त हो।

आचार्य हेमचन्द्र ने अनेक स्थलों पर शब्द के पर्याय रूप में ऐसे शब्दों का संकलन किया है। जो अन्य कोशों में नहीं मिलते। जैसे 'सुन्दर' शब्द के बारह पर्यायवाची अमरकोशकार ने दिये हैं जब की हेमचन्द्र ने उनकी संख्या दोगुनी से भी अधिक (26) कर दी है। शब्दों की हेमचन्द्र कृत व्युत्पत्तियों तथा स्वोपज्ञ वृत्ति से शब्दों में क्रमिक अर्थविकास और अर्थपरिवर्तन को भी जाना जा सकता है। इस प्रकार अभिधानचिन्तामणि एक महत्त्वपूर्णकोश है।

### अभिधानचिन्तामणि की टीकाएँ -

अभिधानचिन्तामणि की आठ टीकाएँ अभी तक प्रकाशित अप्रकाशित रूप में ज्ञात हुई हैं। इनमें स्वयं आचार्य हेमचन्द्र कृत स्वोपज्ञवृत्ति प्रथम है। मुनिकुशलसागर कृत अभिधानचिन्तामणि टीका, श्रीवल्लभगणिकृत (1667) सारोद्धार, मुनिदेवसागरगणि (1686) कृत व्युत्पत्तिरत्नाकर, अवचूरि (अज्ञातकृत), वासुदेवरावजनार्दन कृत 'रत्नप्रभा', बीजक (अज्ञातकर्तृक) तथा प्रतीकावली (अज्ञातकर्तृक) टीका अभिधानचिन्तामणि की प्राप्त होती हैं।

### अभिधानचिन्तामणि की टीकाओं में व्युत्पत्तिरत्नाकर -

मुनिदेवसागरगणि कृत 'व्युत्पत्तिरत्नाकर' अभिधानचिन्तामणि' की वृहत् टीका है। इसमें अभिधानचिन्तामणि में संगृहीत पदों की व्युत्पत्तिपरक व्याख्या की गयी है। यह टीका हस्तलेख रूप में प्रयाग स्थित केन्द्रीय संस्कृत विश्वविद्यालय गंगानाथ झा परिसर के हस्तलेख संग्रहालय में संरक्षित है। इसकी अधिगम संख्या 39 है। इस हस्तलेख की एक अन्य प्रति भण्डारकर ओरिएण्टल रिसर्च इन्स्टीट्यूट, पूना में संरक्षित है। यह हस्तलेख इन दो हस्तप्रतियों के आधार पर इस परिसर के शोधकार्य के रूप में स्वीकृत है।

'व्युत्पत्तिरत्नाकर' में अभिधानचिन्तामणि में संकलित शब्दों की प्रकृति प्रत्यय सहित सूत्रोल्लेखपूर्वक व्याख्या की गई है। अभिधानचिन्तामणि 1541 पद्य

5 अभि.चि.,3/62
6 अभि.चि.,3/64
7 अभि.चि.,3/446
8 अभि.चि.,4/84
9 अभि.चि.,4/81

में निबद्ध है अतः इस टीका का कलेवर भी विशालकाय है। इसका हस्तलेख आठ सौ (800) पृष्ठों पर लिखित है जो इस टीका की विशालता तथा इसकी लेखन की श्रमसाध्यता का प्रत्यक्ष प्रमाण है।

व्युत्पत्तिरत्नाकर में कई शब्दों की अनेक व्युत्पत्तियाँ भी दी गई हैं जैसे- 'शंभु'[10] शब्द (1) शं कल्याणरूपतां भवते प्राप्नोति शंभुः भूङ् प्राप्तौ आत्मनेपदी 'आधृषात् वा' इति न णिच् मितद्रु - आदित्वात् डुः, (2) शं शाश्वतसुखं तत्र भवतीति वा, भू सत्तायां मितड्वादिः शमयति क्लेशमिति वा (3) शमु उपशमे हेतुमण्णिजन्तः शमेर्भुन्निति सुन्त्वा शं सुखं भवत्यस्मादिति व्युत्पत्तिस्वपादाने डुप्रत्ययभावाच्चिन्त्येति माधवः।

इसी प्रकार स्वर्ग[11] शब्द की व्युत्पत्ति भी तीन प्रकार से की गई है -

1. ऋज्यते स्थीयतेऽस्मिन्निति अर्गः स्थानं ऋजगतिस्थानार्जनेषु 'हलश्च 3.3.121' इति घञ् 'चजोः कुघिण्यतोः 7.3.52' इति कुत्वं गकारः
2. शोभनो अर्गाः 'स्वर्गाः इति प्रादि समासः यद्वा स्वर्य्यते सुखहेतुतया कथ्यते इति स्वर्गाः स्वृशब्दोपतापयोः गन् गम्यादेः इति गन्प्रत्ययः।
3. यद्वा सुः सुकृतं तेन ऋज्यते प्राप्यते स्वर्गः कर्म्मणि घञ्

इस प्रकार कही कहीं यह टीका अमरकोश की रामाश्रमी टीका का भी अतिक्रमण करती दिखाई पड़ती है। यथा 'स्वर्ग' पद की दो व्युत्पत्ति ही 'रामाश्रमी' टीका में प्राप्त होती है। न केवल अन्य टीकाओं का अतिक्रमण यह टीका शब्दपर्याय व्युत्पत्ति की दृष्टि से करती है अपितु कहीं कहीं यह स्वयं अभिधानचिन्तामणि के शब्दपर्यायों में स्वयं सप्रमाण अतिरिक्त पर्यायवाची शब्दों को योजित भी करती है। उदाहरणार्थ 'देव' पद के पर्यायवाची शब्दों के प्रसंग में हेमचन्द्र ने 'दिवौकस' पद का ग्रहण नहीं किया है। परन्तु व्युत्पत्तिरत्नाकर में इसकी व्युत्पत्ति देते हुए इसे उल्लिखित किया गया है। व्युत्पत्तिरत्नाकरकार के अनुसार 'अत्रानुक्तमपि दिवौकस इति नाम व्युत्पाद्यते"। इसके साथ ही देवों के अन्य नामों का उल्लेख भी टीकाकार करते हैं जिनका उल्लेख हेमचन्द्र नहीं करते।[12]

इस टीका का एक वैशिष्ट्य यह भी है कि जिस प्रकार अनेक देशज शब्दों को हेमचन्द्र ग्रहण करते हैं उसी प्रकार व्युत्पत्तिरत्नाकरकार भी अर्थावबोध हेतु लोकभाषा के शब्दों का प्रयोग करते हैं। उदाहरणार्थ 'आतपः' मरीचिका, पादमूलम्

10 अभि.चि., प्रथम देवाधिकाण्ड,
11 अभि.चि., द्वितीय काण्ड
12 अभि.चि., काण्ड -2, श्लोक -2 की टीका

, स्नायुः इत्यादि पदों की व्याख्या में क्रमशः उजुआलु , झांझू[13] पगतली, तथा नस आदि लोकभाषा के शब्दों का प्रयोग क्रमशः तथा इसी प्रकार के बहुसंख्यक अन्य प्रयोग। इसके साथ ही व्युत्पत्तिरत्नाकर टीका में न केवल शब्दों की व्युत्पत्ति की गई है अपितु इसमें अन्य काव्य, स्मृति, पुराण आदि साहित्य के साथ ही अनेक पूर्ववर्ती कोशकारों के उद्धरण भी प्राप्त होते हैं। इन उद्धरणों से अनेक लुप्त ग्रन्थों के उद्धरण तथा कोशकारों के मत भी ज्ञात होते हैं। शब्दों के अर्थ को स्पष्ट करने के लिए उनसे सम्बद्ध जनश्रुतियों का भी उल्लेख है जैसे 'कान्यकुब्ज' पद को स्पष्ट करते हैं - कन्या कुब्जाऽत्रेति कान्यकुब्जं, तत्र जमदग्निना शापेन नृपतेः कन्या कुब्जीकृतेति प्रसिद्धिः ।[14]

अभिधानचिन्तामणि में आचार्य हेमचन्द्र में कुछ ऐसे शब्दों का भी संग्रह किया है जिनका अन्यत्र मिलना दुर्लभ है। व्युत्पत्तिरत्नाकर ने इन सभी शब्दों की व्युत्पत्तियाँ देते हुए तथा कहीं कहीं उनके पर्यायवाची देशज शब्द भी देते हुए उन्हें स्पष्ट किया है इसके कुछ उदाहरण देखे जा सकते हैं -

अस्पष्ट या अपूर्ण उच्चारण के लिए 'ग्रस्तम्', व्युत्पत्तिकार इसकी टीका करते हैं - 'लुप्तोच्चारितः' वर्णपदं वा यत्र तद्वाक्यंग्रस्तमिति, ग्रस्तं ग्रसु अदने निष्ठेति क्तः अयमत्राशयः अनुच्चारिताक्षरपदवचन नामैकं ग्रस्तं.... लुप्तवर्णपदं असम्पूर्णोच्चारितमित्यर्थः[15]। इसी प्रकार थूत्कार (थूकसहित वचन) के लिए 'अम्बूकृतं' की टीका इस प्रकार है - 'अम्बूकृतं सथुत्तत्कारे निष्ठीवसम्पर्कादनम्बुनोंम्बुकरणम् अम्बूकृतञ्च्याविति दीर्घः[16]। इसी प्रकार अभिधानचिन्तामणि मे आए समिता (गेहू का आटा), चिक्कस (जौ का आटा) नरमालिनी (दाढी, मूँछ युक्त स्त्री), यन्त्रणी, केलिकुंचिका तथा हाली (छोटी साली) भानवीय (दाँयी आँख) ,सौम्य (बाँयीं आँख) आदि इस तरह के तथा विभिन्नप्रकार के मसाले, अंग प्रत्यंग, मालाएँ, सेना के भाग, वृक्ष, लता पशु, पक्षी तथा धान्य आदि के अनेकों पर्याय शब्दों का संग्रह हेमचन्द्र ने किया तथा व्युत्पत्तिरत्नाकर इन सबकी पाणिनीय व्याकरण सम्मत व्युत्पत्ति प्रस्तुत करता है।

इसी प्रकार हेमचन्द्र प्रयुक्त वार्तिक (2/170), टीका, पञ्जिका (2/170), निबन्ध संग्रह, परिशिष्ट (2/171), कारिका, कलिन्दिका, निघण्टु (2/172), इतिहास, प्रहेलिका, किंवदन्ती, वार्ता (2/173) आदि की व्याख्याएँ तथा परिभाषाएँ

---

13 अभि.चि., काण्ड-2, श्लोक - 12 से 15

14 अभि.चि., तिर्यक काण्ड

15 अभि.चि., काण्ड-3, श्लोक 60 की टीका

16 अभि.चि., वहीं

हेमचन्द्र ने अपने ग्रन्थ तथा उसकी स्वोपज्ञ वृत्ति में तो की ही है परन्तु व्युत्पत्तिरत्नाकरकार ने भी इन पर टीका करते हुए अपना मत प्रस्तुत किया है। यथा -

1. सूत्रम् - सूत्र्यते ग्रथ्यते सूत्रं पुं.क्ली. सूत्र ग्रथने घञ्। सूचनाद्वा सूत्रम् । पृषोदरादि सूतेऽर्थमिति वा षूङ प्रसवे।
2. टीका - टीकयति प्रापयत्यर्थमिति टीका टीकृ गतौ 'पचाद्यच्' अजाद्यतष्टाप[17] सुगमानां दुर्गमानां चार्थानां निरन्तरमन्तराभावेन व्याख्यां यस्यां सा।
3. भाष्य - भाष्यं सूत्रे उक्तार्थं प्रपञ्चयति विस्तारयति।

इस प्रकार इस कोश ग्रन्थ में अनेक शास्त्रों ,विद्याओं तथा उनसे सम्बद्ध पारिभाषिक शब्दों का भी ग्रहण है, जिसकी विशद टीका व्युत्पत्तिरत्नाकर में प्राप्त होती है। अतः हेमचन्द्र कृत अभिधानचिन्तामणि की यह टीका इतिहासगत, भाषाविज्ञानगत तथा व्याकरणगत अपने वैशिष्ट्य के कारण अत्यन्त महत्त्वपूर्ण है।

## शब्दसंकेत

1. अभि.चि. - अभिधानचिन्तामणि

## सन्दर्भग्रन्थसूची

1. अभिधानचिन्तामणि, मणिप्रभा व्याख्या सहित, व्याख्याकार श्री हरगोविन्द शास्त्री, प्रकाशन चौखम्बा विद्याभवन, वाराणसी, संस्करण 1996

2. अमरकोश, रामाश्रमी टीका सहित, सम्पादन पण्डितशिवदत्त, निर्णय सागर प्रेस, बम्बई, 1929

3. व्युत्पत्तिरत्नाकर टीका अभिधानचिन्तामणि, हस्तलेख अधिगम संख्या - 39, गंगानाथ झा परिसर, प्रयागराज

✿✿✿

[17] अभि.चि., 2/170-73 की टीका

# Our Contributors


1. **Rahasbihari Dwivedi**
   HoD, Dept. of Sanskrit
   Rani Durgavati University, Jabalpur

2. **Ramlakhan Pandey**
   Professor, Dept. of Sahitya,
   Rashtriya Sanskrit Sansthan,
   Lucknow Campus, Lucknow

3. **Haridutt Sharma**
   Former HoD, Dept. of Sanskrit
   Allahabad University, Prayagraj

4. **Bhagvat Sharan Shukla**
   Professor, Dept. of Vyakarana,
   Faculty of Sanskrit Vidya Dharma Vigyan,
   Banaras Hindu University, Varanasi

5. **Pramod Kumar Sharma**
   Asst. Professor, Dept. of Sanskrit,
   Jagadguru Ramanandacharya Rajasthan Sanskrit University,
   Jaipur

6. **Ramsalahi Dwivedi**
   Professor, Faculty of Vedvedanga,
   Sri Lal Bahadur Shastri Rashtriya Sanskrit University,
   New Delhi

7. **Vishnukant Pandey**
   Professor, Dept. of Vyakarana,
   Rashtriya Sanskrit Sansthan,
   Jaipur Campus, Jaipur

8. **K.V. Ramakrishnamacharyulu**
Former Vc, JRRSU, Jaipur

9. **Lalit Kumar Tripathi**
Professor, Dept. of Vyakarana,
Rashtriya Sanskrit Sansthan,
Ganganatha Jha Campus, Prayagraj

10. **Aprajita Mishra**
Asst. Professor, Dept. of Sahitya,
Rashtriya Sanskrit Sansthan,
Ganganatha Jha Campus, Prayagraj

11. **Dipak Kumar Mishra**
Research Scholar,
Dept. of Vyakarana,
Rashtriya Sanskrit Sansthan,
Ganganatha Jha Campus, Prayagraj

✿✿✿

## Prayagraj Campus Publication

*(40% discount will be allowed on sale of Prayagraj Campus Publication)*

| Sl. No | Campus Publication | Publication Year | Price |
|---|---|---|---|
| 1. | Āditya Nātha Jha Smṛti | 1975 | ₹ 60 |
| 2. | Ajitā (Vol.I,II,III) | Vol.I-1988<br>Vol.II-1990<br>Vol.III (under Press) | ₹ 85<br>₹ 86 |
| 3. | Anaṅgsanjīvanam | 2001 | ₹ 62 |
| 4. | Anekāntavāda | 1982 | ₹ 56 |
| 5. | Annual Bibliography of Indology,1969 (Vol.I) | 1974 | ₹ 30 |
| 6. | Annual Bibliography of Indology, 1970-71 (Vol.II) | 1977 | ₹ 18 |
| 7. | Anvīkṣānayatattvabodha | 1979 | ₹ 110 |
| 8. | Bālabodhinī | 1993 | ₹ 50 |
| 9. | Bāpū | 1976 | ₹ 10 |
| 10. | Baudhāyana Śrauta Sūtram | 1982 | ₹ 55 |
| 11. | Bhāṭṭārkaḥ | 1980 | ₹ 32 |
| 12. | Bhāṭṭabhāskara | 1996 | ₹ 180 |
| 13. | Bhārgavatantram | 1981 | ₹ 36 |
| 14. | Bhallāṭaśatakam | 1993 | ₹ 24 |
| 15. | Śāhajahāṁ Virudāvalī | 1997 | ₹ 5 |
| 16. | Śaivarāmāyaṇam | –– | ₹ 40 |
| 17. | Śantiśatakam | 1982 | ₹ 16 |
| 18. | Cakrakaumudī | 1997 | ₹ 14 |
| 19. | Caṇḍikācaritacandrikā | —- | ₹ 40 |
| 20. | Citrabandha Rāmāyaṇam | 1992 | ₹ 64 |

| Sl. No | Campus Publication | Publication Year | Price |
|---|---|---|---|
| 21. | Śrīvatsa-Bharatīya Kalā Kā Ek Māngalika Pratika (In hindi) | 1983 | ₹ 35 |
| 22. | Śrīkāntakavitākalāpaḥ | 1989 | ₹ 30 |
| 23. | Descriptive Catalogue of Sanskrit Manuscripts in G.N.J.R.I (Vol. I Part-I) | 1967 | ₹ 25 |
| 24. | Descriptive Catalogue of Sanskrit Manuscripts in G.N.J.R.I (Vol. I Part-II) | 1967 | ₹ 35 |
| 25. | Descriptive Catalogue of Sanskrit Manuscripts in G.N.J.R.I (Vol. II Part-I) | 1973 | ₹ 35 |
| 26. | Descriptive Catalogue of Sanskrit Manuscripts in G.N.J.R.I (Vol. II Part-II) | 1973 | ₹ 45 |
| 27. | Descriptive Catalogue of Sanskrit Manuscripts in G.N.J.R.I (Vol. III) | 1975 | ₹ 45 |
| 28. | Descriptive Catalogue of Manuscripts Anupuraka (Vol-XII) | First Ed.2012 | ₹ 551 |
| 29. | Descriptive Catalogue of Manuscripts Darśana-śāstra (Vol-XI), Sānkhya Yoga Nyāya (Part-I) | First Ed.2012 | ₹ 501 |
| 30. | Descriptive Catalogue of Manuscripts Darśana-śāstra (Vol-XI), Mīmāmsā Vedānta (Part-II) | First Ed.2012 | ₹ 501 |

| Sl. No | Campus Publication | Publication Year | Price |
|---|---|---|---|
| 31. | Descriptive Catalogue of Manuscripts Dharmaśāstra (Vol-V) | First Ed.2012 | ₹ 501 |
| 32. | Descriptive Catalogue of Manuscripts Jyotiṣa (Vol-IV) | First Ed.2012 | ₹ 501 |
| 33. | Descriptive Catalogue of Manuscripts Purānetihāsa (Vol-III) | First Ed.2012 | ₹ 501 |
| 34. | Descriptive Catalogue of Manuscripts Sāhitya (Vol-II) | First Ed.2012 | ₹ 451 |
| 35. | Descriptive Catalogue of Manuscripts Śrautasūtra Śrautaprayoga Gṛhyasūtra Gṛhyaprayoga (Vol-VIII) | First Ed.2012 | ₹ 501 |
| 36. | Descriptive Catalogue of Manuscripts Stotra (Vol-IX) | First Ed.2012 | ₹ 501 |
| 37. | Descriptive Catalogue of Manuscripts Tantra-Mantra-Yantra (Vol-VII) | First Ed.2012 | ₹ 501 |
| 38. | Descriptive Catalogue of Manuscripts Vedic-Literature (Vol-I) | First Ed.2012 | ₹ 451 |
| 39. | Descriptive Catalogue of Manuscripts Vrata-Pūjā-Āyurveda (Vol-X) | First Ed.2012 | ₹ 301 |

| Sl. No | Campus Publication | Publication Year | Price |
|---|---|---|---|
| 40. | Descriptive Catalogue of Manuscripts Vyākaraṇa Śikṣā Nirukta Kośa (Vol-VI) | First Ed.2012 | ₹ 501 |
| 41. | Dhruvcaritam | First Ed.2011 | ₹ 30 |
| 42. | Drāhyāyaṇaśrautasūtram | 1983 | ₹ 125 |
| 43. | Durmilāśatakam | 1980 | ₹ 5 |
| 44. | Gītakandalikā | 1983 | ₹ 74s |
| 45. | Gītgorīvaram | 2001 | ₹ 64 |
| 46. | Gangāvataraṇacampū | —— | ₹ 150 |
| 47. | Gaṅgālaharī | 2011 | ₹ 35 |
| 48. | Gaṅgālaharī Vyākhyā | 2011 | ₹ 60 |
| 49. | Gautamīya Sūtra Prakāśa | 1978 | ₹ 24 |
| 50. | Haravijayam (Part-I) | 1982 | ₹ 75 |
| 51. | Haravijayam (Part-II) | 1983 | ₹ 60 |
| 52. | Jānarājacampū | 1976 | ₹ 14 |
| 53. | Jātakamālā ek Adhyayana | 1977 | ₹ 40 |
| 54. | Jahāṅgīra Virudāvalī | 1978 | ₹ 24 |
| 55. | Jaṭāpaṭala | 2001 | ₹ 46 |
| 56. | Jhāṅsīśvarī Caritam | 1979 | ₹ 12 |
| 57. | Journal Of Ganganath Jha Campus Vol.68 | | ₹ 150 |
| 58. | Journal Of Ganganath Jha Campus Vol.69 | | ₹ 150 |
| 59. | Journal Of Ganganath Jha Campus Vol.70 | | ₹ 150 |

| Sl. No | Campus Publication | Publication Year | Price |
|---|---|---|---|
| 60. | Journal of Ganaganath Jha Research Institute (Vol.1 to 40, ₹ 60 each vol.) (Vol.41 Onwards, ₹ 80 each Vol.) | Since 1943 | ₹ 60 (each vol. ₹ 80) |
| 61. | K.C. Chaṭṭopādhyāya Smṛti Grantha (Spl. Vols. Journal) | 1971-72 | ₹ 60 |
| 62. | Kāśikāvṛttisāra (Part-I and II) | Part-I 1992<br>Part-II 1995 | ₹ 160<br>₹ 240 |
| 63. | Kālīpūjāpaddhati | 1995 | ₹ 180 |
| 64. | Kāpīśāyanī | 1980 | ₹ 27 |
| 65. | Kāvyaprakāśa Tīkā-trayasahita | 1976 | ₹ 300 |
| 66. | Karṇasundarīnāṭikā | 2001 | ₹ 114 |
| 67. | Kṛṣṇalīlānāṭikā | 2002 | ₹ 90 |
| 68. | Laghuvārttikam | 1987 | ₹ 50 |
| 69. | M.M. Umeśa Miśra Smṛti-grantha | —- | ₹ 115 |
| 70. | M.M. Gopinātha Kavirā-jasmṛtigrantha | 1976 | ₹ 60 |
| 71. | Mṛdvīkā | 1983 | ₹ 36 |
| 72. | Mahākāla samhitā guhyakālīkhaṇḍa (Vol.II, Part-I) | Prt.I thoroughly Revised 2nd Ed.1977 | ₹ 230 |
| 73. | Mahākāla Samhitā Guhyakālīkhaṇḍa (part-II) | 1977 | ₹ 60 |

| Sl. No | Campus Publication | Publication Year | Price |
|---|---|---|---|
| 74. | Mahākāla Samhitā Guhyakālīkhaṇḍa (Part-III) | 1979 | ₹ 48 |
| 75. | Mahākāla Samhitā kāmakalākhaṇḍa (Vol.I) | 3rd Rev. Ed. 2006 | ₹ 252 |
| 76. | Mahāmahopādhyāya | 2015 | ₹ 225 |
| 77. | Mahāśakti Vindhyachal | 2001 | ₹ 260 |

❀❀❀



राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

गङ्गानाथझापरिसरः

चन्द्रशेखर-आजादोद्यानम्

प्रयागराजः 211002